Śrī-Nannarāja was born as his son. He is considered highly by the good people. He has been fulfilling his duties, He is charming, free of blemishes, lofty like a pennant, formidable for (his) enemies, good enough for being yoked (for good endeavours), foremost among those who set great store by valour in battles, the leader of the great souls whose minds are elevated by deep thought and concentration, who is the very celestial tree for those who are needy, who is endowed with all desirable qualities which seem to have resorted to him due to his being a secial and fit refuge, who is pious and attentive to Brahmins and is devoted to the worshipful (God śrī-Bhagavān-Vishṇu) and who has the other name śrī-Yuddhāsura,

He (that is Nannarāja) draws the attention of all (subordinate) kings, feudatories, the heads of territorial divisions and holders of the village - fiefs

may it be known to you that for the augmentation of the merit of my parents and self

The village named Jalaükuhē bounded by (the village) Kiṇihivaṭṭara on the west, (the village) Pipparikā on the north, (the village) Jalukā on the east and (the village) Arjuna-grāma on the south has been granted with due olibations of water to

Śrīprabha-chaturvvēda, son of Raktaprabha-chaturvvēda and grandson of Mitra-chaturvvēda of Kautsa-sagōtra on (the occasion of) the full-moon day of the month Kārttika.

[The grant is followed by the usual appeal to protect the grant and admonition against its disruption addressed to the future rulers of the area as also two of the usual verses in this regard attributed to the worshipful Vyāsa, the coordinator of the Vēdas]

This charter has been written when six hundred thirty one years of the Śaka era have elapsed, by *sāndhivigrahika* Nāüla.

Notes

1.

2. In this comparison of king Durgarāja with the moon, which rose out of he milky ocean, by double entendre the writer of the draft of the charter points out

1) How the dynasty of the Rāshṭrakūṭas, was pure, refreshing, and pre-eminent like the milky ocean which is important among oceans.

2) śrī-Durgarājaw s born in that dynasty just as the moon which came out of the milky ocean on being churned. His rule was benign and benevolent for his subjects just like the moon which is soothing for those on earth. He with his goodness was beneficial both to his friends and to his enemies, just as the moon on being born from the milky ocean on its being churned by the *asuras* (evil people) on the one side and the *dēvas* (good people) on the other, ascended to the heaven and from that eminence shed its soothing rays on both the *asuras* and *dēvas* below.

3. *tasyātmavānātmajaḥ* is better amended to *tasyātmavat-ātmajaḥ* (i.e.) whose son (one born of him) was just like his own self (in every respect).

* * *

No. 19

AN INSCRIPTION OF RAJASIMHA AT MAHABALIPURAM

Location : Mahābalipuram, [1]Chengalpattu District, Tamilnadu
Date : C.710 A.D.[2]
Script : Pallava-grantha
Language : Sanskrit
King : (Narasimhavarman II) Rājasiṁha[3]
Dynasty : Pallava
Reference : Rangacharya, V., *EI*, XIX. pp.105-109

Text

Metre: V.1 *Āryā*;. 2 *Vasantatilakā* ; 3-5 *Anushṭubh*

श्रीः ।

अप्रतिममवनिभूषणमकलंकन्धरणिचन्द्रमवनीन्द्राः ।
अरिमर्द्दनमतुलबलं कुलतिलकं ये नमन्ति ते सुखिनः ॥ १ ॥

भयरहितो बहुनयः ॥

अत्यन्तकाममपराजितमेकराज
श्चन्द्रार्द्धशेखरशिखामणिमद्वितीयम् ।
चण्डाशनिं क्षितिभृताम्म्हतामसह्यं
सम्प्राप्य काममिव नन्दति जीवलोकः ॥ २ ॥

श्री उदयचन्द्रः

श्रीराजसिंहो रणजयः श्रीभरश्चित्रकार्म्मुकः
एकवीरश्चिरम्पातु शिवचूडामणिर्म्महीम् ॥ ३ ॥
श्रीकार्मुकः कालकालः कालान्तकपदार्चकः ।

अभिरामो विजयते रणभीमो गुणालयः ॥ ४ ॥

श्रीवल्लभमतिमानं रणवीरं कुलप्रकाशकरं ।

ऊर्ज्जितमुन्नतराममम्प्रणमत युद्धार्ज्जुनन्धराधीशाः ॥ ५ ॥

यमर्त्थदृष्टो शत्रूनाम्मल्ल महामल्लं ।

त्रिनयनभक्तं मित्रम् . . नरेन्द्रसिंहन्नमन्ति नृपाः ॥ ६ ॥

Summary

(God Śiva) is one who has peerless, the ornament of the world and who has no blemish. He is the Moon of the world and is like the king. He has got great strength to crush the enemies and He is the forehead mark. Happy people bow to Him. He has no fear and has the civility of government. He is one who has great desire. He is one who cannot be conquered. He is one and then only king. He is the great one who has got the half Moon. He has no parallel. He can hurl a vialent thunderbolt. He cannot be endured by kings. All people are happy with him.

He is the rising moon.

This king known as Rajasiṁha[3] is victorious with his archery. The one king bears the great Śiva who himself is an archer. He has the time. He is like Bhīma. He is victorious and he is also the God of death to death itself[4] and He is the abode of virtues.

He is supreme and the hero of all enemies. He is bright in the whole world. He is firm even like Sri Rāma. He is the conqueror like Arjuna.

He was like the wrestler. He is the one with three eyes. To Him Narēndra-siṁha prostrates.

Notes

1. This inscription runs around the plinth of the shore temple of Mahābalipuram (*EI,* XIX, p.105).

2. This inscription is ascribed to Narasimhavarman II. (Sastri KAN- *A History of South India*, p.171).

3. Rājasiṁha was one of the titles of Narasiṁhavarman II.

4. This attribute of *Kālakāla* or God of death is of God Śiva. Sometimes the same attribute is given to Rājasiṁha.

⁂

No. 20
INDRAGADH INSCRIPTION OF NANNAPPA

Location : Indragadh, (Two miles north of Bhānpurā), Bhānpurā Tahsil, Mandasaur District, Madhya Pradesh
Date : V.S. 767=710 A.D.
Script : Siddhamātṛikā (Early Nāgarī)
Language : Sanskrit
King : Nannappa
Dynasty : Rāshṭrakūṭa
Reference : Kṛishṇa Dēva, *EI*, XXXII, pp.112-117

Text

Metres: Vv.1,4, 6, *Sragdharā* ; 2, 3, 8,
Śārdūlavikrīḍita ; 5, 7, 9-15, *Anushṭubh*

ॐ नमः शिवाय ॥

सूचीपातेन सद्यः प्रचलति वसुधा कम्पते नागराजः

पादोद्धारेण नीतो द्ध्वज इव धवलो दुग्धसिन्धुर्विभाति ।

दोर्द्दण्डैश्च भ्रमद्भिः पुनरपि गिरयो जातपक्षाः प्रयान्ति

यस्मिन्नित्थं प्रनृत्ते भवति जगदिदं सोस्तु भूत्यै भवो वः ॥ १ ॥

प्राप्तं तस्य फलं मयाद्य तपसो यत्तत्कृतं तत्पुरो

यन्मे मूर्ध्नि पदं करोति हर हे त्वल्लालिता जाह्नवी ।
गेहं यामि पितुर्गृहाण तनयं सोढुं न शक्तास्म्यहम्
एवं मन्युभरालसं गिरिजया प्रोक्तो हरः पातु वः ॥ २ ॥

श्रीमत्कङ्कणपन्नगेन्द्रशिरसि ज्वालावलीभासुरो
यस्तिष्ठत्यमलो मणिस्तदुदरे सङ्क्रान्तबिम्बद्युतिम् ।
रूपं भर्तुरवेक्ष्य लज्जितमुखीगौरीमनोहर्षणं
रोमांचं दधती विवाहसमये नित्यं शिवायास्तु वः ॥ ३ ॥

यस्मिन्दृष्टेरिवृन्दं घटितगजघटापीठमप्याहवेषु
क्षिप्रं याति प्रणाशं क्रमसमुपचितं स्वं परित्यज्य मानम् ।
भामानस्य प्रसूतिः प्रकटितयशसो राष्ट्रकूटान्वयस्य
श्रीणण्णप्पः स राजा जयति निजगुणावर्ज्जिताशेषलोकः ॥ ४ ॥

आसीत्पाशुपताचार्यो रुद्रशृङ्खलिकाग्रणीः ।
विनीतराशिसंज्ञो यः शान्तः प्रसवगोच्वरी ॥ ५ ॥

यः ख्यातो भूतलेस्मिन्प्रकटपृथुयशाः सत्ययुक्तः सुशान्तो
विद्वाञ्ज्ञानी कृतज्ञः सकलवसुमतीमण्डनो भावितात्मा ।
नित्यं राज्ञां समूहैर्न्नतचरणयुगश्शब्दशास्त्रे स्वभिज्ञो
निष्पन्नैः शिष्यसङ्घैरनवरतमभिष्टूयमानः सुशीलः ॥ ६ ॥

अभवत्तस्य शिष्यो यस्तपश्शक्त्या ज्वलन्निव ।
दानराशिरिति ख्यातः शशाङ्ककरनिर्म्मलः ॥ ७ ॥

शास्त्रार्थप्रविचारनिर्म्मलमतिर्वाग्मी गुणैर्भूषितः

Inscription No.20



Indragadh Inscription of Nannappa V.S.767

शान्तात्मा प्रथमः प्रकाशयशसां नित्यं दयालुर्भृशम्।
योगाभ्यासवशादतीन्द्रियगतज्ञानेन यो विश्रुतः
शिष्याध्यापनसक्तधीरतितरामीशस्य कार्ये रतः ॥ ८ ॥
स्वयम्भोर्लोकनाथस्य शैलं शीलवता स्वयम्।
तेनेदं कारितं दिव्यं मन्दिरं मन्दरोपमम् ॥ ९ ॥
खण्डस्फुटितसंस्कारः स्वातन्त्र्यं चात्रकीर्त्तने।
नगरेणैव कर्त्तव्यं सर्व्वसानाथ्यकारिणा ॥ १० ॥
अपरोऽपि हि यः कश्चिन्नगरानुमते स्थितः।
पुनः करोति संस्कारं तस्यानुज्ञातमेव हि ॥ ११ ॥
यावद्भूर्लोकपालाश्च यावच्चाम्बुधयः स्थिराः।
तावदास्तां स्थिरं शम्भोरिदमायतनं महत् ॥ १२ ॥
सप्तषष्ट्यधिके याते वर्षाणां शतसप्तके।
मालवानां नरेन्द्राणां पृथिव्यां विश्रुतात्मनाम् ॥ १३ ॥
हंसकारण्डवक्रौञ्चनिनादसुभगेनिले।
काले शरदि संप्राप्ते कृतं देवालयं त्विदम् ॥ १४ ॥
गौडदेशोद्भवस्येयं शङ्करस्यात्मजेन तु।
दुर्ग्गादित्येन विहितापूर्वा पूर्वजपूजना ॥ १५ ॥

उत्कीर्ण्णा महाव्रतिना चामुण्डसोमेन ॥ ० ॥ प्राग्वाटजातीयः कुमारः तस्य दुहितरः देउल्लिका तक्षुल्लिका भोगिनिका तिस्रोऽपि स्वप्रतिपत्त्या प्रतिग्रहपात्रं प्रयच्छन्ति य आसाम् इह कोट्टाभ्यन्तरे अववरकपूर्वाभि

मुखः प्रतिग्रहाय दत्तः यस्याघाटनानि पूर्वतः अङ्गणं क्षुरभोग्यं सुवीथि च दक्षिणतः अन्तिमगृहमर्यादा पश्चिमतो लिकापात उत्तरतोस्यैवाववरक भित्तिमर्यादा एवं चतुराघाटनोपलक्षितः परलोकसाधनार्थैं गुहेश्वराय प्रतिपादित इति ॥ इह कोट्टाभ्यन्तरे पश्चिमप्रतोलीसमीपे पूर्वाभिमुखं गृहं यस्याघाटनानि पूर्व्वतः रथ्या मार्गः दक्षिणतः ।

Summary

Verse 1 God Śiva's dance was with his foot or is on the head of Ādiśēsha and so Ādiśēsha became perturbed. As his dance is in ocean, the mountains living in oceans also became trembling. But God Bhava was unmoved.

Verse 2 Śrimati Pārvati saw God Śiva going very near Jāhnavī, she became agitated. So she told God Śiva that she would go back to her own father's mansion as she was not needed.

Verse 3 Śrimati Pārvatī said God Śiva in his wedding having the serpent on the bangle on His hand she got enchanted and became shy. May that Śiva bless us.

Verse 4-15 There was Naṇṇappa in the Rāshṭrakūṭa family. His son was Bāmāna. There was Pāśupatācharya who was the head of Rudraśṛinkhāla. Then (his disciple ?) was Vinītaraśi. He was truthful, calm, virtuous and learned. He had many disciples. One of those disciples was Dānarāsī. He was well-known, pure like the moon, had all the sciences, had deep thought, scholarship and all such qualities. He was peaceful, fame and sympathetic. Because he had exercises and had *aindriya-jnāna* (he had known the sense organs). He was famous and he knew how to teach the disciples. There was the temple of Svayambhū-Lōkanātha which was like the mountain Mandara. This temple was done and embellished by city council. Let this temple remain so long as *lōkapalas-*

(guardians of the world directions) of earth and oceans also still remain.

This temple was constructed in the autumn of the year 767 of Mālava rulers This eulogy of God Śiva was composed by Durggāditya, son of Śaṅkara of Gaudaḍēśa. It was written by Chāmuṇḍasōma, a *mahāvratin.* The *kumāra* of *prāgjāṭiya* and the three daughters, Dēüllika, Takshuḷlikā and Bhōginikā did the *graha-pātram.* This *koṭi* had these boundaries - on the west there was the broad-way, on the east in front of house, on the east road, on the south there is a path.

◎ ◎ ◎ ◎

No. 21

BANPUR PLATES OF DHARMARAJA MANABHITA

Location : Bāṇpur, Puri District, Orissa
Date : C.710 A.D.
Script : Early Nāgarī
Language : Sanskrit
King : Dharmarāja-dēva
Dynasty : Śailōdbhava
Reference : Sircar, D.C., *EI*, XXIX, pp.38-43

Text

Metre: Vv 1-3, 11, 14, 18 *Śārdūlavikrīdita* ; .2, 5, 6, 8, 12, 22 *Vasantatilakā* ; .4, 13, 16, 19-21 *Anushṭubh* ; 7 *Indravajra* ; 9, 10, 15, *Sragdharā* ; .17 *Nardaṭakā* ;. 23 *Pushpitāgrā*

सिद्धम् । स्वस्ति ॥

इन्दोर्द्धौतमृणालतन्तुभिरिव स्लिष्टाः करैः कोमलै

र्बद्धाहेररुणैः स्फुरत्फणिमणेर्दिग्धप्रभासोंशुभिः ।

पार्व्वत्याः सकचग्रहव्यतिकरव्यावृत्तबन्धश्लथा

गङ्गाम्बुप्लुतिभिन्नभस्मकणिकाः शम्भोर्जटाः पान्तु वः ॥ १ ॥

प्रांशुर्म्महेभकरपीवरचारुबाहुः

कृष्णाश्मसञ्चयविभेदविशालवक्षाः ।

राजीवकोमलदलायतलोचनान्तः

ख्यातः कलिङ्गजनतासु पुलिन्दसेनः ॥ २ ॥

तेनेत्थं गुणिनापि सत्त्वमहता नेष्टं भुवोर्मण्डलं

शक्तो यः परिपालनाय जगतः को नाम स स्यादिति ।

प्रत्यादिष्टविभूत्सवेन भगवानाराधितः शाश्वतः
तच्चित्तानुगुणं विधित्सुरदिशद्वाञ्छां स्वयंभूरपि ॥ ३ ॥
स शिलाशकलोद्भेदि तेनाप्यालोक्य धीमता ।
परिकल्पितसद्वंशः प्रभुः शैलोद्भवः कृतः ॥ ४ ॥
शैलोद्भवस्य कुलजो रणभीत आसीद्
येनासकृत् कृतभियां द्विषदङ्गनानां ।
ज्योत्स्नायप्रबोधसमये स्वधियैव सार्ध
माकम्पितोनयनपक्ष्मजलेषु चन्द्रः ॥ ५ ॥
तस्याभवद्विबुधपालसमस्य सूनुः
श्रीसैन्यभीत इति भूमिपतिर्गरीयान् ।
यं प्राप्य नैकशतनागघटाविघट्ट
लब्धप्रतापविजयं मुमुदे धरित्री ॥ ६ ॥
तस्याऽपि वंशेथ यथार्थनामा
जातो यशोभीत इति क्षितीशः ।
येन प्ररूढोपि शुभैश्चरित्रै
मृष्टः कलङ्कः कलिदर्प्पणस्य ॥ ७ ॥
जातोथ तस्य तनयस्सुकृती समस्त
सीमन्तिनीनयनषट्पदपुण्डरीकः ।
श्रीसैन्यभीत इति भूमिपतिर्म्महेभ
कुम्भस्थलीदलनदुर्ल्ललितासिधारः ॥ ८ ॥

कालेयैर्भूतधात्त्रीपतिभिरुपचितानेकपापावतारै
र्नीता येषां कथापि प्रलयमभिमता कीर्त्तिपालैरजस्त्रम्।
यज्ञैस्तैरश्वमेधप्रभृतिभिरमरा लम्भिता तृप्तिमुर्व्वीम्
उद्दृप्तारातिपक्षक्षयकृतिपटुना श्रीनिवासेन येन ॥ ९ ॥
तस्योत्खाताखिलारेर्म्मरुदिव जनितो भास्वदुष्णांशुतेजः
शूरो मानी दयालुर्नरपतिरयशोभीतदेवः तनूजः।
मातङ्गान्योतितुङ्गान्बहलमदमुचश्चारुवक्रान्प्रचण्डान्
बध्वाकर्षत्यखिन्नः पुनरपि दयते यत्नतः सम्प्रगल्भः ॥ १० ॥
केचिच्छैलगुहोदरेषु निरता धूमावलीपायिनः
अन्ये वायुफलाम्बुभक्षनिरताः केचिन्निराहारकाः।
इत्थं योगजुषो विहाय वसतिं ध्यायन्तिं दिव्यं पदं
चित्रं मद्धचमराजदेवगुणधृद्राज्येपि तत्प्राप्तवान् ॥ ११ ॥
तस्याभवत्सकलशास्त्रविशेषवेदी
श्रीधर्म्मराज इति सूनुरधीतशास्त्रः।
यस्यातिनिर्मलयशः परिवर्द्धमानं
पादौ हरेरिव न मायितमात्रिलोक्याः ॥ १२ ॥
निराश्रयैः प्रयत्नेन गुणैस्स परिवारितः।
वैमुख्यादीर्षया चैव सर्व्वदोषैर्व्विवर्ज्जितः ॥ १३ ॥
काले हन्ति रिपून्महारणशतव्यापारलब्धोन्नतीन्
काले भक्तिमुपैति शुभ्रचरितैः शम्भोः कथाविस्तरैः।

काले धर्मविवेचनाय निरतो ब्राह्मण्यमध्ये स्थितः
क्रौञ्चारेरिव यस्य चेष्टितमलं लोकैः समालोक्यते ॥ १४ ॥
राज्यं लब्ध्वैव दर्प्पाद्विगणिततयो माधवो ज्येष्ठभावान्
देशादस्मादपास्त्तुङ्कृतविषममतिर्व्विग्रहे फासिकायाम् ।
युद्धक्षोभेण भग्नो नृपतिवरमसौ संश्रितस्तीवराख्यं
पश्चात्तेनापि सार्द्धं पुनरपि विजितो विन्ध्यपादेषु जीर्ण्णः ॥ १५ ॥
शौर्यं श्रीर्यौवनं राज्यमेकैकं मदकारकम् ।
सर्व्वं श्रीमानभीतस्य निर्व्विकारमुपस्थितम् ॥ १६ ॥
तुरगखुराभिघातविदलद्धरणीतलजं
जयगजकर्ण्णचामरविधूननविस्फुरितम् ।
सुभटफरप्रसर्प्पणनिरुद्धककुद्गगनम्
बलरज एव यस्य जयति द्विषतां ध्वजिनीम् ॥ १७ ॥
आरुच्य प्रसभं घटागजगणैरश्वीयपादातकैः
कैर्ज्जित्वान्यान्बलशालिनो नृपवरानागत्य दृष्टैर्भुवम् ।
युद्धे भीमपराक्रमेण विजिता निर्वृत्पदं प्रापिता
दृश्यन्ते भवनाङ्गणे प्रतिदिनं प्रातः प्रणामार्थिनः ॥ १८ ॥

विजयसिलिडयावासकात्श्रीशैलोद्भवकुलतिलकमहामखवाजपेयाश्वमेधावभृथस्नाननिर्व्वर्त्तितसूनोस्तनयो बहुविधमत्तवारणवरतुरगपदातिशस्त्रसम्पात सङ्कुलबह्वाहवविनिहतशत्रुरनेकविक्रमाक्रान्तसकलभूमण्डलोभुजबलातुलप्रथितयशाश्चतुर्द्दन्तसङ्ग्रामादसकृल्लब्धप्रतापः परममाहेश्वरो

मातापितृ पादानुध्यातः श्रीधर्म्मराजदेवः कुशली। तोरणविषये महा सामन्त श्रीसामन्तमहाराजराजानकराजपुत्रान्तरङ्गदाण्डनायकदाण्ड पाशिकौपरिकस्तद्विनियुक्तकव्यवहारिणस्सकरणानन्यांश्च ब्राह्मणपुरोगादि वषरिकजनपदांश्चाटभटवल्लभजातीयान्यथार्हम्पूजयति मानयत्याज्ञापयति च विदितमस्तु भवतामेतद्विषयसम्बद्धार्हदाचार्यनासिचन्द्र॥ तच्छिष्य एकशाट प्रबुद्धचन्द्रयावत् जीवति बलिसत्त्रचरुप्रवर्त्तनाय भगवती श्रीराज्ञी श्रीकल्याणदेवी थोरणविषयसम्बद्धसुवर्णरलोण्डी टिम्पीर त्रीणि ३ राण्डसीमसम्बद्धमधुवाटकग्राम टिम्पीरद्वयं २ पादः १ तदनुमोदितो स्माभिः यतस्ताम्रपट्टकदर्शनात् यथाकालसमुचितफलमुपभुञ्जानस्य धर्म्मगौरवात् केनचित् परिपन्थिना न भवितव्यमिति। उक्तञ्च धर्म्म शास्त्रे॥

बहुभिर्व्वसुधा दत्ता राजभिस्सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ १९॥
स्वदत्ताम्परदत्तां वा यो हरेत वसुन्धराम्।
स विष्ठायां कृमिर्भूत्वा पितृभिस्सह पच्यते॥ २०॥
मा भूदफलशङ्का वः परदत्तेति पार्थिवाः।
स्वदानात्फलमानन्त्यं परदत्तानुपालने॥ २१॥
विद्युद्विलासतरलामवगम्य सम्यग्
लोकस्थितिं यशसि सक्तमनोभिरुच्चैः।
नित्यं परोपकृतिमात्त्ररनतैर्भवद्भिः

धर्म्मार्भिराधनपरैरनुमोदितव्या ॥ २२ ॥

इति कमलदलाम्बुविन्दुलोलां
श्रियमनुचिन्त्य मनुष्यजीवितञ्च ।
सकलमिदमुदाहृतञ्चबुद्ध्वा
न हि पुरुषैः परकीर्त्तयोर्विलोप्याः ॥ २३ ॥

दूतकोत्र पञ्चकरणोपरिकवैश्वासिकबृहद्भोगी सामन्तः उत्कीर्ण्णा अक्षशालिकेन आदित्यदेवेन लाञ्छितं पेटापालबलवर्म्मणा। संवत् १ फाल्गुन शुदि ॥

Summary

Verses 1-11 are the same of the first Bānpur, (*USVAE*, IV, II, No.66) except that verses 3, 4, 7, 22, 25 and the *Kongōda*-nāndālāt from those Banpur plates have not been included here.

Verses 11-14 There was Dharmmarāja a son of Madhyamarāja-dēva. He had the expertise of Śāstras. He had pure fame and he had conquered (measured) all the three worlds (even like Trivikrama). He had no ambition but the subjects were pressing before him. He had no ambition and he had no such greed. He was a true *Brahmaṇya*, a lover of Brahmins. He was so scrupulous like *Krauncha.* His elder brother was Mādhava. He wanted to get the kingdom to himself.

But he was defeated by him at : Phāsika. He tried also Tīvara as his helper. But both Mādhava and Tīvara were defeated in Vindhya range. He thus became śri Mānabhīta. His conquests were many and so feudatories were thronging to kiss the feet of this king.

The victorious king of Śailodbhava family was in the palace at Āsilāḍa (or Siliḍa), the son (or grandson) of one who had performed the sacrifice of *Vājapēyi*, *Aśvamēdha* and had bathed in the *avagṛitha* bath and great army with elephants, choice horses and troops and had a great treasury. He had chastised many other enemies. He was also a Paramamāhēśvara (devotee of great Īśvara) and a devotee of the feet of the parents.

This Dharmma rājadēva is well and orders the *mahāsāmanta*, *Mahārāja*, *Rājānaka*, *rājaputra-antaraṅga*, *dāṇḍanāyaka*, *dāṇḍapāsika*, *uparika*, *viniyuktaka*, *vyavahāris*, *karaṇa*, such others *brāhmaṇas*, *chāṭa*, *bhaṭa*, *vallabha* and such others of Thōraṇavishaya are worshipped those that are due. The 3 *timpiras* of Suvarṇaraloṇḍī and 2 *timpiras* of Madhuvātaka village in Rāṇḍa-sīma, in the same *vishaya* had been given by *bhagavatī śrī*-queen śrī-Kalyaṇadēvī and *bali*, *satra* and *charu* would be given to Prabuddhachandra, a *ēka-śata* (having one cloth ?), disciple of *Jaiṇa-āchārya* Nāsichandra to be there as he would live. Now a copper-plate as given should not be hindred. [Five of the imprecatory verses from all those given by *dharma-śāstra*] Dūtaka the Sāmanta who was a *pañcha-karaṇa*, *uparika*, *vaiśvāsika*, *bṛiha-bhōgi*. Written by Ādityadēva, a *akshasālika*, registered with a seal (*lānchitam*) by *petapāla* Balavarmman. Samvat 1 . . .

Seal : Between the crescent bull and lotus. There is the legend reading śrī-Dharmarāja-dēvasya

* * *

No. 22

A COPPER-PLATE GRANT OF CHALUKYA VIJAYADITYA

Location	: Satara, Mahārāshṭra
Date	: Śaka 632; R.year 14=710 A.D.
Script	: Early Kannaḍa
Language	: Sanskrit
King	: Vijayāditya
Dynasty	: Chālukyas of Bādāmi
Reference	: Sankalia, H.D., *EI.* XXVI, pp.322-26

Text

Metre: Vv.1-4; *Anushṭubh*

स्वस्ति

जयत्याविष्कृतं विष्णोर्व्वाराहं क्षोभिताण्र्णवम् ।
दक्षिणोन्नतदंष्ट्राग्रविश्रान्तभुवनं वपुः ॥ १ ॥

श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हरितीपुत्राणां सप्तलोकमातृभिस्सप्तमातृभिरभिवर्द्धितानां कार्त्तिकेयपरिरक्षणप्राप्तकल्याणपरंपराणां भगवन्नारायाणप्रसादसमासादितवराहलाञ्छनेक्षणवशीकृताशेषमहीभृतां चालिक्यानां कुलमलंकरिष्णोरश्वमेधावभृथस्नानपवित्रीकृतगात्रस्य श्रीपुलकेशिवल्लभमहाराजस्य सूनुः पराक्रमाक्रान्तवन वास्यादि परनृपतिमण्डलप्रणिबद्धविशुद्धकीर्तिः कीर्तिवर्म्मपृथिवीवल्लभमहाराजस्तस्यात्मजस्समरसंसक्तसकलोत्तरापथेश्वरश्रीहर्षवर्द्धनपराजयो पात्तपरमेश्वरशब्दस्तस्य सत्याश्रयश्रीपृथिवीवल्लभमहाराजाधिराजपरमेश्वरस्य प्रियतनयस्य प्रज्ञातनयस्य खड्गमात्रसहायस्य चित्रकण्ठाभिधानप्रवरतुरंगमेणैकेनैवो

त्सारिताशेषविजिगीषोरवनिपतित्रितयान्तरितां स्वगुरोः श्रियमात्मसा
त्कृत्य प्रभावकुलिशदलितपाण्ड्यचोळचेरकेरळकळभ्रप्रभृतिभूभृददभ्र
विभ्रमस्यानन्यावनतकाञ्चीपतिमकुटचुम्बितपादांबुजस्य विक्रमादित्यस
त्याश्रयश्रीपृथिवीवल्लभमहाराजाधिराज परमेश्वरभट्टारकस्य प्रियसूनोः।
पितुराज्ञया बालेन्दुशेखरस्य तारकारातिरिव दैत्यबलमतिसमुद्धतं त्रैराज्य
काञ्चीपतिबलमवष्टभ्य करदीकृतकवेरपारसीकसिंहलादिद्वीपाधिपस्य सक
लोत्तरापथनाथमथनोपार्जितोर्जितपाळिध्वजादि समस्तपारमैश्वर्यचिह्नस्य
विनयादित्यसत्याश्रयश्रीपृथिवीवल्लभमहाराजाधिराज परमेश्वरभट्टारकस्य
प्रियात्मजश्शैशव एवाधिगताशेषास्त्रशास्त्रो दक्षिणाशा विजयिनी
पितामहे समुन्मूलितनिखिलकण्टकसंहतिरुत्तरापथविजिगीषोर्गुरोरग्रत
एवाहवव्यापारमाचरन्नरातिगजघटापाटनविशीर्य्यमाणकृपाणधारस्समग्र
विग्रहाग्रेसरस्सत्साहसरसिकः पराङ्मुखीकृतशत्रुमण्डलो गंगायमुनापा
ळिध्वजपटहढक्कामहाशब्दचिह्नक माणिक्यमतंगजादीन्पितृसात्कुर्व्वन्परैः
पलायनमानै रासाद्य कथमपि विधिवशादपनीतोपि प्रतापादेव विषय
प्रकोपमराजकमुत्सारयन्वत्सराज इवानपेक्षितापरसहायकस्तदवग्रहान्नि
र्ग्गत्य स्वभुजावष्टंभप्रसाधिताशेष विश्वंभरः प्रभुरखण्डितशक्तित्रयत्वा
त्शत्रुमदभञ्जनत्वादुदारत्वान्निरवद्यत्वाद्यस्समस्त भुवनाश्रयस्सकलपारमै
श्वर्य्यव्यक्तिहेतुपाळिध्वजाद्युज्वलप्राज्यराज्यो विजयादित्यसत्याश्रयश्री
पृथिवीवल्लभमहाराजाधिराजपरमेश्वरभट्टारकस्सर्व्वानिवमाज्ञापयति विदित
मस्तु वोस्माभिः द्वात्रिंशदुत्तरषट्शतेषु शकवर्षेष्ववतीतेषु प्रवर्द्धमान विजय

राज्यसंवत्सरे चतुर्दशे वर्तमाने करहाटनगरमधिवसति जयस्कन्धावारे कार्त्तिकपौर्ण्णमास्यां विक्रमादित्यविज्ञापनया आत्रेयगोत्राय दामोदर शर्म्मणः पौत्त्राय गोल्लषडगवित् शर्म्मणः पुत्राय नागुल्लशर्म्मणे कृष्ण वेण्णानदीपूर्व्वतटस्थः करहाट नगरसमीपस्थः कारुएनामग्रामो दत्तः। पुनः करहाटनगरे आम्रपट्टिका नाम पञ्चविंशतिनिवर्तनं क्षेत्रं दत्तं। तदागामि भिरस्मद्वंश्यैरन्यैश्च राजभिरायुरैश्वर्य्यादीनां विलसितमचिरांशु चञ्चलमवगच्छद्भिराचन्द्रार्क्कधरार्ण्णवस्थितिसमकालं यशश्चिचीषुभिः स्व दत्तिनिर्व्विशेषपरिपालनीयमुक्तञ्च भगवता वेदव्यासेन व्यासेन॥

बहुभिर्व्वसुधा भुक्ता राजभिस्सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ २॥

स्वन्दातुं सुमहच्छक्यं दुःखमन्यस्य पालनम्।
दानं वा पालनं वेति दानाच्छ्रेयोनुपालनम्॥ ३॥

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम्।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः॥ ४॥

महासान्धिविग्रहिकश्रीनिरवद्यपुण्यवल्लभेन लिखितमिदं शासनं .....॥

Summary

[The introductory portion is identical with that of the other charters of this king after Vikramāditya detailed in Rāyagad Plates above (No.2 above).]

Vijayāditya (with titles as in the preceding numbers) being resident in Karahāṭa-nagara,[1] the *jaya-skandhāvāra* conveyed the order announcing the grant of the village named Kārve,[2] near the Karahāṭa-nagara, situated on the eastern bank of the river Kṛishṇaveṇṇā as also the field

named Āmbra-paṭṭikā,[3] twentyfive *nivarttanas* in extent in Karahāṭa-nagara to Bhānudēva[4] śarmman, son of Golla-shaḍaṅgavid-śarmman and grandson of Dāmōdara-śarmman belonging to Ātrēya-gōtra

On the supplication of Vijayāditya[5] on the day of the full-moon in the month of Kārttika when six hundred thirtytwo Śaka years had elapsed and the fourteenth year of his ever growing victorious reign was current.

[The grant is followed by three of the imprecatory verses in this regard attributed to Bhagavān Vyāsa Vēdavyāsa Vyāsa of Vēda.]

This charter was written by *mahāsāndhivigrahika*

Niravadya-Punyavallabha.

Notes

1. Karahāṭa-nagara has been identified with eiher Koregaon or Karva about 6 and 4 miles respectively from Karāḍ (*cf.* note 1 under Rāyagad plate of this king dealt with above).

2. The original editor was inclined to identify Karve or Koregaon 4 or 6 miles from Karāḍ. (*EI*, XXVI, p.323). He was not in favour of identifying it with the modern Karva, four miles from Karāḍ. But Ramesh, K.V.., has identified it with the modern Karva (Aurangabad District) (*op.cit.*, p.143).

3. Āmbra (Āmra)-paṭṭikā is the reading of N.L.Rao (*EI*, XXVI. p.326 n.1). This must have been a mango grove.

4. The donee's name was read as Bhānudēva by the original editor but N.L.Rao doubted if it could be read as Nāgulla (*Ibid.*, p.325, n.4) Ramesh has adopted the reading of N.L.Rao (*op.cit*, p.143) But on the facsimile it is seen that there are at least two if not three letters after *nu* or *gu* before *śarmmaṇe* but they are not capable of being read with any definiteness.

5. This Vikramāditya, though referred to here without any titles, has been identified with the king's son, the second of that name in the Chālukyan family (Ramesh, K.V., *op.cit.*, p.143.)

* * *

No. 23

KONDEDDA GRANT OF DHARMARAJA

Location : Chōḍavaram,[1]. Godavari District
Andhra Pradesh
Date : C.710 A.D.[2]
Script : Early Nāgarī
Language : Sanskrit
King : Śrī-Dharmarāja
Dynasty : Śailōdbhava
Reference : Gupte, Y.R., *EI*, XIX, pp.265-271

Text

Metre: Vv.4, 13,16,19-21 *Anuṣṭubh* ; 1, 3, 11, 14, 18 *Śārdūlavikrīḍita* 2, 5, 6, 8, 12, *Vasantatilakā* 7, *Upajāti* 9, 10, 15, *Sragdharā*

ॐ स्वस्ति ॥

इन्दोर्द्धौतमृणालतन्तुभिरिव श्लिष्टाः करैः कोमलै

र्बद्धाहेररुणोत्स्फुरत्फणिमणेर्द्दिग्धाः प्रभासांशुभिः ।

पार्वत्या सकचग्रहव्यतिकरव्यावृत्तबन्धश्लथा

गङ्गान्भःप्लुतिभिन्नभस्मकणिकाः शम्भोर्जटाः पान्तु वः ॥ १ ॥

प्रांशुर्महेभकरपीवरचारुबाहुः

कृष्णाश्मसञ्चयविभेदविशालवक्षाः ।

राजीवकोमलदलायतलोचनान्तः

ख्यातः कलिङ्गजनतासु पुलिन्दसेनः ॥ २ ॥

तेनेत्थं गुणिनापि सत्वमहता नेष्टं भुवो मण्डलं

शक्तो यः परिपालनाय जगतः को नाम स स्यादिति ।

प्रत्यादिष्टविभूत्सवेन भगवानाराधितः शाश्वत
स्तच्चित्तानुगुणं विधित्सुरदिशद्वाञ्छां स्वयंभूरपि ॥ ३ ॥
स शिलाशकलोद्भिदे तेनाप्यालोक्य धीमता ।
परिकल्पितसद्वंशः प्रभुः शैलोद्भवः कृतः ॥ ४ ॥
शैलोद्भवस्य कुलजो रणभीत आसी
द्येनासकृत्कृतभियां द्विषदङ्गनानां ।
ज्योत्स्नाप्रबोधसमये स्वधियैव सार्ध
माकम्पितो नयनपक्ष्मजलेषु चन्द्रः ॥ ५ ॥
तस्याभवद्विबुधपालसमस्य सूनुः
श्रीसैन्यभीत इति भूमिपतिर्ग्गरीयान् ।
यं प्राप्य नैकशतनागघटाविघट्ट
लब्धप्रसादविजयं मुमुदे धरित्री ॥ ६ ॥
तस्यापि वंशेथ यतार्थनामा
जातो यशोभीत इति क्षितीशः ।
येन प्ररूढोपि शुभैश्चरित्रै
र्मृष्टः कलङ्कः कलिदर्पणस्य ॥ ७ ॥
जातोथ तस्य तनयः सुकृती समस्त
सीमन्तिनीनयनषट्पदपुण्डरीकः ।
श्रीसैन्यभीत इति भूमिपतिर्म्महेभ
कुम्भस्थलीदलनदुर्ल्ललितासिधारः ॥ ८ ॥

कालेयैर्भूतधात्रीपतिभिरुपचितानेकपापावतारै
र्नीता येषां कथापि प्रलयमभिमता कीर्त्तिपालैरजस्रं ।
यज्ञैस्तैरश्वमेधप्रभृतिभिरमरालम्भितास्तृप्तिमुर्व्वी
मुद्दृप्तारातिपक्षक्षयकृतिपटुना श्रीनिवासेन येन ॥ ९॥
तस्योत्खाताखिलारेर्मरुदिव जननोद्भास्वदुष्णांशुतेजाः
शूरो मानी दयालुर्नरपतिरयशोभीतदेवस्तनूजः ।
मातङ्गान्योतितुङ्गान्बहलमदमुचश्चारुवक्रान् प्रचण्डान्
बध्वा कर्षत्यकिन्नः पुनरपि तयते यत्नतः सप्रगल्भः ॥ १० ॥
केचिच्छैलगुहोदरेषु नियता धूमावलीपायिनः
अन्ये वायुफलाम्बुभक्षनिरताः केचिन्निराहारकाः ।
इत्थं योगजुषो विहाय वसतिं ध्यायन्ति दिव्यं पदं
चित्रन्मत्रं मध्यमराजदेवगुणधृद्राज्येपि तत्प्राप्तवान् ॥ ११ ॥
तस्याभवत्सकलशास्त्रविशेषवेदी
श्रीधर्म्मराज इति सूनुरधीतशास्त्रः ।
तस्यातिनिर्मलयशः परिवर्द्धमानं
पादा हरेरिव नमाश्श्रितमात्त्रिलोक्याः ॥ १२ ॥
निराश्रयैः प्रयत्नेन गुणैः स परिवारितः ।
वैमुख्यादीर्षया चैव सर्व्वदोषैर्व्विवर्जितः ॥ १३ ॥
काले हन्ति रिपून्महारणशतव्यापारलब्धोन्नतीन्
काले भक्तिमुपैति शुभ्रचरितैः शम्भोः कथाविस्तरैः ।

काले धर्म्मविवेचनाय निरतो ब्राह्मण्यमध्ये स्थितः
क्रौञ्चारेरिव यस्य चेष्टितमलं लोकैः समालोक्यते ॥ १४ ॥
राज्यं लब्ध्वावदर्प्पाद्विगणिततया माधवो ज्येष्ठभावान्
देशादस्मादपास्तुं कृतविषममतिर्व्विग्रहे फासिकायां ।
युद्धे क्षोभेण भग्नो नृपतिवरमसौ संश्रितः स्त्रीवराख्यं
पश्चात्तेनापि सार्द्धं पुनरपि विजितो विन्ध्यपादेषु जीर्ण्णः ॥ १५ ॥
शौर्यं श्रीर्यौ वनं राज्यमेकैकं मदकारकं ।
सर्व्वं श्रीमानभीतस्य निर्व्विकारमुपस्थितम् ॥ १६ ॥
तुरगखुराभिघातविदलद्धरणीतलजं
जयगजकर्ण्णचामरविधूननविस्फुरितं ।
सुभटफरप्रसर्प्पणनिरुद्धककुम्भगगनं
बलरज एव यस्य जयति द्विषतां ध्वजिनीं ॥ १७ ॥
आरच्य प्रसभं घटागजगणैरश्वोयपादातकैः
जित्वान्यान्बलशालिनो नृपवरानागत्य दृष्टेर्भुवं ।
युद्धे भीमपराक्रमेण विजिता निर्वृत्पदं प्रापिताः
दृश्यन्ते भवनाङ्गणे प्रतिदिनं प्रातः प्रणामार्थिनः ॥ १८ ॥

विजयसौम्यपुरवासकाच्छ्रीशैलोद्भवकुलतिलको महामखवाजपेयाश्वमेधावभृथस्नाननिर्व्वर्त्तितसूनोस्तनयो बहुविधमत्तवारणवरतुरगपदातिशस्त्रसंपातसंकुलो बह्वाहवविनिहतशत्रुरनेकविक्क्रमाक्क्रान्तसकलभूमण्डलप्रथितयशाश्चातुर्द्दन्तिः संग्रामादसकृल्लब्धप्रतापः परममाहेश्वरो मातापितृ

पादानुध्यातः श्रीधर्म्मराजदेवः कुशली ॥ अस्मिन् कोङ्गोदमण्डले श्रीसामन्तमहासामन्तमहाराजराजानकराजपुत्रान्तरङ्गदाण्डनायकदाण्डपाशिकोपरिकांस्तद्विनियुक्तकव्यवहारिणः सकरणानन्यांश्च ब्राह्मणपुरोगादिवैषयिकजनपदान्यथार्हं पूजयति मानयत्याज्ञापयति च विदितमस्तु भवतां खिड्डिङ्गाहारविषयसम्बद्धकोण्डेड्डेग्रामाद्धोंयं अकरीकृत्य कुशिकसगोत्राय वाजसनेयचरणाय औदलवत्देवरातविश्वामित्रप्रवराय अग्निहोत्रे भट्टगोणदेवस्वामिने मातापित्रोरात्मनश्च पुण्याभिवृद्धये सलिलधारापुरस्सरेणाचन्द्रार्ककालमुपभुञ्जानस्य धर्म्मगौरवान्न केनचिद्विघाते वर्त्तितव्यमिति ॥ उक्तञ्च धर्म्मशास्त्रे ।

बहुभिर्व्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ १९ ॥

स्वदत्तां परदत्तां वा यो हरेत वसुन्धरां ।
स्वविष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते ॥ २० ॥

माभूदफलशङ्का वः परदत्तेति पार्थिवाः ।
स्वदानात्फलमानन्त्यं परदत्तानुपालनं ॥ २१ ॥

दूतकोत्राधिकृतचरम्पदेवो लिखितं सु . . दामोदरेण लाञ्छितं । टापल . . उत्कीर्ण्णं . . स्थविरावृद्धेनेति . . सम्वत् ३० वैशाख शु ८ ॥

Summary

The introduction upto verse 18 of this charter is a copy of the text (with slight variations, of the Bāṇpur Plates of srī-Dharmarāja dealt with in No.23 above.

It continues:

From the residence at the victorious Saumyapura, that srī-Dharmmarājadēva, who meditated at the feet of his parents,who is a great devotee of (God) Mahēśvara, the fore-headmark of the dynasty of srī-Śailōdbhava, the son's son of one who had got purified by bathing in the waters (*avabhṛitha*) at the conclusion of the great sacrifices, vājapēya, aśvamēdha etc., who had an army of intoxicated elephants, horses, and footmen and such great weapons, who had the fame of having conquered the whole earth in many battles, who obtained the fame of having achieved victories in many battles is well and befittingly honours and orders the *śrī-sāmanta*, *mahāsāmanta*, *mahārāja*, *rājānaka*, *rājaputra*, *antaraṅga*, *dāṇḍanāyaka*, *dāṇḍapāśika*, *uparikas*, the executives appointed by them as well as the secretaries and the residents of the *janapada* as headed by the *brāhmaṇas*, in this Kongōdamaṇḍala thus :[4] Let it be known to you, that half of the village, Koṇḍeḍḍe[5] included in Khiḍḍing-āhāra-vishaya,[6] after making it tax-free[7] [was granted] with due oblation of water to Bhaṭṭa-Gōṇadēvasvāmin of Kusika-gōtra, with the *pravara*, Audalavat,[8] Dēvarāta, Viśvāmitra, belonging to Vājasanēya-charaṇa (white Yajurvēda) for the religious merit of his parents.

While the donee enjoys the grant till the Sun and Moon last, he should not be hindered. [This is followed by three of the usual imprecatory verses said to be quotations from *Dharmmasāstra*.]

Here the *dūtaka* was Charampadēva the authorized official (adhikṛita).[9] It was written by Dāmōdara, sealed by *pētāpalaka* and inscribed by Āvṛiddha.

[Saṁvat 10 Vaiśākha śu.8][10]

Notes

1. Guptē, Y.R. has stated that "The existence of the copper-plate on which this grant is incised was brought to notice by the late Mr. T. C. Rath, B. A., when he was the District Munsif at Chōḍavāram in the

Gōdavari District." (*EI* , XIX, p.265). These plates are stated to have had a ring with a seal, which is stated to have figures cut in relief of a "crescent at the top and a seated bull in the centre and a line of letter at the bottom which is completely damaged.' (*ibid.*)

2. The original editor (Gupte) might have been able to read the date on the last plate of the grant, but on the facsimile supplied, no date is readable. Hence the approximate date, as above, has been given. Even, as it is, there is no information on the period of reign of the king of this record. Also see note No.2 under the Bāṇpur Plates of Dharmmarāja-Māṇabhīta dealt with above.

3. See note 4 under the Bāṇpur Plates of Dharmmarāja-Mānabhīta dealt with above.

4. Koṅgōda has been identified to be a village in the modern district of Gañjam (in Orissa) (*EI*, VI, p.137).

5. The village Koṇḍeḍḍe has been identified as in Kiddinga-hara Disrict.

6. The name Kiḍḍingāhāra-vishaya. It is likely the *vishaya* of Kiḍḍiṅga an *āhāra* (i.e.) a revenue district (?). Kiddinga also has not been identified but some inscriptions of the Bhañjas of Orissa refer to Kijjiṅga-koṭṭa.

7. It is noteworthy that without elaboration, the grant is stated to have been made, without taxes (*a-karī-kṛitya*)

8. It is noteworthy that the writer of the record started with Audalavat and has stated the *pravara* in reverse order as it is given for *Adhvaryyus*,. though in the case of Dēvarāta and Visvāmitra, *vat* was not added to the names (See Brough, John, *op.cit.*, 49-50, pp.150-51). These Kusika gotrins are referred to as Kausika (*ibid.*, pp.150-151).

9. Charampa-dēva must have been a high-ranking official (as indicated by his title *adhikṛita* – authorized) (to have been) eligible to officiate as the *dūtaka* for the grant.

10. As in the case of Bāṇpur plates, the outside of the last plate of this charter is also very much worn out. What has been written is only from conjecture.

* * * *

No.24

PENUKAPARU GRANT OF JAYASIMHA (II)

Location : Madras (Chennai)[1], Tamilnadu
Date : C.710 A.D.[2]
Script : Early Kannaḍa
Language : Sanskṛit
King : Jayasiṁha II
Dynasty : Eastern Chālukya
Reference Hultzsch, E., *EI,* XVIII, pp.313-316.

Text

Metre: Vv.1-4; *Anushṭubh*

स्वस्ति ॥ श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां सप्तलोकमातृभिः परिपालितानां स्वामिमहासेनपादभक्तानां भगवन्नारायणप्रसादसमासादितवरवराहलांछनेक्षणक्षणवशीकृताशेषशत्रुमण्डलानाम्मश्वमेधावभृथस्नानपवित्रीकृतवपुषां चळिक्यानां कुलमलंकरिष्णोः श्रीविष्णुवर्द्धनमहाराजस्य पौत्रः श्रीसर्व्वलोकाश्रयमहाराजस्य पुत्रः स्वासिधारानमितराजन्यमकुटतटघट्टितमणिमयूख पुञ्जमञ्जरीरञ्जितचरणयुगलः प्रतापवान्प्रसन्नविनिवेशितशक्तित्रयः परमब्राह्मण्यो मातापितृपादानुध्यातः सकललोकाश्रयश्रीजयसिंहवल्लभमहाराजः सर्व्वानित्थमाज्ञापयति ॥ विदितमस्तु वोस्माभिः ॥ वंगिपरुवास्तव्याय कौण्डिन्यगोत्राय तैत्तिरीयायापस्तम्बसूत्राय गुंजदेवशर्म्मणः पौत्राय सर्व्वक्रतुयाजिनो देवशर्म्मणः पुत्राय चतुर्व्वेदपारगाय सर्व्वशास्त्रविशारदाय श्रीएरद्रोणशर्म्मणे । कर्म्मराष्ट्रविषयनिवासिकुटुम्बिनः भवद्विषये सर्व्वानित्थमाज्ञापयति ॥ ज्यैष्ठ्यां पौर्ण्णमास्यां संक्रान्तिकाले भूमिदाननिमित्ते गोब्बडि

विज्ञापनात्कर्म्मराष्ट्रे पेणुकपरुनामग्रामे तस्य ग्रामस्योत्तरपूर्व्वस्यान्दिशि क्षेत्रन्दत्तमस्य क्षेत्रस्य पूर्व्वतोवधिः निड्डुगट्टतटाकः। दक्षिणतोवधिः पूसबोळक्षेत्रान्तः। पश्चिमतोवधिः देगो . . . . . नकु पोवु पन्थाः। उत्तर तोवधिः मषखावधिः। तोंधक्षेत्रं ग्रामस्यो . . . तस्तटाकः तस्योत्तरा परस्यान्दिशि। तस्य पूर्व्वतोवधिः कूपः। दक्षिणतोवधिः तटाकः। पश्चिमत उत्तरतश्च जेड्डबोळक्षेत्रान्तोवधिः। अस्य क्षेत्रस्य कूपद्वयम्। तटाक एकः कूपः। तालतटाकस्य पूर्व्वतः दक्षिणार्द्धे व्रीहिक्षेत्रं चतुष्टय परिमाणम् प्रागपवर्ग्गं च। ग्रामस्योत्तरपूर्व्वदेशे गिर्यवकाशं एतच्चतुरव धिपर्य्यन्तं क्षेत्रन्धर्म्मयशोभिवृद्धये सर्व्वकरपरिहारोपेतमुदक पूर्व्वकं ब्रह्मदेयीकृत्य प्रादाम्॥ अस्य सर्व्वकरपरिहारो पेतस्य क्षेत्रस्य यो बाधां करोति स वारणाश्याम् सहस्त्रब्रह्महत्या पातकसंयुक्तो भवति योस्मच्छा सनमतिक्रामेत्स पापः शारीरन्दण्डमर्हति सोपि पंचमहापातक संयुक्तो भवति॥ भवति चात्र श्लोकाः॥

भूमिदानात्परन्दानन्न भूतन्न भविष्यति।
तस्यैव हरणात्पापन्न भूतन्न भविष्यति॥ १॥
स्वदत्ताम्परदत्तां वा यो हरेत वसुन्धराम्।
षष्टिंवर्षसहस्त्राणि विष्ठायां जायते क्रिमिः॥ २॥
बहुभिर्व्वसुधा दत्ता बहुभिश्चानुपालिता।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ ३॥

आज्ञप्तिर्न्निरवद्यसकललोकाश्रयश्रीपृथिवीगामुण्डी॥

विन्ध्याटवीष्वतोयासु सुष्ककोटरवासिनः ।
कृष्णाहयो हि जायन्ते ब्रह्मदेयापहारकाः ॥ ४ ॥

Translation

[The beginning of this charter of the introducing is the family of Chāḷukyas which corresponds with the identical portion in other Chāḷukyan charters.]

In that family of the Chāḷikyas, Vishṇuvarddhana-mahārāja was there as an ornament of the family. His son was Sarvva-lōkaśraya-mahārāja[3]. His son was Sakala-lōkāśraya-śrī-Jayasiṁha-vallabha-mahārāja, whose feet were washed red by the rays emanating from the gems in the crowns of warrior-rulers subdued by him who was valiant and who had been resorted to by the three potencies,[4] who was pious and attentive to the Brāhmaṇas and meditated on the feet of his parents, ordered all as follows:

Let it be known to you, that all the householders resident in Karmma-rāshṭra-*vishaya* are ordered thus:[4] By us, in your *vishaya* in the village Peṇukapar̤u[6], in the north-eastern direction of that village, the field[7] as bounded by Niḍugaṭṭa-taṭāka on the east, the limit of the field of Pūsa-Bōla[8] on the south the pathway going[9] to dego . . . . on the west, the boundary of Mashakha on the north, had been granted, as a land-grant ordained[10] in view of the occasion of equinox on the day of the full moon in the month Jyēshṭha on the supplication of Gobbaḍi.[11] [Tōndha] garden land[12] [was attached], also a tank in the north-western direction, for that[13] the eastern boundary was the well, the southern boundary the tank, on the west and north the boundary was the limit of the field of Jeḍḍa-Bōḷa[8]. For this field there were the two wells, a tank and one well;[14] to the east of the Tāla-taṭāka there was in the southern half, paddy-field of the extent of four (units?) ending in the east;[15] In the north-east of the village. (The aforesaid (field lies) between hills.[16]

Thus these fields were delimited, and had been given, with due oblation of water with entitlement to exemption from all taxes and after making them *brahmadēya*, for the increae in *dharma* and fame, to

Er̤a-Drōṇa-śarmman, who was a master of all the four *Vēdas* and was a scholar in all *śastras*, son of Dēva-śarmman, who had performed all kinds of sacrifices, and grandson of Guṁja-dēva-śarmman, who belonged to Kauṃḍinya-gōtra and Taittirīya-Āpartamba-sūtra, who hailed from Vaṁgipar̤u[17]

Whoever disturbed (the status of) this field[17] which was enjoying exemptions from all taxes, he would incur the sin of killing thousand Brāhmaṇas in Vārāṇaśī. (Further) whoever violated my charter the sinner will merit corporal punishment and further will incur the (oppribrium of having committed the) five great sins.

[As an epilogue there are four of the imprecatory verses which here are not ascribed.]

The (nominated/executor) *ājñapti* was *Niravadya, Sakalalōkāśraya* śrī-Pṛithvī-gāmuṇḍi[18].

Notes

1. The place where the copper plates were found is not ascertainable nor is there any information on where this set of copper-plates is lodged (now Chennai). The residence of the gentleman who brought the plates is not known.

2. This date has been allotted to this undated charter on historical grounds.

3. *Sarvvalōkāśraya* was the title of Maṅgi-yuvarāja (*cf.* Venkata-ramanayya, *op.cit.*, pp.69-70).

4. The three potencies are *prabhtra-śakti* (person of pre-eminence) *mantra-śakti* (good conscience) and *utsāha-śakti* (energy)

5. Karma-rāshṭra of olden days comprised the area covered by the modern taluks of Bapatla, Ongole and Narasaraopet in Guntur District

(Ramachandra Murthy, S.S., A Study of Telugu Place-Names, p.76). See note 5 below.

6. Peṇukapaṟu has not been identified. It may be mentioned that a village also named Peṇukapaṟu is stated to have been situated in Gudrahāra-vishaya in the Pedda-Maddāḷi plates of Jayasiṁha dealt with above. It is debatable if there were two villages of the same name very near each other or if there was some confusion in the mind of the drafter of the record regarding the *vishaya* concerned.

7. Vaṁgipaṟu has been identified with Vaṅgīpuram in Bapatla taluk of Guntur District (*ibid.*, p.72, n.15).

8. *Bōḷa* seems to hae been a surname, indicative of the status of the person concerned. It might have been related to *bōya*, a colloquial form of the word *bhōja* or *bhōjaka* one who is in enjoyment of the concerned territory

9. The introduction of this Dravidian word is *pōvu.*

10. *Bhūmi-dāna-nimitte* might have referred just to the restoration of the king to make a land-grant or to the ordained duty to make such a grant on the special juncture (i.e.) the equinoxial occasion.

11. Gobbaḍi might have been the governor of the locality or any other royal dignitary. Hultzsch thought that it might have been the name of the executor of the grant (*ājñapti*) mentioned at the end of the record (*op.cit.*, p.314).

12. What has been read as [*tō*]*ṁdha-kshēttram* can be read as *tōṭa-kshētram*, site for a garden, which is often additionally granted along with arable land. However as the continuation is indistinct and puzzling nothing definite can be stated.

13. From the sequence of the text, it may appear that the continuation is the definition of the boundaries of the tank mentioned just before but actually the context seems to have been the delimitation of another plot of land granted. It may be seen that after mentioning the boundaries, there is reference to "for that plot (*kshētram*)

14. *Kahētram* means generally a field. As the extent of the *kahētram* is not specified, it has to be understood either that the word referred to a definite measured area of land in the local context.

15. The statement here again indicates that *kshētram* which was a defined unit of land extent. The phrase, *prāg-apavarggam*, if taken to mean ending in the east, it does not make sense. However the significane of the phrase in the context is not intelligible. This phrase is stated to occur in the *Āpastamba-Dharma-sūtram*, II, 2, 3, 33 (*EI*, XVIII, p.314 n.7) where it means "with its end to the east" (MW,

SED, p.704 col.1)". However, if *prāga* is understood as "already" and *apavarga* as "donation"(ibid., p.52 col.2), the employment of the phrase here might have been to signify "the exception of such plots already granted".

16. *Girāvakāśam*, amended as *giry-avaka-śam* might have meant a privilege to exploit the forest produce.

17. It does not appear necessary to amend *kshētrān* to *kshētrañ* (*cf. EI,* XVIII, p.316 n.3). Actually the mentioin of *kshētrasya* further on seems to require emendation to *kshētrayōḥ*..

18. These titles of *Pṛithvī-gāmuṇḍī*, are reflective of those of the king, his overlord (*ibid*., p.314).

* * *

No. 25

ANJANERI PLATES OF BHOGASAKTI

Location : Añjanēri, Nasik Taluk, Nasik District; Maharashtra

Date : [Kalachuri] 461=710-11 A.D.[1]

Script : Early Kannaḍa

Language : Sanskrit

King : Bhōgaśakti

Dynasty : Sēndraka, (Hariśchanda clan)

Reference : 1) Vats, Madho Sarup and Diskalkar D.B., *EI,* XXV, pp.225-236;
2) Mirashi, V.V., *CII,* IV, pp.146-154

Text

Metres : Vv. 1-5; *Anushṭubh*

ओं । जयत्याविष्कृतं विष्णोर्वाराहं क्षोभितार्ण्णवं ।

दक्षिणोन्नतदंष्ट्राग्रविश्रान्तभुवनं वपुः ॥ १ ॥

श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां सप्तलोकमातृभिः सप्त

मातृभिरभिवर्द्धितानां कार्त्तिकेयपरिरक्षणप्राप्तकल्याणपरंपराणां भगवन्ना
रायणप्रसादसमासादितवराहलाञ्छनेक्षणक्षणवशीकृताशेषमहीभृतां हारी
तीपुत्राणां चलुक्यानामन्वये सकलमहीमण्डलैकतिलको महाराजाधि
राजपरमेश्वरः श्रीविक्क्रमादित्यवल्लभस्तत्पादप्रसादोपजीवी स्वपुत्र
निर्व्विशेषो हरिश्चन्द्रवङ्शस्यालंकारभूतश्शरदुपगमप्रसन्नमण्डलश्चन्द्रमा
इव प्रजानामानन्दकारी श्रीस्वामिचन्द्रो नाम राजा येनेदं चतुर्दशग्राम
सहस्रसंख्यं सकलमपि पुरीकोङ्कणं भुक्तमासीत्। तस्य च राज्ञः
श्रीस्वामिचन्द्रस्य पुत्त्रो महाबलपराक्रमः श्रीसिंहवर्म्मराजस्तस्यापि
श्रीसिंहवर्म्मराजस्य पुत्रः चतुरुदधिजलतरंगालिङ्गितायां पृथिव्यां चन्द्र
इव विख्याततेजाः पृथिवीचन्द्रापरनामधेयो राजाश्रीभोगशक्तिन्मार्य्योंसौ
बाल एव पूर्व्वजन्माभ्यासेन स्वयं समुत्पन्नज्ञानो भगवतो वासुदेवस्या
र्च्चनविधिं प्रति सततमभियुक्तो ब्रह्मण्यश्च युधिष्ठिर इव नयविनयदयादान
दाक्षिण्यादिभिर्ग्गुणैरलंकृतः सत्यवादी च भीमसेन इव प्रकटपराक्रमा
क्क्रांताशेषस्वराज्यभूमिमण्डलो महाबलश्च अर्जुन इव जनार्द्दनज्ञानोप
देशानुवर्त्ती समरविधिविशारदश्च बलदेव इव नृत्तगीत हसितविलसित
क्रीडासुखोपभोगतत्परः क्षणं विक्क्रांतश्च प्रद्युम्न इव सकलयुवतिजन
मनोहरं वपुर्द्धारयन्नपि परकलत्रनिस्पृहः वनवारणयूथाधिपतिरिव सतत
मभिप्रवृत्तदानार्द्रीकृतकरः पद्मोत्पलकुमुदषण्ड मण्डितः स्वादूदको
जलाशय इव प्राणिनां तृष्णाविच्छेदकारी उदितदिव सकरकिरणप्रबोधितो
महापद्माकर इव श्रियां निवासभवनं जलधिरिव रक्षितास्थितिरनेक भूभृ

त्पालनपरः परमगम्भीरो महासत्त्वश्च सततमेव देवकुलतटाकसत्त्र प्रपा धर्म्मक्रियानुष्ठानव्यसनी नारायणानुस्मरणतत्परश्च कौस्तुभमणिरिव विष्णोः पुरीकोङ्कणविषयस्यालंकारभूतो भारतपुराणरामायणराजशास्त्रार्थ तत्त्वनिपुणः प्राज्ञः पटुः पण्डितो मेधावीव्यप्रतिहतबलपराक्क्रमोत्साह मन्त्रप्रभुशक्तिस्त्रिभुवनाङ्कुशो राजाश्रीभोगशक्तिः सव्र्वानेवात्मीयपुत्रपौत्र प्रपौत्त्रादीन् स्वभुजबलपराक्क्रमाधिष्ठितान् गोपराष्ट्रपूर्व्वत्रिकूटाम्रराजी मैरिकामहागिरिहारद्वयपल्लुसूढाम्भकविषयान् प्रेतह्रदामर्य्यादान् सव्र्वान् समाज्ञापयति अस्तु वो विदितं यथा सृष्टिस्थितिसंहारकारणं देवातिदेवं सुरासुरगुरुं भगवंतं वासुदेवं मुक्त्वा नान्या विशिष्टदेवतास्तीति मत्वा जयपुरे भोगेश्वरप्रतिष्ठिताय पुराण पुरुषाय परमात्मने भगवते नारायणाय गन्धपुष्पधूपदीपसम्मार्ज्जनोपलेपनक्क्रियार्थं नृत्तगीतवाद्योपेतसंगीतकार्थं सत्त्रार्थं खण्डस्फुटितसंस्कारार्थं च। मातापित्रोरात्मनश्च पुण्यवृद्धये अष्टौ ग्रामा आदानानि च प्रति पादितानि तेषान्नामानि जयग्रामः अम्बे अवङ्गणं। पालित्तपाटकः कोकिलाक्षकं कलहकः मुद्रग्राहिकः क्षेमगिरकः आन्नग्रामश्च। आदानानि। आपणेषु आवाराः करणे कोवेरं। सार्थ वहित्त्रेषु प्रवेशे निर्ग्गमे च प्रत्येकं रूपकः देवस्य यात्रोत्सवे दातव्यं। गोपराष्ट्राम्रराजी मैरिकाविषयेषु ज्येष्ठिकाग्रामे मूटकः घृतसतिका च अनेनावतारेण इतरेष्वपि ग्रामेषु पूर्व्वत्त्रिकूटविषये कृष्णराजरूपकशतं १००। महागिरि हारे अपरे कृष्णराजरूपकशतद्वयं २०० पूर्व्वे शतं १०० पल्लूसूढाम्बविषये कृष्णराजरूपकाः पञ्चाशत् ५० ये चाष्टौ ग्रामास्ते

सर्व्वा दानविष्टिप्राति भेदिकापरिहीणाः अचाटभटप्रवेश्याः अभ्यन्तरसिद्धिकाः आचन्द्रार्क्कार्ण्णवक्षितिस्थितिसमकालीनाः यतस्तस्मादस्मद्वंश्यैः प्रबलपवनप्रेरितोदधि जलतरंगचंचलं जीवलोकमवलोक्य अयमस्मद्दायोनुमन्तव्यः पालयितव्यश्च। वणिग्भिः पंचभिर्द्दशभिरपि नगरधर्म्ममवलंब्य मार्ग्गशीर्षमासस्य पक्षमात्त्रं देवस्य विष्णोर्य्यात्रोत्सवस्सारयितव्यः। यो वाज्ञानतिमिरावृत मतिराच्छिन्द्यादाच्छिद्यमानं वानुमोदेत स पञ्चभिर्म्महापातकैस्संयुक्तः स्यात्। यदेतद्देवकुलं तद्वणिङ्नगराय निरूपितम्। तैश्च सर्व्वैर्ब्भगवतो देवस्य शुश्रूषा योगक्षेमश्च वोढव्यः। नगरस्य च स्थितिर्ल्लिख्यते। ये स्थानवासिनो वाणिजकास्तेषां शुल्कं जेमको वा कदाचिदपि नास्ति। य एतां स्थितिं भिनत्ति स पञ्चभिर्म्महापातकैः संयुक्तः स्यादिति।

षष्टिं वर्षसहस्राणि स्वर्ग्गे मोदति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥ २॥
पूर्व्वदत्तां द्विजातिभ्यो यत्नाद्रक्ष युधिष्ठिर।
महीं मतिमतां श्रेष्ठ दानाच्छ्रेयोनुपालनम्॥ ३॥
बहुभिर्व्वसुधा भुक्तता राजभिस्सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ ४॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः।
कृष्णाहयो हि जायन्ते भूमिदायं हरंति ये॥ ५॥

संवत्सरशतचतुष्टये एकषष्ट्यधिके ४०० ६० १ शासनं लिखितं

कल्लिवनवास्तव्येन भरतस्वामिना ॥

ओं स्वस्ति श्रीतेजवर्म्मराजेन जयपुरस्य दक्षिणस्यां दिशि पालित्त पाटको गोप्रचारो मुक्तः। तस्य च प्रमाणं चतुर्द्दिक्षु दुग्गादिवीसहिताः शैलिमा गावो स्थापिताः। सीमायाः तदेव प्रमाणं। तस्य गोप्रचार स्यार्त्थे भोगेश्वरदेवस्य भूमिनिष्क्रयार्त्थं जयपुरवणिङ्नगरस्य रूपक शतं दत्तं तस्य च रूपकशतस्य वृद्धिः गुग्गुलमूल्यं भोगेश्वरदेवस्य वर्षप्रतिवर्षं नगरेण यावदाचन्द्रार्क्कतारकं दातव्यं यो वास्यान्यथा करिष्यति स पञ्चभिर्म्महापातकैस्संयुक्तो भविष्यति ॥

Translation

[The introductory portion of this charter is indentical with the corresponding portion in the other Chāḷukyan charter. However, after describing the credentials of the family of the Chālukyas, immediately there is the mention of *mahārājādhirāja-paramēśvara* śrī-Vikramāditya[2], the ornament of the whole expanse of the earth, is made].

Living by the grace of feet[3] of Vikrāmāditya there was the ruler named śrī-Svāmichandra, who was unto him (Vikramāditya) (almost) his son. He was (further) an ornament of the dynasty of Hariśchandra,[3] who gladdened the hearts of the subjects even like the pleasant orb of the moon (seen) on the onset of the autumnal season, with whom the whole of this Purī-Koṅkaṇam[4] (including in it 14,000 villages) was in enjoyment.

This Svāmichandra's son is śrī-Siṁhavarmma-rāja who has great might and prowess.

That Siṁhavarmmarāja's son is śrī-Bhōgaśakti who has an alternate name, Pṛithivīchandra. His glory is well-known on this earth encompassed by the waves of the four oceans, who even from childhood, has been displaying inborn wisdom (as if) it had been inherited from his previous births, who is constantly engaged in the several modes of worshipping the revered Vāsudēva, who is quite pious, who, like Yudhishṭhira, is endowed with the (great) qualities, of tact, modesty, kindness, charity, compassion etc. and is a speaker of truth, and at the same time had been keeping the entire earth under the rulership and control through his manifest prowess and is very strong, who, like Arjuna adheres to the wise teachings of Janārddana and (like him) is also an expert in the art of warefare.[5] He is like Baladēva, who is always engrossed in dances, music, comedies (laughter), entertainment and games but he is also capable of becoming an aggressive warrior in an instant (if the exigency demanded).[6] He is like Pradyumna, who possesses a visage capable of enticing the minds of all youthful damsels, who is however, one who has no designs on others' wives.[7] He is like the leader of the herd of wild elephants, (whose trunk is constantly dripping with the ichor flowing down from the temples), has his hand dripping constantly with the water (used in libation) from the continuous acts of making gifts, who like the tank of delectable water adorns with the cluster of full blown lotuses and quenches the thirst of all creatures (fulfils their wants).[8] He is like the great cluster of lotus-flowers who excites the rays of the one who makes the day (Sun) on rising. He is the abode of Śrī (wealth and prosperity).[9] He is like the ocean by maintaining stability (of the earth) and is active in affording protection to the many kings (mountain-*bhūbhṛit*).[10] He is very imposing, deep and solemn. He also has great virtues (the abode of huge creatures),[11] by his constantly engaged in charitable acts like establishing temples, tanks, rest houses, water-points and such beneficial institutions. He is forever absorbed in meditating on

(God) Nārāyaṇa. He is the gem Kaustubha which adorns (the person of) (God) Vishṇu. He is an ornament of the Purī-Kōṅkaṇa-vishaya, and he has an expert knowledge of the meaning and essence of *Bhārata* (*Mahābhārata*), *purāṇas*, *Rāmāyaṇa* and political science. He is well-informed, very smart, learned and has great attainments to his credit. He has unassailable strength and possesses the three potent powers of royal authority viz.*prabhutva* (pre-eminence) of *mantra-śakti* (good counsel) and *utsāha-śakti* (energy).

That ruler Bhōgaśakti with the alternate name, Pṛithivīchandra, commands his own sons, grandsons, and great-grandsons and all the arbiters/controllers of Gōparāshṭra, eastern Trikūṭa, Āmrārājī, Mairikā, the two Mahāgirihāras, Pallusūḍhāmbaka and such territories upto the limit of Prētahrada,[12] which have been conquered by the strength of his own arms and subdued.

May it be known to you thus

For the worshipful of Bhagavān Vāsudēva, who is the elder of both celestials and non-celestials, and he is the God of Gods, the Primordial Being and Omnipotent Spirit, has been installed and consecrated in Bhōgēśvaam (the temple established by Bhōga)[13] in Jayapura,[14] on realization that there is no other God transcending the revered Vāsudēva.

For the provision of perfumes, flowers, incense, ceremonial lamps, anointment and unguents, for providing vocal and instrumental music and dances, for instituting a charity-house and for the carrying out of repairs (of that temple) with a view to gain and augment religious merit for my parents and for my own self

The following eight villages along with (entitlement to) levies have been gifted. The names of those villages are: Jayagrāma, Ambē-avaṅgaṇam, Pālittapāṭaka, Kōkilākshakam, Kalahaka, Mudgrāhitaka, Kshēmagiraka and Ānnagrāma,[15]

The levies (referred to) are :

तुरङ्गमनिकरभङ्गभासुरो द्रुतदलितद्विरदकुम्भस्थलगलितमुक्ताफलनिकर दन्तुरासिलतामरीचिनिचयमेचकितदक्षिणबाहुशिखरः पद्माकर इव प्रकटा नेकलक्षणो न पुनर्ज्जलाशयः क्षपाकर इव सकलकलाकलापान्वितो न पुनर्द्दोषाकरः सागर इवान्तःप्रवेशितविपक्षभूभृद्मण्डलो न पुनर्ग्राहाकुलः नारायण इव सुदर्शन चक्रक्षपितविपक्षो न पुनः कृष्णस्वभावः हर इवाङ्गीकृतभूतिनिचयो न पुनर्भुजङ्गपरिवृतः।

बालेन्दुबिम्बप्रतिमेन येन
प्रवर्द्धमानस्वतनूदयेन।
प्रणामकामोल्पकरेण लोकः
कृताञ्जलिः कान्तिमतां कृतोयम्॥ १॥

असिधाराजलेनशमितः प्रसभं वलभीपतेः पुरे येन।

जनसंतापकलापदताज्जिकानलो जयभट जलद एषः ॥ २ ॥

स विगीयते देववधूकदम्बकैर्नृपशतमकुटरत्नकिकरणावलिरंजितपाद
पङ्कजः समधिगतपञ्चमहाशब्दो महासामन्ताधिपतिश्रीजयभटः कुशली
सर्व्वानिव राजसामन्तभोगिकविषयपतिराष्ट्रग्राममहत्तराधिकारिकादीन्स
मनुदर्शयत्यस्तु वस्संविदितम्। यथा मया मातापित्रोरात्मनश्चैहिका
मुष्मिकपुण्य यशोभिद्धये केमज्जुग्रामनिविष्टाश्रमदेवपादेभ्यः गन्धधूपपुष्प
दीपप्रसदांत संगीतकसत्त्रप्रवर्तनसन्मार्जनोदयेन देवकुलस्य खण्ड
स्फुटितविशीर्ण्ण संस्कारनवकर्म्मोक्ताद्युत्सर्प्पणार्थं श्रीभरुकच्छविविष
यान्तर्ग्गतकेमज्जुग्रामे ग्रामस्यदक्षिणसीम्नि पञ्चाशन्निवर्त्तनप्रमाणो
भूखण्डः यस्याघाटनानि पूर्व्वतः छीरकहग्रामगामिपन्था दक्षिणतः
जम्भाग्रामसीमासन्धिः अपरतः जम्भाग्रामात् गोलिअवलिग्रामगामी
पन्था उत्तरतः केमज्जु ग्रामात्सीहुग्रामगामीपन्था वटवापी च। एवं
चतुराघाटनोपलक्षितक्षेत्रं सोपरिकरं सभूतवातप्रत्ययं सधान्यहिरण्यादेयं
सदशापराधं सोत्पद्यमानविष्टिकं अचाटभटप्रावेश्यं सर्व्वराजकीयानाम
हस्तप्रक्षेपणीयं पूर्व्वापरदेवब्राह्मदायरहितं भूमिन्छिद्रन्यायेनाचन्द्रा
र्कार्ण्णवक्षितिसरित्पर्व्वतसमकालीनमद्याषाढशुद्ध दशम्यां कर्क्कटकराशौ
सन्क्रान्ते रवौ पुण्यतिथावुद कातिसर्ग्गेण देवदायत्वेन प्रतिपादितं।
यतोस्योचितया तपोवनाचार स्थित्या भुन्जतः कृषतः कर्षयतः
प्रतिदिशतो वा न कैश्चिद्व्यासेधे वर्त्तितव्यमागामि भद्रनृपतिभिः
अस्मद्वंश्यैरन्यैर्व्वायमस्मद्दायोनुमन्तव्यः पालयितव्यश्च ।

यश्चाज्ञानतिमिरपटलावृतमतिराच्छिन्द्यादाच्छिद्यमानकं भवानुमोदेत। स पञ्चभिर्म्महापातकैस्सोपपातकैः संयुक्तः स्यादित्युक्तं च। भगवता वेदव्यासेन व्यासेन।

षष्टिं वर्षसहस्राणि स्वर्ग्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमंता च तान्येव नरके वसेत्॥ ३॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः।
कृष्णाहयो हि जायन्ते भूमिदायं हरन्ति ये॥ ४॥
बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ ५॥
अग्नेरपत्यं प्रथमं सुवर्णं
भूर्वैष्णवी सूर्यसुताश्च गावः।
लोकत्रयं तेन भवेद्धिः दत्तं
यःकाञ्चनं गां च महीं च दद्यात्॥ ६॥
यानीह दत्तानि पुरा नरेन्द्रैर्द्दानानि धर्मार्थ यशस्कराणि।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधुः पुनराददीत॥ ७॥
स्वदत्तां परदत्तां वा यत्नाद्रक्ष युधिष्ठिर।
महीं महिमतां श्रेष्ठ दानाच्छ्रेयोनुपालनमिति॥ ८॥

श्रीकण्डकणकदूतकं॥ संवत्सरशतचतुष्टये षडशीत्यधिके आषाढशुद्ध द्वादश्यां सं ४०० ८० ६ आषाढ शु १० २ आदित्यवारे निबद्धं लिखितं

चैतन्मया . . . . स्वहस्तो मम

श्रीजयभटस्य ।

Summary

There was Karṇṇa in the Brahmin (dvija) family. Then there was Dadda. His son was Jayabhaṭa I[1], whose son *Parama-māhēśvara, mahāśabda* Dadda II. His son was *mahāśabda, mahāśāmanta* Jayabhaṭa II. His son was *parama-mahēśvara, pañcha-mahaśabda, mahāsāmanta* śrīmad Ahirola and his son was Jayabhaṭa (III) who was as *samadhigata-pañchamahaśabda-mahāsāmanta*[2] was well and directed the rāja-sāmanta (a feudatory being a *rāja* and *sāmanta* (Sircar, D.C., *ibid.*, p.378) *rāshṭra, grāma, mahatta* and such magistrates (*ibid.*, p.6). Let it be known to you that for the increase of the merit and fame, here and hereafter, of my parents and myself, I have given as Dēvadāya through libation of water, today, Sunday the 10th day in the bright half of the month of Āshāḍha as long as the Moon, Sun, Ocean, Earth and mountains last, 50 *nivarttanas* of land (boundaries specified) in the village Kēmajju situated in Bharukachchha-vishaya for the repairs and renovation of the temple and worship in the temple of god Āśramadēva with all its incomes. (Details given) The grant was also meant for the expenses like perfume, flowers, lamps, services of music, maintaining a feeding house and the like. The conditions like barring the entry of the *chāṭas* and *bhaṭas* and forced labour are also laid down.

The *Dutaka* was Kaṇḍakanaka. The name of the writer is lost. Signed by Jayabhaṭa.

Notes

1. Mirashi, V.V. has told about Jayabhaṭa IV (*CII*, IV, pp.lii, and 104). Jayabhaṭa I is nowhere mentioned.

2. Karṇṇa, Dadda and Jayabhaṭa (??) were not said to have been *Paramēśvara*, *pañchamahāśabda* and *mahāśabda* Only Dadda II and his later rulers had that titles *pañchamahāśabdā*, and *mahāśabda*. Ahirōla and Jayabhaṭa (iii or iv) also added the title *mahāsāmanta*..

○ ○ ○ ○

No. 46

NAVSARI PLATES OF PULAKESIRAJA

Location : Navsārī, Surat District, Gujarat
Date : [Kalachuri] 490 = 739 A.D.
Script : Southern Script
Language : Sanskrit
King : Pulakēsirāja
Dynasty : Chālukya of Gujarat
Reference : 1) Indraji, Bhagvanlal, *Verhandlungen das VII Internationalen Orientalisten-Congresses*, Arische Section, p.211 f.; 2) Mirashi, V.V. *CII*, IV, p.137 f.

Text

Metre : Vv.1-5 *Anushṭubh* ; 6 *Indravarjā*

सिद्धं । जयत्याविष्कृतं विष्णोर्वाराहं क्षोभिताण्णर्वम् ।
दक्षिणोन्नतदंष्ट्राग्रविश्रान्तभुवनं वपुः ॥ १ ॥

श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां सप्तलोकमातृभिस्स
प्तमातृभिरभिवर्द्धितानां कार्त्तिकेयपरिरक्षणप्राप्तकल्याणपरंपराणां भगवन्ना
रायणप्रसादसमासादितवराहलांछनेक्षणक्षणवशीकृताशेषभूभृतां चलुक्यां
नां कुलमलङ्करिष्णोरश्वमेधावभृथस्नानपवित्रीकृतगात्रोनेकनरपतिमकुटत
टघटितमणिगणकिरणसमुल्लसितोद्योतितचरणकमलयुगलस्सत्याश्रयश्रीपृ
थिवीवल्लभमहाराजाधिराजपरमेश्वरश्रीकीर्त्तिवर्म्मराजस्तस्य सुतस्तत्पा
दानुध्यातः परमदेवताविशेषवद्वंदनीयतमस्सकलशास्त्रार्त्थतत्वज्ञकरिकर
निष्ठुरप्रकोष्ठकरकलितनिशितनिस्त्रिंशप्रहारदलितप्रमुखागतवैरिवारणकुंभ
स्थलोच्छलत्प्रत्यग्रधवलनिर्म्मलमुक्ताफलप्रकरकुंभस्तबकसमभ्यर्च्चितस

मरधरित्रीतलः श्रीमदुत्तरापथाधिपतिश्रीहर्षवर्द्धनपराजयोपलब्धोग्र प्रतापः परममाहेश्वरोपरनामा सत्याश्रयापरनामा श्रीपुलकेशिवल्लभस्तस्य सुतस्तत्पादानुध्यातोनेकनरपतिसामन्तमकुटकोटिघृष्टचरणारविन्दयुगलो मेरुमलयमन्दरविन्ध्यसमानधैर्य्योहरहरभिवर्द्धमानवरकरितुरगरथपदातिबलो मनोजवैकचित्रकण्ठाख्यप्रवरतुरंगमेणोपार्ज्जितस्वराज्यः विजितचेरचोलपांड्यचक्रमागतराज्यत्रयःपरममाहेश्वरःपरमभट्टारकस्सत्याश्रयः श्रीविक्रमादित्यराजस्तस्यानुजो विजितसकलारातिपक्षश्चतुरुदधिपर्य्यन्तमालामेखलायाः क्षितेर्म्मण्डनभूतो मत्तेभकुंभमण्डलविदारणकेसरिकिशोर इव विक्रमैकरसस्समस्तदिङ्मंडलप्रख्यातकीर्त्तिः परममाहेश्वरः परमभट्टारकधराश्रयः श्रीजयसिंहवर्म्मराजस्तस्य सुतस्तत्पादानुध्यातस्सकलजनमनानंदभूतोनेकसमरसंकटप्रमुखागतनिहितशत्रुसामन्तकुलवधू प्रभातसमयरुदितच्छलोद्गीयमानविमलनिस्त्रिंशप्रतापो निजभुजप्रभावोपार्ज्जितस्वकीयभूभागमण्डलःपरममाहेश्वरःपरमभट्टारकजयाश्रयश्रीमङ्गलरसराजस्तस्यानुजस्तत्पादपंकजाराधनानुध्यातः प्रतिदिनमुपचीयमानोदयः शैशवादेव समस्तगुणगणाधिष्ठानभूतः स्वयंवरयैव राजलक्ष्म्या समासादितवक्षस्थलो धवलयशोवितानविमलीकृतसकलजगन्मण्डलः परममाहेश्वरः परमभट्टारकः शरझषिरमुद्गरोद्गारिणितरलतरतारतरवारिदारितोदित सैन्धवकच्छेल्लसौराष्ट्रचावोटकमौर्य्यगूर्ज्जरादिराजो निःशेषदाक्षिणात्यक्षितिपतिजिगीषया दक्षिणापथप्रवेशाभिलाषमाना प्रथममेव नवसारिकाविषयप्रसाधनायागतेत्वरिततुरगखरमुखरखुरोत्खातधरणिधूलि

धूसरितदिगन्तरे कुन्तप्रान्तनितान्तविमर्द्यमानरभसाभिधावितोद्भट
स्थूलोदरविवरविनिर्ग्गतांत्रपृथुतररुधिरधारारंजितकवचभीषणवपुषिस्वामि
महा सन्मानदानग्रहणनिष्क्रयीकृतस्वशिरोभिमुखमापतितैरदयदशनाग्रद
ष्टौष्ठपुटैरनेक समराजिरविवरवारिवैरिकरिकटितटहस्तविघटनविगलितघन
रुधिरपटलपाटलितपट्टुकृपाणपट्टैरपि महायोधैरलब्धपरभागैः विपक्ष
क्षपणाक्षेपपक्षिप्रक्षिप्ततीक्ष्णक्षुरप्रहारविलूनवैरिशिरः कमलगलनालैराहवर
सरभसरोमांचकंचुकाच्छादिततनुभिरनेकैरपि नरेंद्रवृंदवृंदारकैरजितपूर्व्वे
व्यप गतमस्माकमृणमनेन स्वामिनः स्वशिरःप्रदानेनाद्यतावदेकजन्मीय
मित्येवमिवोपजातपरितोषानन्तरप्रहत पटुपटहरवप्रनृत्तकबन्धबद्धरासमंड
लीके समरशिरसि विजिते ताजिकानीके शौर्य्यानुरागिणा श्रीवल्लभनरेंद्रेण
प्रसादीकृतापरनामचतुष्टयस्तद्यथा दक्षिणापथसाधारचलुक्किकुलालंकार
पृथिवीवल्लभानिवर्त्तक निवर्त्तयित्रवनिजनाश्रयश्रीपुलकेशिराजस्सर्व्वानेवा
त्मीयानस्मद्वंशजानन्यांश्च यथासंबध्यमानकान्विषयपतिग्रामभोगिकवा
सावकायुक्तविनियुक्तकादीन्समनुदर्शयत्यस्तु वः संविदितम् यथास्माभि
र्म्मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये बलिचरुवैश्वदेवाग्निहोत्रादिक्रियो
त्सर्प्पणार्त्थं वनवासीविनिर्ग्गतवत्ससगोत्रतैत्तिरीयसब्रह्मचारिणे द्विवेद
ब्राह्मणकाञ्चलायब्राह्मणगोविन्दळिसूनवे। कार्म्मणेयाहारविषयांतर्ग्गत
पद्रकग्रामस्सोद्रंगसोपरिकरस्सदानप्रदानकः अचाटभटप्रावेश्यो भूमिच्छि
द्रन्यायेनोदकातिसर्ग्गेण महाकार्त्तिकायां पुत्रपौत्रान्वयभोग्यः पूर्व्वप्रदत्त
देवब्रह्मदायवर्ज्जो धर्म्मदायत्वेन प्रतिपादितः। यतोस्याग्रहार स्थित्या

भुंजतः कृषतः कर्षयतो वा न कैश्चिद्विघाते स्थातव्यमागामिभद्रनृपतिभिरस्मद्वंश्यैरन्यैर्व्वा विद्युल्लोलान्यनित्यान्यैश्वर्य्याणि तृणाग्रजलग्नजलबिन्दुचंचलमायुरवेक्ष्यास्मद्दायोनुमन्तव्योनुपालयितव्यश्च। यश्चाज्ञानतिमिरपटलावृतमतिराच्छिंद्यादाच्छिद्यमानं वानुमोदेत स पञ्चभिर्म्महापातकैस्सोपपातकैस्संयुक्तः स्यादिति। उक्तं च भगवता वेदव्यासेन व्यासेन।

षष्टिं वर्षसहस्राणि स्वर्ग्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥ २॥
विंध्याटवीष्वतोयासु शुष्ककोटरवासिनः।
कृष्णाहयो हि जायन्ते भूमिदायं हरन्ति ये॥ ३॥
बहुभिर्व्वसुधा भुक्ता राजभिस्सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ ४॥
स्वदत्तां परदत्तां वा यत्नाद्रक्ष युधिष्ठिर।
महीम्महिमतां श्रेष्ठ दानाच्छ्रेयोनुपालनम्॥ ५॥
यानीह दत्तानि पुरा नरेंद्रै
र्द्दानानि धर्म्मार्त्थयशस्कराणि।
निर्भुक्तमाल्यप्रतिमानि तानि
को नाम साधुः पुनराददीत॥ ६॥

संवत्सरशतचतुष्टये नवत्यधिके कार्त्तिकशुद्धपञ्चदश्यां संवत् ४०० ९० कार्त्तिकशुद्ध १० ५। लिखितञ्चैतन्महासान्धिविग्रहिकप्राप्तपञ्चमहा

शब्दसामन्तश्रीबप्पभट्टिना महाबलाधिकृतहरगणसूनुना। न्यूनाक्षरमधिकाक्षरं वा सर्व्वं प्रमाणम्। सिद्धम्॥ सिद्धम्॥ स्वयमाज्ञा। श्री अवनिजनाश्रयः।

Summary

[The beginning portion upto the reference to Kīrttivarman I of the main Chāḷukya dynasty, as one whose body had been purified by the *avabhṛita* bath (at the conclusion) of *Aśvamēdha* sacrifice closely follows the corresponding text in other Chāḷukyan charters and continues].

That *Satyāśraya-Pṛitivivallabha Mahārājādhirāja-Paramēśvara*-śrī-Kīrttivarma-rāja, was one whose pair of lotus-like feet was glowing by the bright rays of the numerous gems studded on the crowns of many kings.

His son was *Satyāśraya-srī-Pulakēśi-vallabha* who meditated on his (father's) feet, who was most eligible to be worshipped like the great Supreme God, who had a masterly knowledge of the essence of all sciences, who had worshipped the earth in the battle fields by (scattering the flowers that were the) bouquets of the heaps of pearls, which were white and blemishless, scattered from the temples of the (multitude of) enemy's elephants that were sent against him, split open by the strokes of his sharp sword, adorning his hard wrists, resembling the trunk of the elephant, who, having achieved the fierce glory of having defeated śrī-Harshavarddhana, the supreme lord of Uttarāpatha bore the alternate name of Parama-māhēśvara (the most Supreme great lord).

His son, who meditated at his (father's) feet, was *Parama-māhēśvara-Parama-bhaṭṭāraka* Satyāśraya-śrī-Vikramādityarāja whose lotus-like feet were being rubbed by the tips of the crowns of many kings and feudatories, whose courage and steadfastness were like that of the mountains, Mēru, Malaya, Mandara and Vindhya, whose army kept growing in strength day by day with choice elephants, horses, chariots and foot-soldiers, who secured his own kingdom with the help of the (sole) horse of the choicest breed named Chitra-kaṇṭha with the speed of the mind, who had conquered the three traditionally inherited kingships of the Chēra, Chōḷa and Pāṇḍya.

His younger brother was *Parama-māhēśvara-Parama-bhaṭṭāraka*-Dharāśraya-śrī-Jayasiṁha-varmma-rāja, who shone like an ornament of the earth, girdled by the four oceans, in which all opponents had been vanquished (by him), who with his outstanding valour like that of the lion-cub had torn the temples of intoxicated (enemy) elephants, whose resounding fame had spread in all the quarters.

His son was *Parama-māhēśvara-Parama-bhaṭṭāraka*-Jayāśraya-śrī-Maṅgalarasa-rāja, who meditated at his (father's) feet, who caused delight to the minds of all people, the feat of whose arms were being sung in the form of the wails in the morning, of the wives of his enemies and feudatories who were slain when they confronted him in many battles, who acquired his own territorial division of the earth on the strength of his power and might.

His younger brother was Avanījanāśraya-śrī-Pulakēśirāja, who worshiped and meditated on the lotus-like feet (of his elder brother), whose prosperity was increasing day by day, who, even from childhood had been the abode of all virtues, whose bosom had been embraced by the Goddess of royalty of her own accord as if in a *svayamvara*, by the spread of the canopy of whose clean fame, the circle of the whole earth had been purified, who was a *Parama-Māhēśvara* (supreme lord /a devout worshipper of Īśvara) and *Parama-bhaṭṭāraka* (a great lord).

Having routed the Saindhava, Kachchhēlla, Saurāshtra, Chāvōṭaka, Mauryya, Gūrjjara, rulers after tearing apart (their armies) with the liberal use of the arrows, fishlike missiles[1] and hammers, in the battle, when the Turaga [2] army was about to enter the *dakshiṇāpatha* with the intent of conquering without exception the rulers of *dakshiṇāpatha*, and as a first step had come to subjugate the Navasārika-vishaya[3] with all the quarters filled with the dust raised by the hoofs of the horses and mules digging the ground by their feet movement and in the battle that ensued the bodies of (warriors) were rendered dreadful, with their armour reddened by being swathed in blood gushing out of their big stomachs with the intestines coming out of their stomachs cut open by the sharp javelins, when they impetuously rushed forward against them with determination with their lips cut by their teeth mercilessly exhibiting their grit in the heat of battle eager to discharge their indebtedness for the great rewards received from their lord, even though those soldiers were veterans of many battles, where the feats performed by their sharp swords were unexcelled and they had been covered with the thick blood emanating from the loins and trunks of the numerous elephants they had slashed when they had to contend with them in many battles and they had severed the heads of the enemies just as if they were lotus-stalks by discharging the sharp arrows tipped like the horse-shoe for eliminating the enemy and their great enthusiasm and at the sight of the battle-field was made apparent by their bodily hairs standing on end even like armour and were such who had never been defeated by the many hosts of kings, how they rushed forward ready to offer their heads to discharge their indebtedness to their lord and as if overjoyed that they could make the sacrifice in the service of their lord, their headless trunks were dancing around in the battle-field to the rhythm of the beat of the many battle-drums,

In such a fierce battle, the army of the Tājikas having been beaten (by Pulakēśirāja), which achievement was greatly appreciated by the Vallabha (Chāḷukya sovereign) who loved feats of valour, led him to confer on him (Pulakēsirāja) five titles, *dakshiṇāpatha-sādhāra* (the main stay of the region of the south), *Chaḷukkikulālaṅkāraa* (the ornament of the Chaḷukki family), *pṛithivī-vallabha* (the lord of the earth) and *anivarttaka-nivarttayitṭṛi* (the one who repelled the irresistible) *avani-janāśraya* (the refuge of the people of the world)[4]

That Pulakēsirāja drew the attention of his own family members, his descendants and such who were concerned in this regard, the *vishayapati* (governor of the *vishaya* – district) *grāma-bhōgika*[6] (those in whose enjoyment the village was), *vāsāvaka* (settlement officer),[7] *āyukta* and *viniyuikta* (higher and lower grade Commissioners)[8] to this. Be it known to you

That by us, for the increase of fame and merit of my parents as well as of our own self, the village Padraka, included in Kārmmaṇēya-āhāra[9] with the exeption of such lands granted already to temples and Brahmins, had been granted with due libation of water to Kāñchaḷa well versed in two *Vēdas,* son of the Brahmin Gōvandaḷi, a student of Taittīryka school, belonging to Vatsa-sagōtra, who had migrated from Vanavāsī, for the due performance of the daily routine rituals, *bali, charu, Vaiśvadēva, agnihōtra* etc., along with (the rights to collect) *udraṅga, uparikara* with the authorization to be gifted in turn in whole or in part, with the prohibition of the entry of *chāṭas* and *bhaṭas* were being barred under the rule of *bhūmi-chchhidra-nyāya*[10] with the guarantee that the gift could be enjoyed hereditarily in the line of sons and grandsons with the tenure of *dharmadāya* -

(a charitable gift)

In view of this village, having been made an *agrahāra.* [five of the usual peremptory verses attributed to the worshipful Vyāsa)

This is the [Kalachūri] Year 490, *Kārttika śuddha* 15.[10]

[This] is written by śrī-Bappa-bhaṭṭi, the *mahāsāndhi-vigrahīka,* and the *samanta,* the son of *mahābhalādhikṛita* Haragaṇa.

Any syllables, short or in excess [in this text of the charter do not affect] the authority of this charter.

This is my order

Seal - Śrī-Avani-janāśraya

Notes

1. *Jhasna* – means 'fish'. In the context, *jhashira* seems to have referred to the "fish-shaped missiles" (*cf. CII,* IV, p.140 n.16).

2. The Arabs were called by the name Turagas and Tājikas.

3. The region around the present day Navsāri where the present charter was found, occupied a strategical position for entry into the south of India from the north-west. The Chāḷukyas had stationed a scion of the family there to stem any invasion from that direction.

4. Cf. verse 2 in the Kāvī Plates of Jayabhaṭa, of the Kalachuri family (*CII,* IV, pp.96-102) The invasion by the Tājikas (Arabs) seems to have taken place even three years before the date of this charter. Pulakēśrāja seems to have stemmed the new invasion.

5. As only six titles are stated to have been conferred on Pulakēśirāja, it has to be construed that Pṛithivī-vallabha, the usual title assumed by all these rulers got inadvertently included here.

6. *Bhōgika* having referred to the fief-holder, it has to be understood that *grāma-bhōgika* meant "the dignitary in whose fief the village gifted was included" (Sircar, D.C., *IEG,* p.55).

7. *Vāsāvaka* seems to have been an officer in charge of the welfare of residents and settlers in the village. (*cf. ibid.,* p.366-67).

8. The duty of these officers is not specified in reference (*cf. ibid.,* pp.42, 375).

9. The identity of Kārmaṇēya-āhāra has already been indicated (*CII*, IV, p.139). Padraka might have been the old name of Pārdi, four miles east of Navsāri (*CII*, IV, p.139).

10. "*Bhūmichchhidra*" seems to have been uncultivated land. (*cf.* Sircar, D.C., *op.cit.*, p.50). The details of date culd be equated to 739 A.D. October 21, though they do not enable verification (*CII*, IV, p.139).

○○○○

No. 47

ELLORA PLATES OF DANTIDURGA

Location : Ellora, Aurangabad District, Maharashtra.
Date : Śaka 663=741 A.D[1]
Script : Siddhamātṛikā (Early Nāgarī)
Language : Sanskrit
King : *Sāmantādhipati* Durggarāja
Dynasty : Rāshtrakūṭa
Reference : Dikshit, S.K., *EI,* XXV, pp.25-31

Text

Metre: Vv.1-3 *Anushṭubh*

ॐ स्वस्ति। बदरिकावासकात्समधिगतपंचमहाशब्दमहासामन्ताधिपतिराष्ट्रकूटान्वयगोत्रालंकारश्रीकर्कराज[स्]तत्पादानुद्धयातपरममाहेश्वरसमधिगतपंचमहाशब्दमहासामन्ताधिपतिश्रीमदिन्द्रराजसुत[राजस्तत्सुता] मेरुमहीधरगिर(?विजर)स्थिररुचिरसमुन्नते विकसितयशसि महति स इन्द्रराज्ञा(ज्ञो)न्वये अनेक चातुर्द्दन्तगजघटाटोपसमरसंघट्टलब्ध विज[यः] समधिगतपंचमहाशब्दमहासामन्ताधिपति[पृ]थिवीवल्लभ खड्गाव(लो)कश्रीदन्तिदुर्ग्गराजः कुशली सर्वानिव राजसामन्तभोगिक विषयपतिराष्ट्रकूट महत्तराधिकारिकादी[न्] समाज्ञापयत्यस्तु वो विदितं यथा मया ए(ला) पुरव्यवस्थितेन अश्वयुजशुद्धत्रयोदश्यां स्वहस्तेन पा[दौ] प्रक्षाल्य परलोकमपेक्षत्वमंगीकृत्य [लोकमपेक्ष्य] महत्फलं च श्रुत्वा चन्दनपुरि चतुराशित्या[रशीत्य]न्तर्ग्गतपिप्पलालं नाम ग्राम[ः] नवसारिकाविनिर्ग्गतभरद्वा[ज]सगोत्रतथाध्वर्य्युरेवादित्यभट्टाय तथा माउल तथा [गो] विसरे[भ्यो] गुहेश्वरतीर्थस्नातेन बलिचरुवैश्वदेवाग्निहो

त्रादि(क्रि)योत्सर्प्पणार्त्थं मातापित्रोरात्मनश्च पुण्ययशोभि[वृ]द्धये पिप्पल ग्राम[ः] प्रतिपादितः यत[ः] अचाटभटप्रवेश्य[ः] अभ्यन्तरसिद्धिक[ः] सर्व्वादान संग्राह्य[ः] यतोस्म[द्व]वं(श्यै)रन्यैर्व्वा भोगनृपतिभिः [भाविनृप तिभोग पतिभिः] नलवेणुकदलीसारसंसारजलबुद्बुदोपमं जीवितमवधार्य्य अस्मद्दायोनुमन्तव्य[ः] प्रतिपालयितव्यश्च यो वाज्ञानतिमिरान्धावृतम तिरा(च्छि)न्द्यादा(च्छि)द्यमानं वानुमोदेत स पंचभिर्महापातकै[ः] (संयु नक्तु)। उक्तं च भगवतो (ता) वेदव्यासेन।

षष्टिं वर्षसहस्राणि स्व(र्ग्गे) तिष्ठति भूमिदः।
आच्छे[त्ता] चानुमन्ता च तान्येव नरके वसे[त्]॥ १॥
विन्ध्याटवीष्वतोयासु शुष्कको(ट)रवासिन ः।
[कृ]ष्णाहयो हि जायंते भूमिदायं हरन्ति ये॥ २॥
बहुभिर्वसुधा भुक्ता राजभि[ः] सगरादिभि[ः]।
यस्य यस्य यदा भूमि[स्]तस्य तस्य तदा फ [लम्]॥ ३॥

सं ६०० ६० ३ अश्वयुज शुद्ध त्रयोदश्यां सोमवारे। लिखितमिदं कुक्कुरे (ण) गवंग[वाब्बा]भिहितेन (?)

Summary

[The charter was issued] from the residence of Badarika.[2]

Khadgāvalōka Dantidurgarāja born in the family of Indrarāja who was the son of Karkarāja, the ornament of the Rāshṭrakūṭa family, orders all the officers like *rāja-sāmanta bhōgika vishayapati rashṭrakūṭa* and *mahattara*, thus :

Stationed in Elāpura,[3] I have granted the village Pippala[4] situated in Chandanapuri 84[5] after myself laying the feet, to Ādityabhaṭṭa of Bhāradvāja-gōtra, Māvula and Gōvisara[6] hailing from Navasārika,[7] for performing the rites of *bali*, *charu*, *vaiśvadēva* and *agnihōtra* for the increase of the merit and fame of my parents and myself. This was given by me after bathing in Guhēśvaratirtha.[8] This should be protected by all the future kings. Those who destroy this will incur the five great sins.

Year 600 60 3 Āśvayuja śuddha 13, Monday.

This charter was written by Kukkura, instructed by Gāvangavābbā.

Notes

1. Though the Śaka-samvat 663 is not regular as per the Indian Ephemeris of Śrī Sāmikannu Pillai, S.K.Dikshit thought that the date could correspond to 17th September of the date 774 A.D. though the correct Śaka Samvat is on the expired date of 664.

2. Badrikā is not identified.

3. Ēlāpura is the same as the modern Ellore. (*EI*, XXV, p.29).

4. Pippalāla is the modern Pimprāl, twelve miles south-east of Chandanpuri and 33 miles from Ellōra. (*ibid.*)

5. Chandanapuri has the same name on the bank of river Girna, three miles, south-west of Malegaon and about fortyfive miles to north-west of Ellora.

6. The names Māula and Govisāra, of the Brahmin names are quite unusual.

7. Navasārikā is the same as Navsārī in Barōda district.

8. Guhēśvara-tīrtha could be one of the twelve *jyotri-liṅgas* (Ghrishṇēśvara) of Ellore (*ibid.*)

❖ ❖ ❖ ❖

No. 48

NARWAN PLATES OF VIKRAMADITYA II

Location : Narwan, Chiplur Taluk, Ratnagiri District, Maharashtra
Date : Śaka 664; R.year 8 = 742 A.D.
Script : Early Kannaḍa
Language : Sanskrit
King : Vikramāditya II
Dynasty : Chāḷukya of Bādāmi
Reference : Khare, G.H., *EI*, XXVII, pp.125-131

Text

Metre: Vv.1-4 *Anushṭubh*

ओम्। स्वस्ति।

जयत्याविष्कृतं विष्णोर्वाराहं क्षोभिताण्र्णवम्।
दक्षिणोन्नतदंष्ट्राग्रविश्रान्तभुवनं वपुः॥ १॥

श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारितीपुत्राणां सप्तलोक मातृभिः सप्तमातृभिरभिवर्द्धितानां कार्त्तिकेयपरिरक्षणप्राप्तकल्याणपरंपरणां भगवन्नारायणप्रसादात्समासादितवराहलांछनेक्षणक्षणवशीकृताशेषमहीभृतां चळुक्यानां कुलमलंकरिष्णोरश्वमेधावभृथस्नानपवित्रीकृतगात्रस्य श्रीपोलकेशिवल्लभमहाराजस्य सूनुः पराक्रमाक्रान्तवनवास्यादिपरनृपतिमण्डलप्रणिबद्धविशुद्धकीर्त्तिः श्रीकीर्त्तिवर्म्मपृथिवीवल्लभमहाराजस्तस्यात्मजस्य समरसंसक्तसकलोत्तरापथेश्वरश्रीहर्षवर्द्धनपराजयोपात्तपरमेश्वरशब्दस्य सत्याश्रयश्रीपृथिविवल्लभमहाराजाधिराजपरमेश्वरस्य प्रियतनयस्य प्रज्ञातनयस्य खड्गमात्रसहायस्य चित्रकण्ठाभिधानप्रवरतुरंगमेणैके

नैवोत्सारिताशेषविजिगीषोरवनिपतित्रितयान्तरितां स्वगुरोः श्रियमात्म
सात्कृत्य प्रभावात्कुलिशदलितपाण्ड्यचोळकेरळकळभ्रप्रभृतिभूभृदभ्र
विभ्रमस्यानन्यावनतकाञ्चीपतिमकुटचुंबितपादांबुजस्य विक्रमादित्यसत्या
श्रयश्रीपृथिवीवल्लभमहाराजाधिराजपरमेश्वरभट्टारकस्य प्रियसूनोर्बालेन्दु
शेखरस्य तारकारातिरिव दैत्यबलमतिसमुद्धतं त्रैराज्यकाञ्चीपतिबलम
वष्टभ्य करदीकृतकमेरपारसीकसिंहळादिद्वीपाधिपस्य सकलोत्तरापथनाथ
मथनोपार्जितोर्जि तपाळिध्वजादिसमस्तपारमैश्वर्य्यचिह्नस्य विनयादित्य
सत्याश्रयश्रीपृथिवीवल्लभमहाराजाधिराजपरमेश्वरभट्टारकस्य प्रियात्मजः
शैशव एवाधिगताशेषास्त्रो दक्षिणाशाविजयिनि पितामहे समुन्मूलित
निखिलकण्टकसंहतिरुत्तरापथविजिगीषोर्गुरोरग्रत एवाहवव्यापारमाचरन्न
रातिगजघटापाटन विशीर्य्यमाणकृपाणधारस्समग्रविग्रहाग्रेसरः सत्सा
हसरसिकः पराङ्मुखीकृतशत्रुमण्डलो गंगायमुनापाळिध्वजपटढक्कामहा
शब्दचिह्नमाणिक्यमदगजादीन्पितृसात्कुर्व्वन्परैः पलायमानैरासाद्य
कथमपि विधिवशादपनीतोपि प्रतापादेव विषयप्रकोपमराजकमुत्सारय
न्वत्सराज इवानपेक्षितापर सहायकस्तदवग्रहान्निर्गत्य स्वभुजावष्टम्भ
प्रसाधिताशेषविश्वम्भरः प्रभुर खण्डितशक्तित्रयत्वाच्छत्रुमदभंजनत्वादुदा
रत्वान्निरवद्यत्वाद्यस्समस्तभुवनाश्रयः सकलपारमैश्वर्य्यव्यक्तिहेतुपाळि
ध्वजाद्युज्ज्वलप्राज्यराज्यो विजयादित्यसत्याश्रयश्रीपृथिवीवल्लभमहा
राजाधिराजपरमेश्वरभट्टारकस्तस्य प्रियपुत्रः सकलभुवनसाम्राज्यलक्ष्मी
स्वयंवराभिषेकसमयानन्तरसमुपजातमहोत्साह आत्मवंशजपूर्व्वनृपति

जयापहारिणः प्रकृत्यामित्रस्य पल्लवस्य समुन्मूलनाय कृतमतिरतित्वरया तुंडकविषयं प्राप्याभिमुखो गत्वा नन्दिपोतवर्म्माभिधानपल्लवं रणमुखे संप्रहृत्य प्रपलाय्य कटुमुखमुलवादित्रसमुद्रघोषाभिधानवाद्यविशेषखट्वांगध्वजप्रमत्तप्रभूतप्रख्यातहस्तिवरांश्च विकासनिकाशनिराकृततिमिरं माणिक्यराशिमनेकानेकोपवहनीयमहाहेमराशिञ्च हस्तेकृत्य कलशभवनिलयहरिदंगनाञ्चितकुलधनकनिलयत्वरिरवाञ्चितकाञ्चीयमानां काञ्चीमविनाश्य सततप्रवृत्तदानानन्दितद्विजदीनानाथजनो नरसिंहपोतवर्म्मणा निर्म्मितशिलामयराजसिंहेश्वरादि देवकुलप्रभूतसुवर्णराशिप्रत्यर्पणोपार्जितोर्जितपुण्यो अनिवारितप्रतापप्रसरप्रसाधितपाण्ड्यचोळकेरळकळभ्रप्रभृतिराजन्यकः क्षुभितकरिमकरनिहतसितशुक्तिमुक्ताफलप्रकरमरीचिजालविलसितवेलाकुलोद्घूर्ण्णमानार्ण्णवनिधानदक्षिणार्ण्णवे शरदमलशशधरविशदयशोराशिमयं जयस्तंभमतिष्ठिपद्विक्रमादित्यसत्याश्रयश्रीपृथिवीवल्लभमहाराजाधिराजपरमेश्वरभट्टारकः सर्व्वानेवमाज्ञापयति विदितमस्तु वोस्माभिश्चतुष्षष्ट्युत्तरषट्शतेषु शकवर्षेष्वतीतेषु प्रवर्द्धमानविजयराज्यसंवत्सरेष्टमे आदित्यवाडमधिवसति विजयस्कन्धावारे उत्तरायणकाले राष्ट्रकूटशिवराजपुत्रगोविन्दराजविज्ञापानया चिप्ररुलविषये समुद्रतीरे सोन्नेनद्यंबाडग्रामादिपरिवृतचतुःसीमान्तनरवणग्रामं चिन्द्रमाडसहितं कौशिकगोत्रदुर्ग्गनागस्वामिपुत्रदेग्गुलिस्वामिकौशिकगोत्रदोणस्वामिपुत्रनागडिदीक्षितावेतौ ब्राह्मणौ चारिकौ भूत्वा आराधितौ ग्रामं देग्गुलस्वामिनागडिदीक्षितकोन्तळनारायणनन्नस्वामिभुर्भुसगोदुध

नंजयदुग्गु आत्रेयबोळमावुवच्चपुत्रदेवुगोविदिवोवुणादिनानागोत्रसमयवेद वेदांगपारगब्राह्मणेभ्य इदं अचाटभटप्रवेशाभ्यन्तरसिद्धिसहितं सभोगं दत्तं यत्किञ्चिद्द्रव्यं अंबाडग्रामदेयमरुहणादि राजपुरुषेभ्यो ददाति तदर्धन्नरवणदेयं तदागामिभिरस्मद्वंश्यैः राजभिरायुरैश्वर्य्यादीनां विलसितमचिरांशुचञ्चलमवगच्छद्भिराचन्द्रार्कताराणामवस्थितिसमकालं यशश्चिचीषुभिः स्वदत्तिनिर्व्विशेषं परिपालनीयमुक्तञ्च भगवता वेदव्यासेन व्यासेन ॥

बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिः तस्य तस्य तदा फलम् ॥ २ ॥
स्वन्दातुं सुमहच्छक्यं दुःखमन्यस्य पालनम् ।
दानं वा पालनं वेति दानाच्छ्रेयोनुपालनम् ॥ ३ ॥
स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥ ४ ॥

इति महासन्धिविग्रहश्रीअनिवारितपुण्यवल्लभेन लिखितमिदं शासनम् ॥

Translation

[The introductory portion describing the genealogy of the Chāḷukya family upto the mention of Vijayāditya corresponds with the account given in the Jamaḷagāma and other (*USVAE*, IV-II, Nos.97-100) grants of Vijayāditya]

That Vijayāditya's dear son Vikramāditya-satyāśraya-Śrī - Pṛithivī - vallabha - mahārājadhīrāja - paramēśvara bhaṭṭāraka, being greatly enthused on being anointed as *yuvarāja* and having been preferred by the Goddess Lakshmī for universal sovereignty,

with a view to annihilate the natural enemy,[1] who had truncated the victorious career of the earlier kings of his dynasty,

had quickly and with determination reached Tuṇḍaka-vishaya (Toṇḍaimaṇḍalam-province).[2] He smashed the Pallava named Nandipōta-varmman and made him to take to his heels and snatched from him, the special wind-musical instrument named Samudraghōsha,[3] the musical instrument (drum?) called Kaṭumukha,[3] the standard-ensign known as Khaṭvāṅga,[3] (many) choice elephants, intoxicated, well-grown and reputed, heaps of precious gems and a collection of gold that could be transported only with the help of many vehicles.[4] The girdle encircling the (hip of) the luscious lady, i.e. the abode of Kalaśabhava,[5] (entering it), gladdened the Brahmins, humble and orphaned people by continuous gifts and earned the great merit of restoring the abundant heaps of gold of the temples like Rāja-siṁhēśvara built in stone by Narasiṁha-pōtavarmman,[6] who with his unimpeded valour had reduced to subjection, the Pāṇḍya, Chōḷa, Kēraḷa, Kaḷabhra[7] and other such warrior-kings. He set up the pillar of victory in the form of his abundant fame, pure like the moon in the clear, autumnal sky, on the southern ocean, with shining pearls ejected from the oysters due to those seas being beaten (trampled) by the trunks of the elephants.[8]

The Vikramāditya-satyāśraya-Śrī-Pṛithivī-vallabha-mahārājādhirāja-paramēśvra-bhaṭṭāraka ordeed all thus : Let it be known to you.

In the Śaka year 664, in the prosperous year 8, in Uttārayaṇa, at the request of Gōvindarja, the son of Rāshṭrakūṭa Śivarāja,[8] I have given, while camping at Ādityavāḍa,[9] the village Naravaṇa along with Chindravāḍa[10] in Chipraruḷa-vishaya on the shore of the sea, with the boundaries surrounded by the river Sonnē and Aṃbavāḍa and other villages, to many *brāhmaṇas* headed by Deggulisvāmi, the son of Durganāgasvāmi of Kauśika-gōtra and Nāguḍi-dikshita, the son of Dōṇasvāmi of the same gōtra on conditions such as no entry to *chāṭas* and *bhaṭas* etc. It was stipulated that from the amount of tax like *aruvaṇa* due to be given to the State offices, half should go to (the village) Naravaṇa.

Imprecatory verses follow.

This inscription was written by *Mahāsāndhivigraha* Śri-Anivārita-puṇya-vallabha.

Notes

1. Pallavas were the inveterate enemies of the Chālukyas.

2. Toṇḍaka-vishaya is Toṇḍai-maṇḍalam or the chief territory of the Pallavas.

3. *Samudraghōsha* was probably a conch.

Kaṭumukha might have been a musical instrument.

Khaṭvāṅga might have been skull-topped emblem of the Pallava .

4. The Pallavas might have been lustrous jewels in the Pallava kingdom to be looted by Chālukyas.

5. Kalaśabhava was Agastya, who might have been a protector of the Pallavas.

6. The Rājasiṁha's Śiva temple was always protected by even Vikramāditya I. Vikramāditya II could demolish even this temple (See *EI*, III, pp.359-60).

7. The Kaḷabhras were long out of the picture. The Chālukyas include even Simhala and Dārasikas were included in the hegemony as a flair.

8. Śivarāja and Gōvindarāja were otherwise unknown

9. Ādityavāḍa is one of the two Āitawadas in the Valwa taluk of Satara District". (*EI*, XXVII, p.127)

10. Chindravāḍa may be the modern village of the same name in the 4th mile to the east of Naravaṇa.

11. Sonne river is probably the modern Śāstri river, south of Naravaṇa.

12. Bāḍa is not identified.

13. ātraybōḻu is not known.

14. Ambaḍa village has not been identified.

15. Arahāṇahas not been identified.

16. *Chāṭas* and *bhaṭas* were not clearly identified. (Sircar, D.C., *IEG,* p.51 and p.73).

❖ ❖ ❖ ❖

No. 49

SRIKAKULAM PLATES OF DEVENDRAVARMAN

Location : Srikakulam, Andhra Pradesh

Date : Gaṅga year [2*] 51 = 747 A.D.[1] (?)

Script : Early Telugu

Language : Sanskrit

King : Dēvendravarmman

Dynasty : Eastern Gaṅga

Reference : Fleet, J.F., *IA*, XIII, p.273 f.

Text

Metre: Vv.1, 2; *Anushṭubh.*

ओम् स्वस्ति अमरपुरानुकारिणः सर्वर्तुसुखरमणीयाद्विजयवतः कलिङ्ग
नगराधिवासकात् महेन्द्राचलामलशिखरप्रतिष्ठितस्य सचराचरगुरोः
सकलभुवननिर्माणैकसूत्रधारस्य शशाङ्कचूडामणेर्भगवतो गोकर्ण्णस्वामि
नश्चरणकमलयुगलप्रणामात् विगतकलिकलङ्कोनेकाहावसंक्षोभजनितजय
शब्दप्रतापावनतसमस्तसामन्तचक्रचूडामणि प्रभामञ्जरीपुञ्जरञ्जितनिजानि
स्त्रिंशधारोपार्जितवरच्चरणसित कुमुदकुन्देन्दुवदातयशोध्वस्तारातिकुला
चलो गङ्गामलतिलकमहाराजश्रीमदनन्तवर्मदेवसूनुः श्रीदेवेन्द्रवर्मदेवः
कुशली वराहवर्तनीनामविषये तामरछेरुनामनिवासिनं कुट्टुम्बिनं

समाज्ञापयति विदितमस्तु भवतां ग्रामोयं वाजसनेयचरणनानागोत्र ब्राह्मणशतत्रयाय महेन्द्रशिखरे गोकर्ण्णभट्टारकमुदकपूर्वकं कृत्वा सूर्यग्रहोपरागे दत्तः॥ अत्र सीमालिङ्गानि भवन्ति पूर्वस्यां दिशि पवन राजिका वरवधूपाषाणः पुनः वनराजिका दक्षिणस्यां दिशि वनराजिका तेन्तली पुनः वनराजिका पश्चिमस्यां दिशि वनराजिका वल्मीकं उत्तरस्यां दिशि वनराजिका पाषाणः॥ अत्र व्यासगीतानि कथ्यंते।

बहुभिर्वसुधा दत्ता राभिस्सगरदिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा तदाफलम्॥ १॥
स्वदत्तां परदत्तां वा यो हरेत वसुन्धरां।
स्वविष्ठायम् क्रिमिर्भूत्व पितृभिः सह पच्यते॥ २॥

गाङ्गेयवंशप्रवर्द्धमानविजयराज्यसंवत्सरकपञ्चाशत् एवं॥ लिखितं नागराजश्रीसामन्तेन। उत्कीर्ण्णं चाक्षशालिना सर्वदेवेनेति॥

Translation

Ōm ! Well-being ! From the victorious residence at Kaliṅganagara, which, resembling the celestial city, is comfortable and pleasant in all the seasons.

Śrī-Dēvēndrvarmadēva, who has got himself freed from the taints of the Kali age by prostrations at the pair of lotus-like feet of the worshipful God Gōkarṇṇasvāmin, who has the moon as the head-ornament, of the sole contribute the creation of all the worlds, the progenitor of the mobile and immobile animate and inanimate things, and stationed on the clear peak of the Mahēndra mountain;

(the king) whose the mountainous inimical families of whom have been reduced to nonentities by his reputation

characteristically pure like the white lily and jasmine, and whose feet have been made crimson by the cluster of rays shed by the crown jewels of the rulers reduced to feudatory status by his pulverizing them in many battles with the point of his sword, who is the abode and the fountain-head of wealth of the qualities of diplomacy, modesty, compassion, generosity, kindness, heroism, chivalry and liberality, who is a devout worshipper of Mahēśvara, and meditates on the feet of his parents and is the son of mahārāja śrīmad-Anaṇtavarmadēva, the ornament of the faultless family of the Gaṅgas, is well.

(and) orders the *kuṭumbins* residing in Tāmarachcheru in Varāhavarttanī-vishaya thus – May it be known to you.

This village of yours has been given with the libation of water in the (immediate) presence of Gōkarṇṇa-bhaṭṭāraka on the summit of Mahēndra, to 300 brahmins[2] of several *gōtras* belonging to *Vājasanēya-charaṇa*,[3] on the occasion of the solar eclipse.[4]

These are the boundary-marks (of this village) – on the east, the row of forests; the stone of bridegroom – bride, and again the row of forests; on the south, the row of forests; Tentalī and again row of forests; on the west, the row of forests and the ant-hill; on the north, the row of forests and stone.

Here what have been sung by Vyāsa are cited [Two of the usual slōkas have been given]

The fiftyfirst year of the ever-growing victorious kingship of the Gāṅgēya – family

Thus (this) has been written by Nāgarāja Śrī Sāmanta.
Inscribed by akshasāli Sarva-dēva.

Notes

1. See the long discussion of the date by Fleet (*IA*, XIII, pp.273-74). As, palaegraphically, this record cannot belong to 547 A.D. (year 51 of the Gaṅga era), it is assumed that on some purpose, the two

hundreds had been suppressed and only the fifty first has been cited (cf. Krishna Rao, B.V., *Early Dynasties of Āndhradēśa*, pp.586-88).

2. It appears that as the occasion for the grant was imminent on account of the solar eclipse, it was symbolically made over for the benefit of 300 *brāhmaṇas*. The details of identifying the *brāhmaṇas* eligible to receive the grant was to be undertaken subsequently by the concerned officials.

3. Vājasanēya-charaṇa was the school of Yajur-vēda promulgated by Yājñavalkya (The circumstances attending on the schisu in the study of Yajur-vēda has been explained by Monier Williams *SED*, p.938 col.2).

4. The mention of the month might have been skipped over as superfluous as probably there was only one solar eclipse in the year cited. However, it is seen that in 746 A.D., there was a solar eclipse in the solar month Mithuna (May 25), in 747 A.D., there were two solar eclipses, one in the solar month vṛishabha (May 14) and another in the solar month vṛiśhika (November 7) and in 749 A.D. there was a solar eclipse in the solar month Mēsha (March 23). As the settled opinion (Ramesh, K.V.,*Indian Epigrapy*, p.85) is that the Gaṅga era started sometime between 496 and 498 A.D., it is not possible to say definitely which of those solar eclipses in those three years cited above was the occasion for the grant.

❖ ❖ ❖ ❖

No. 50

AGALI GRANT OF SRIPURUSHA

Location	: Chikkasāraṅgi, Tumkur Taluk, Tumkur District, Karnataka
Date	: Śaka 669 (Expired), R.22=748 A.D.
Script	: Early Kannada
Language	: Saṇskrit
King	: Śrīpurusha
Dynasty	: Western Gaṅga of Taḷakkāḍu
Reference	: 1) *MAR,* 1947-56, p.26 2) Ramesh, K.V., *Inscriptions of the Western Gaṅgas*, pp.155-161.

Text

Metre: Vv.1 and 4 *Sragdharā* ; 2 *Vasantatilakā* ; 3 *Śārdulavikriḍita* ; 5-8 *Anushṭubh*

सिद्धम्। ओं स्वस्ति॥ जितम्भगवता गतघनगगनाभेन पद्मनाभेन। श्रीमज्जाह्नवेयकुलामलव्योमावभासनभास्करः स्वखड्गैकप्रहारखण्डितमहाशिलास्तम्भलब्धबलपराक्रमो दारुणारिगणविदारणोपलब्धव्रणविभूषणविभूषितः काण्वायनसगोत्रः श्रीमत्कोङ्गणिवर्म्मधर्म्ममहाधिराजस्तस्य पुत्रः पितुरन्वागतगुणयुक्तो विद्याविनयविहितवृत्तः सम्यक्प्रजापालनमात्राधिगतराज्यप्रयोजनो विद्वत्कविकाञ्चननिकषोपलभूतो नीतिशास्त्रस्य वक्तृप्रयोक्तृकुशलो दत्तकसूत्रवृत्तेःप्रणेता श्रीमन्माधवमहाधिराजस्तत्पुत्रः पितृपैतामहगुणयुक्तोऽनेकचातुर्द्दन्तयुद्धावाप्तचतुरुदधिसलिलास्वादितयशाः श्रीमद्धरिवर्म्ममहाधिराजः तत्पुत्रो द्विजगुरुदेवतापूजनपरो नारायणचरणानुध्यातः श्रीमान्विष्णुगोपमहाधिराजः तत्पुत्रः

त्र्यम्बकचरणाम्भोरुहरजःपवित्रीकृतोत्तमाङ्गः स्वभुजबलपराक्रमक्रयक्रीतराज्यः कलियुगबलपङ्कावसन्नधर्म्मवृषोद्धरणनित्यसन्नद्धः श्रीमान्माधवमहाधि राजः तत्पुत्रः श्रीमत्कदम्बकुलगगनगभस्तिमालिनः कृष्णवर्म्ममहाधि राजस्य प्रियभागिनेयो विद्याविनयातिशयपरिपूरितान्तरात्मा निरवग्रह प्रधानशौर्य्यो विद्वत्सु प्रथमगण्यः श्रीमान्कोङ्गणिमहाधिराजः अविनीत नामा तत्पुत्रो विजृम्भमाणशक्तित्रयः अन्दरिआलत्तूर्प्पोरुळरेपेन्नगराद्यनेकसमरमुखमखहुतप्रहतशूरपुरुषपशूपहारविघसविहस्तीकृतकृतान्ताग्निमुखः किरातार्जुनीयपञ्चदशसर्ग्गटीकाकारो दुर्व्विनीतनामधेयः तस्य पुत्रो दुर्द्दन्तविमर्द्दविमृदितविश्वम्भराधिपमौलिमालामकरन्दपुञ्जपिञ्जरीक्रियमाणचरणयुगलनळिनो मुष्करनामधेयः तस्य पुत्रश्चतुर्द्दशविद्यास्थानाधिगमविमलमतिर्व्विशेषतोऽनवशेसस्य नीतिशास्त्रस्य वक्तृप्रयोक्तृकुशलो रिपुतिमिरनिराकरणोदयभास्करः श्रीविक्रमप्रथितनामधेयः तस्य पुत्रः अनेकसमरसंपातविजृम्भितद्विरदनरदनकुलिशाभिघातव्रणसंरूढभास्वद्विजयलक्षणलक्षीकृतविशालवक्षस्थलः समधिगतसकलशास्त्रार्त्थतत्त्वस्समाराधित त्रिवर्ग्गो निरवद्यचरितःप्रतिदिनमभिवर्द्धमानप्रभावो भूविक्रमनामधेयः। अपि च

नानाहेतिप्रहारप्रविघटितभटोरःकवाटोत्थितासृग्
धारास्वादप्रमत्तद्विपशतचरणक्षोदसम्मर्द्दभीमे।
संग्रामे पल्लवेन्द्रन्नरपतिमजय्द्योविळन्दाभिधाने
राजा श्रीवल्लभाख्यस्समरशतजयावाप्तलक्ष्मीविलासः॥ १॥

तस्यानुजो नतनरेन्द्रकिरीटकोटि
रत्नार्क्कदीधितिविराजितपादपद्मः ।
लक्ष्म्या स्वयंवृतपतिर्न्नवकामनामा
शिष्टप्रियोऽरिगणदारुणगीतकीर्त्तिः ॥ २ ॥

तस्य कोंगुणिमहाराजस्य शिवमारापरनामधेयस्य पौत्रः समवनतसमस्त सामन्तमकुटतटघटित बहलरत्नविलसदमरधनुःखण्डमण्डितचरणनख मण्डलो नारायणचरणनिहितभक्तिः शूरपुरुषतुरगवरवारणघटासंघट्ट दारुणसमरशिरसि दर्शितात्मकोपो भीमकोपः प्रकटरतिसमयसमनुवर्त्तन चतुरयुवतिजनलोकधूर्तो लोकधूर्त्तः सुदुर्द्धरानेकयुद्धमूर्ध्नि लब्धविजय संपदहित गजघटाकेसरी राजकेसरी । अपि च

यो गंगान्वयनिर्म्मलांबरतलव्याभासनप्रोल्लसन्
मार्त्तण्डोऽरिभयंकरश्शुभकरः सन्मार्ग्गरक्षाकरः ।
सौराज्यं समुपेत्य राजसमितौ राजन्गुणैरुत्तमै
राजा श्रीपुरुषश्चिरं विजयते राजन्यचूडामणिः ॥ ३ ॥
कामो रामासु चापे दशरथतनयो विक्क्रमे जामदग्न्यः
प्राज्यैश्वर्य्यै बलारिर्बहुमहसि रविः स्वप्रभुत्वे धनेशः ।
भूयो विख्यातशक्तिः स्फुटतरमखिलप्राणभाजां विधाता
धात्रा सृष्टः प्रजानां पतिरिति कवयो यं प्रशंसन्ति नित्यम् ॥ ४ ॥

तेन प्रतिदिनप्रवृत्तमहादानजनितपुण्याहघोषमुखरितमन्दिरोदरेण श्रीपुरुष प्रथमनामधेयेन पृथिवीकोंगुणिमहाराजेन एकोनसप्तत्युत्तरषट्छतेषु शक

वर्षेष्वतीतेष्वात्मनःप्रवर्द्धमानविजयैश्वर्य्यसंवत्सरे द्वाविंशे वर्त्तमाने कोणिगिल्नगरमधिवसति विजयस्कन्धावारे माघमासशुक्लपक्षत्रयोदश्यां पुनर्व्वसुनक्षत्रे बृहस्पतिवारे काश्यपगोत्राय तैत्तिरीयचरणाय प्रावचन कल्पाय केसम्मडिवास्तव्याय नन्दशर्म्मणाःपौत्राय माधवशर्म्मणःपुत्राय नन्दीश्वरशर्म्मणे मरुगरेविषये ऐडेदिन्डेनामधेयमध्येतोळ्ळेनदीदक्षिण पार्श्वे अगळिनामग्रामस्सर्व्वपरिहारयुक्तमुदकपूर्व्वन्दत्तः। स च ग्रामः पुनस्तथैव तेन . नन्दीश्वरशर्म्मणा स्वयमपुत्रकत्वादात्मानुजस्य नागशर्म्मणः पुत्राभ्यां माधवशर्म्ममारशर्म्मभ्यां राजसमक्षं पुत्रीकृत्य उदक पूर्व्वन्द त्तः। महाराजाधिराजपरमेश्वरश्रीपुरुषदेवेनापि तथा प्रसादः कृतः। अस्य दानस्य साक्षिणः षण्णवतिसहस्त्रविषयप्रकृतयः। योऽस्यापहर्त्ता लोभान्मोहात्प्रमादाद्बाधेत ततस्स पञ्चभिर्म्महद्भिः पातकैस्संयुक्तो भवति। यस्सम्यग्रक्षति स पुण्यभाग्भवति। अपि चात्र मनुगीताः श्लोकाः।

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम्।
षष्टिं वर्षसहस्त्राणि विष्ठायां जायते क्रिमिः॥ ५॥
स्वन्दातुं सुमहच्छक्यं दुःखमन्यस्य पालनम्।
दानं वा पालनं वेति दानाच्छ्रेयोऽनुपालनम्॥ ६॥
बहुभिर्व्वसुधा भुक्ता राजभिस्सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ ७॥
ब्रह्मस्वन्तु विषं घोरं न विषं विषमुच्यते।

विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रिकम् ॥ ८ ॥

सर्व्वकलाधारभूतचित्रकलाभिज्ञेन विश्वकर्म्माचार्य्येणेदं शासनं लिखितं । चतुष्कण्डुकव्रीहिवापक्षेत्रे द्विकण्डुककुल्यं क्षेत्रं तदपि ब्रह्मदेयमिव रक्षणीयम् । श्री ।

Summary

Victory to worshipful Padmanābha with the lustre of the clouldless sky.

In the Gaṅga dynasty and in the Kāṇvayana sagōtra there was Koṅganivarmma-dharmma-mahārāja, who with his one stroke of the sword had smashed the mighty stone pillar; His son who was the well-learned and who properly protected the subjects was Śrīman-Mādhava-mahārāja. His son was Hari-varmma-mahādhirāja. His son was Vishṇu-gupta-mahādhirāja who had worshipped the Brahmins, elders and god. His son was Śrīman-Mādhava-*mahādhirāja* who was devoted to God Śiva. His son was Koṅgani-mahārāja Avinīta, who was the son of the sister of Kṛishna-varmma-mahādhirāja who was the Sun in the sky of Kadamba dynasty. His son was Durvvinīta, who had possessed *prabhutva-śakti*, *mantra-śakti* and *utsāha-śakti*, who had conquered the enemies in the battles like Andari, Ālattūr, Poruḷarē, Perunagara, and others, who had written commentary on the fifteenth sarga of Kiratārjunīya. His son was Mushkara who had shattered the skulls of elephants. His son was Śrī-vikrama who was through in the exposition and practice of Nītiśāstra. His son was Bhūvikrama, *alias* Śri-vallabha who had smashed elephants of the enemies in many battles, who had mastered all arts and sciences and who had conquered the Pallava king at a place known as Viḷandā. His younger brother was Navakāma who had the other name as Koṅgaṇi-mahārāja and Śivamāra.

His grandson was Śrīpurusha, whose feet were worshipped by many feudatrories, who were devoted to God Nārāyaṇa, who was furious on the battle-fronts. He was like Kāma among women, in archery he was like Rāma, the son of Daśaratha. In valour he was like Paraśurāma, the son of Jamadagni. He had great wealth like Indra (the killer of the demon, named Bala), he was like Sun on his having great glory, he was like Dhaneśa (Kubera) in possessing great property, he was the dispenser (vidhāta), in having the well-known power to create the living beings.

This was Pṛithivī-Konguṇi-mahārāja *alias* Śrīpurusha, whose palace was echoed by religious incantations because of his being engaged in giving great *dānas* every day..

On the Thursday, the thirteenth of the bright fortnight of Māgha in the Punarvasu asterism on the elapsing of the Śaka year 669 which is the twentysecond year of his victorius reign, when he was residing in Kongil-nagara[1], the village of Agaḻi which was on the river Toḻḻe[2] and in the midst of the locality named Eḍedinde[2] in Maṟugare-vishaya[2], was granted with due libations of water to Nandīśvara-śarmman, son of Mādhava-śarmman, and grandson of Nanda-śarmman, belonging to Kaśyapa-gōtra, taittirīya-charaṇa and prāvachana-kalpa and hailing from Kēsammaḍi[3], with all exemptions and privileges.

Again, that village was transferred by that Nandīśvara-śarmman, through the ritual of pouring of water, to Mādhava-śarmman and Māṟa-śarmman, the sons of his brother Nāga-śarmman, after duly adopting them as his own sons due to his being sonless, in the presence of the king,

Mahārājādhirāja-Paramēśvara-Śrīpurusha, has approved This with his gracious pleasure. The witnesses to the grant were the people of 96,000 vishaya[4].

[Four of the imprecatory verses from Manu]

This charter was written by Viśvākarma-āchārya.

Two *kaṇḍukas* of land out of the four *kaṇḍukas* were given to Viśvakammāchārya. The rest would be *brahmadēya.*

Notes

1. Kōnigil-nagara may be the modern Kuṇigal, in Tumkur District, Karnataka (*EI*, XXXVII, p.134).

2. The exact location of the gift village Agaḷi on the bank of the river Toḷḷe and the units, Eḍedinde and Maṟugare is not certain. However Maṟugare is evidently in the Tumkur District. (*ibid.*).

3. Kasummaḍi cannot be identified (*ibid.*).

4. The 96,000 vishaya is the famous Gaṅgavādi 96,000 Division. (*ibid.*)

* * *

No. 51

AINULI PLATES OF KIRTTIVARMAN II

Location : Ainūli, Chincholi Taluk, Gulbarga District, Karnataka
Date : Śaka 671, R.year 4 = 748 A.D.[1]
Script : Early Kannaḍa
Language : Sanskrit
King : Kīrttivarman (II)
Dynasty : Chāḷukya of Bādāmi
Reference : Narasimhachār, R., *MAR,* 1909, pp.12a, 13-14

Text

रणार्णव शरदमलशशधरविशदयशोराशिमयं जयस्तम्भम् अतिष्ठिपद्विक्रमादित्यसत्याश्रयश्रीपृथुवीवल्लभ महाराजाधिराजपरमेश्वरभट्टारकस्य प्रियसूनुः बाल्ये सुशिक्षितशास्त्रशस्त्रश्शत्रुषड्वर्ग्गनिग्रहपरस्वगुणकलापानन्दितहृदयेन पित्रा समारोपितयौवराज्यः प्रकृत्यमित्रस्य पल्लवस्य समुन्मोलनाय कृतमतिरतित्वरया तुण्डाकविषयं पल्लवं समन्ततोविभूय भग्नशक्तिं कृत्वा प्रभूतमत्तमतङ्गजमाणिक्यसुवर्णकोटीरादाय पित्रे समर्प्पितवान् एवं इत्थं क्रमेण समर्प्पितसार्व्वभौमपदः प्रतापानुरागावनतसमस्तसामन्तमकुटमालारजःपुञ्जपिञ्जरितचरणसरसिजः कीर्त्तिवर्म्मसत्याश्रयश्रीपृथुवीवल्लभमहाराजाधिराज परमेश्वरभट्टारकस्सर्व्वानिवमाज्ञापयति विदितमस्तु वोस्माभिरेकसप्तत्युत्तरष्ट्च्छतेषु शकवर्षेष्वतीतेषु प्रवर्धमानविजयराज्यसंवत्सरे चतुर्त्थे वर्त्तमाने भैमरथीनदीपश्चिमे तीरे नेलवोडिगेनामग्रामं अधिवसति विजयस्कन्धावारे आषाडशुद्धाष्टम्यां

श्रीसेन्द्रककुलतिलकायमानश्रीनागशक्तिविज्ञापनया अगत्स्यसगोत्राय बालशर्मणःपौत्राय अज्जशर्म्मणः पुत्राय भवशर्म्मणे काश्यपगोत्राय मादस्वामिनः पौत्राय सोमस्वामिनः पुत्राय सब्बस्वामिने चकरिवोडे विषयतूंबुवरखुपूर्व्वतटे वारिवोळेतूम्बुनामग्रामयोर्मध्ये कारवन्दनामग्रामः भवशर्म्मणे द्वौ भागौ सब्बस्वामिने एकभागं कृ ॥

Translation

There was [2]Vikramāditya II -Satyāśraya-Śrī-Pṛithivī-vallabha-mahārājādhirāja-Paramēśvara-bhaṭṭāraka,

His son was Kīrttivarmman II-satyāśraya-Śrī-Pṛithivī-vallabha-mahārājādhirāja-paramēśvara-bhaṭṭāraka, who even in childhood had received full instructions in the sciences and weaponry (use of weapons) and had mastered them, who was absorbed in (the task of) putting down the six kinds of enemies,[3] who was installed in the *yauvarājya*[4] by his father on being pleased with the string of his (good and great) qualities, who resolved to totally uproot the Pallava, the natural enemy (of his family),[5] expeditiously and reached Tuṇḍāka-vishayam,[6] over-powered comprehensively the Pallava king who confronted him and crushing his power and might, appropriated a huge collection of rutting elephants and crores of precious gems and gold and presented them to his father and thus, in due course had invested him with the distinction of a universal sovereign, whose lotus-like feet are being coloured yellow with the pollen from the garlands of (strung with) the crowns of all the feudatories brought under subjection through his prowess or through their love for him

He orders all. Let it be known to you. By us, when six hundred seventyone Śaka years had elapsed and the fourth year of our ever-growing victorious reign was current, being resident in the village, Nelavoḍige[7] on the western bank of Bhaimarathī river,[7] the victorious camp, on the day of the eighth phase of the bright fortnight in the Āshāḍha month, on the supplication of śrī-Nāgaśakti, who was like the ornament of Sēndraka-kula,[8]

the village named Kāravandar is in between the villages Vāṟivoḷe and Tūmbu on the eastern bank of Tūmbu-varavu in Chakarivode-vishaya,[9] (had been given) to Bhava-śarmman, son of Ajja-śarmman, and grandson of Bāla-śarmman belonging to Agastya-sagōtra and Sabbasvāmin and grandson of Mādasvāmin belonging to Kāśyapa-gōtra, in the ratio of two is to one.[10]

Notes

1. Thouigh the Śaka year (671) quoted is stated to have been the one that had expired, when studied in the light of the revelation made in the Kendūr plates of this same king (see below), it appears that the Śaka year cited might have been current.

2. The editor of this record in *MAR* had stated that the charter consists of five plates strung together with a ring, thus reflecting that the whole charter was made available to him, (this fact is further revealed in the details of the grant he has discussed). However, he chose to present only the text as contained in the fourth plate (of which only the facsimile is found included in the report).

3. The six kinds of enemies referred to are apparently the six bad traits that mar the personality of a man, viz. *kāma* (inordinate desire), *krōdha* (bitterness), *lōbha* (greed and avarice), *harsha* (delight or frivolous happiness), *māna* (self-esteem and pride) and *mada* (conceit and arrogance) (MW, *SED,* p.1109 col.2), Kirttivarman (II) had conquered these failings and he was a sober man.

4. *Yauvarājya* indicated not only the preferment but the significance of being the heir-apparent and being in the position of an associate in the rulership (*cf.* MW, *SED,* p.855 col.3).

5. In the light of the available corroborating evidence from the Pallava side, the antagonism between the Chāḷukyas and Pallavas started with the overrunning of the northern territory of the Pallavas by Pulakēśin II to confront the Pallava Mahēndravarman I on the battle-front very near Kāñchīpuram : The statement that the Pallavas were the natural enemies of the Chāḷukyas suggests that the rivalry

started with the contest for the hold of the Guntur-Nellore region, which was the original nuclear territory of the Pallavas. That was also the right of getting the ownership of Bādāmi by Narasimhavarman I. Thereafter the enemity between these two ruling families was constant.

6. *Vishayam* usually denotes a geographical division which in modern terms can be called a District. Tuṇḍāka-vishaya obviously refers to the basic Pallava kingdom which in Tamil is termed as Toṇḍai-maṇḍalam.

7. The river Bhaimarathī mentioned here is obviously the river Bhīmā, a tributary of river Krishṇā, which flows through Gulbarga district. Nelavoḍige might have been the ancient name of the modern Wāḍi, which is, however, situated to the north of river Bhīmā.

8. This Nāgaśakti of Sēndraka-kula, might have been in charge of the area or considering that Kīrttivarman II was again found camping on the north of Bhaimarathī river (i.e., in the region of that river, in his eleventh regnal year, it would appear that the king was very well aware of the trouble that the rising of Rāshṭrakūṭas was building up for him and was in this region to attempt to counter their moves and foil their plans and the Sēndraka feudatory whose territory was in the region of Banavāsi, was in the king's company to aid him as necessary.

9. All these villages and geographical features have not been identified.

10. From Narasimhachar's write up, it is clear that he had before him the fifth plate also which must have contained the information on the primacy that was given to Bhava-śarmman in this grant as he was given another sizable plot of land in another village. Apart from this, this plate is stated to have contained the usual exhortation and admonition and verses with the same import and the statement that this charter was written by *mahāsāndhivigrahika* Dhanaṁjaya-puṇya-vallabha. As the text contained in this plate has not been made available, the above translation is terminated where the text in the fourth plate stops.

Φ Φ Φ

No. 52

KENDUR PLATES OF KIRTIVARMAN II

Location : Kendur, Khed Taluk, Poona District, Maharashtra

Date : Śaka 672; R.year 6 = 749 A.D.[1]

Script : Early Kannaḍa

Language : Sanskrit

King : Kīrtivarman II

Dynasty : Chāḷukya of Bādāmi

Reference : Paṭhak, K.B., *EI*, IX, pp.200-206

Text

Metres Vv. 1-4 *Anushṭubh*

स्वस्ति । जयत्याविष्कृतं विष्णोर्वाराहं क्षोभितार्णवं ।
दक्षिणोन्नतदंष्ट्राग्रविश्रान्तभुवनं वपुः ॥१ ॥

श्रीमतां ॥ सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां सप्त
लोकमातृभिः सप्तमातृभिरभिवर्द्धितानां कार्त्तिकेयपरिरक्षणप्राप्तकल्याणपरं
पराणां भगवन्नारायणप्रसादसमासादितवाराहलाञ्छनेक्षणक्षणवशीकृता
शेषमहीभृताञ्चालुक्यानां कुलमलंकरिष्णोरश्वमेधावभृथस्नानपवित्रीकृत
गात्रस्य श्रीपोलेकेशिवल्लभमहाराजस्य सूनुः पराक्रमाक्रान्तवनवास्यादि
परनृपतिमण्डलप्रणिबद्ध विशुद्धकीर्त्तिश्रीकीर्त्तिवर्म्मपृथिवीवल्लभमहाराज
स्यात्मजस्समरसंसक्तसकलोत्तरापथेश्वरश्रीहर्षवर्द्धनपराजयोपात्तपरमेश्वर
शब्दस्तस्य सत्याश्रयश्रीपृथिवीवल्लभमहाराजाधिराजपरमेश्वरस्य प्रिय
तनयस्य प्रज्ञातनयस्य खड्गमात्रसहायस्य चित्रकण्ठाख्यप्रवरतुरंग
मेणैकेनैवोत्सादिताशेषविजिगीषोरवनिपतित्रितयान्तरितां स्वगुरोश्श्रियमा

त्मसात्कृत्य प्रभावकुलिशदलितपांड्यचोळकेरळकळभ्रप्रभृतिभूभृददभ्रविभ्रमस्यानन्यावनतकांचीपतिमकुटचुंबितपादांबुजस्य विक्रमादित्यसत्याश्रयश्रीपृथिवीवल्लभमहाराजाधिराजपरमेश्वरभट्टारकस्य प्रियसूनोः पितुराज्ञया बालेन्दुशेखरस्य तारकारातिरिव दैत्यबलमतिसमुद्धतं त्रैराज्य कांचीपतिबलमवष्टभ्य करदीकृतकवेरपारसीकसिंहळादिद्वीपाधिपस्य सकलोत्तरापथनाथमथनोपार्जितोर्जितपाळिध्वजादि समस्तपारमैश्वर्य्यचिन्हस्य विनयादित्यसत्याश्रयश्रीपृथिवीवल्लभमहाराजाधिराजपरमेश्वरभट्टारकस्य प्रियात्मजश्शैशव एवाधिगताशेषास्त्रशास्त्रो दक्षिणाशाविजयिनि पितामहे समुन्मूलितनिखिलकण्टकसंहतिरुत्तरापथविजिगीषोर्गुरोरग्रत एवाहवव्यापारमाचरन्नरातिगजघटापाटनविशीर्य्यमाणकृपाणधारस्समग्रविग्रहाग्रेसरःसन्साहसरसिकः पराङ्मुखीकृतशत्रुमण्डलोगंगायमुनापाळिध्वजपडढक्कामहाशब्द माणिक्यमतंगजादीन्पितृसात्कुर्व्वन्पैरः पलायमानैरासाद्य कथमपि विधिवशादपनीतोपि प्रतापादेव विषयप्रकोपमराजकमुत्सारयन्वत्सराज इवानपेक्षितापरसाहायकस्तदवग्रहान्निर्ग्गत्य स्वभुजावष्टम्भप्रसाधिताशेष विश्वम्भरः प्रभुरखण्डितशक्तित्रयत्वाच्छत्रुमदभंजनत्वादुदारत्वान्निरवद्यत्वाद्यस्समस्त भुवनाश्रयस्सकलपारमैश्वर्य्यव्यक्तिहेतुपाळिध्वजाद्युज्ज्वलप्राज्यराज्यो विजयादित्यसत्याश्रयश्रीपृथिवीवल्लभमहाराजाधिराजपरमेश्वरभट्टारकस्य प्रियपुत्रस्सकलभुवनसाम्राज्यलक्ष्मीस्वयंवराभिषेक समयानन्तरसमुपजातमहोत्साहः आत्मवंशजपूर्व्वनृपतिच्छायापहारिणः प्रकृत्यमित्रस्य पल्लवस्य

समूलोन्मूलनाय कृतमतिरतित्वरया तुंडाकविषयं प्राप्याभिमुखाग्रत
न्नन्दिपोतवर्म्माभिधानं पल्लवं रणमुखे संप्रहृत्य प्रपलाय्य कटुमुखवादित्र
समुद्रघोषाभिधानवाद्य विशेषान्खट्वांगध्वज प्रमतप्रभूतप्रख्यातहस्ति
वरान्स्वकिरणनिकरविकासनिराकृततिमिरम्माणिक्यराशिञ्च हस्ते कृत्य
कलशभवनिलयहरिदंगनां चितकांचीयमानां कांचीमविनाश्य प्रविश्य
सततप्रवृत्तदानानन्दितद्विजदीनानाथजनः नरसिंहपोतवर्म्मनिर्मापित
शिलामयराजसिंहेश्वरादिदेवकुलसुवर्णराशिप्रत्यर्प्पणोपार्जितोर्जित पुण्यः
अनिवारितप्रतापप्रसरप्रतापितपाण्ड्यचोळकेरळकळभ्रप्रभृति राजन्यकः
क्षुभितकरिमकरकरहतदलितशुक्तिमुक्तमुक्ताफलप्रकरमरीचिजालविलसित
वेलाकुले घूर्णमानार्णोनिधाने दक्षिणार्णवे शरदमलशशधरविशदय
शोराशिमयं जयस्तम्भमतिष्ठिपत् विक्रमादित्यसत्याश्रयश्रीपृथिवीवल्लभ
महाराजाधिराजपरमेश्वरभट्टारकस्य सूनुर्बाल्ये सुशिक्षितशास्त्रशास्त्रः
स्वगुणकलापानन्दित हृदयेन पित्रा समारोपितयौवराज्यः स्वकुलवैरिणः
कांचीपतेर्न्निग्रहाय मां प्रेषय इत्यादेशं प्रार्थ्य लब्ध्वा तदनन्तरमेव
कृतप्रयाणस्सन्नभिमुखमागत्य प्रकाशयुद्धं कर्तुमसमर्थं प्रविष्ठदुर्ग्गं पल्लवं
समन्ततोभिभूय भग्नशक्तिं कृत्वा प्रभूतमत्तमतंगजसुवर्णमाणिक्यकोटी
रादाय पित्रे समर्प्पितवानेवं क्रमेण प्राप्तसार्व्वभौमपदः प्रतापानुरागावनत
समस्तसामन्तमकुटमालारजः पुंजपिंजरितचरणसरसिरुहः कीर्तिवर्म्म
सत्याश्रयश्रीपृथिवीवल्लभमहाराजाधिराजपरमेश्वरभट्टारकस्सर्वानिवमाज्ञाप
यति। विदितमस्तु वोस्माभिर्द्विसप्तत्युत्तरषट्छतेषु शकवर्षेष्वतीतेषु

प्रवर्द्धमान विजयराज्यसंवत्सरे षष्ठे वर्त्तमाने रक्तपुरमधिवसति विजयस्कन्धावारे वैशाखपौर्णमास्यां सोमग्रहणे काश्यपगोत्राय वाजप्पशर्म्मणः पौत्राय माकयवाजपेययाजिनः पुत्राय वेदवेदांगपारगाय रामशर्म्मणे वेळ्वोलविषये पेण्वसारुकिसुमंगलंसुळ्ळंपेर्वळ्ळिनाम ग्रामाणाम्मध्ये बेप्पट्टिनाम ग्रामो श्रीमहादेविविज्ञपनया दत्तः तदागामिभिरस्मद्वंश्यैरन्यैश्च राजभिरायुरैश्वर्य्यादीनां विलसितमचिरांशुचञ्चलमवगच्छद्भिराचन्द्रार्कधरार्णवस्थितिसमकालं यशश्चिकीर्षुभिस्स्वदत्तिनिर्व्विशेषं परिपालनीयमुक्तञ्च भगवता वेदव्यासेन व्यासेन ।

बहुभिर्व्वसुधा भुक्ता राजभिस्सगरादिभिः ।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं ॥ २ ॥

स्वन्दातुं सुमहच्छक्यं दुःखमन्यस्य पालनं ।

दानं वा पालनं वेति दानाच्छ्रेयोनुपालनं ॥ ३ ॥

स्वदत्तां परदत्तां वा यो हरेत वसुन्धरां ।

षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिरिति ॥ ४ ॥

धनंजयपुण्यवल्लभेन लिखितमिदं ॥

Summary

After eulogizing the *Varāha-avatāra* of Vishṇu, the inscription gives the descriptive genealogy of the Chālukyas of Bādāmi upto Vikramāditya II. His son Kirtivarma is said to have been well trained in the *śāstras* and the use of the *śastras* even when he was a child. When he was anointed as *yuvarāja* by his father who was pleased with him, he requested the latter to send him to Kañchi to subdue the lord of Kañchi who was the enemy of the family. On being permitted, he entered Kañchi and

defeated the Pallava king who could not put up a straight fight and took shelter within the fort. Having defeated him thoroughly, Kirtivarma acquired large number of elephants and huge wealth which he presented to his father. He then obtained sovereignty and was bowed down by the *sāmants.* Further, he orders all the people thus :

Be it known to you that while camping at Raktapura[1], in the Śaka year 692 in the prosperous 6th year of rule, on Vaiśakha Pūrṇimā on the occasion of Lunar eclipse, I have given, at the request of the chief queen, the village Bēpaṭṭi[2] surrounded by Peṇbasaru Kisumangala, Suḷḷa and Perbalḷḷi[3] in Veḷvola-vishaya[4] to Rāmaśarma, the son of Mākaya, the performer of the Vajapēya sacrifice. and grandson of Vājappaśarma of Kāśyapa-gōtra.

The future kings and others are requested to protect this grant. Imprecatry verses follow. The charter was written by Dhananjaya-punyavallabha

Notes

1. Raktapuram is the same as Kiśurōḷal or modern Paṭṭadkal in Hungund Taluk of Bagalkot District, Karnātaka.

2. Bēpaṭṭi is modern Byahatti in Dharwad district, Karnataka.

3. Suḷḷa and Perbaḷḷis (modern Hebballi) are in the Dharwad district, Karnataka.

4. Veḷvola-vishaya usually figuring as Beḷvola-vishaya comprised of Gadag region in Gadag district, Karnataka.

* * *

No. 53

MANOR PLATES OF DANTIDURGA

Location : Mānōr, Pālhar Taluk, Thāṇa District, Maharashtra
Date : [Śaka] 671 = 749-50 A.D.
Script : Early Nāgarī
Language : Sanskrit
King : Dantidurga
Dynasty : Rāshṭrakūṭa
Reference : Mirashi, V.V., *IHQ*, XXXV, p.183 f.

Text

सिद्धं सवस्ति। संवत्सरशतेषु षट्सु एकसप्तत्यधिकेषु सं ६०० ७० १
समधिगतपंचमहाशब्दपृथिवीवल्लभ खड्गावलोकश्रीदन्तिदुर्ग्गराजप्रवर्द्ध
मानराज्ये तत्पादानुध्यातश्रीअनिरुद्धप्रभुज्यमाने श्रीपुरे भगवतो ब्रह्मणः
पादमूले तत्रत्यत्रैविद्यमहाजनप्रमुखबोडवर्म्मभोगिकदुर्ग्गभोगिकदेव
वर्म्मभोगिकगोवीयसंगभोगिकगोवियप्रमुखमहाजनेन कौण्डिन्यसगोत्र
स्वामिधर्म्मभट्टतत्पादानुध्यात बादडिभोगिककारितबादेश्वरदेवायतनाय
श्रीपुरविषयान्तर्ग्गततंबसाहीकाग्रामः खण्डस्फुटितसंस्कारार्थं उदकपूर्व्वं
दत्तः। तत्काले गच्छता नकैश्चिद्व्यासेधः कार्य्यः। यः कश्चित्कुब्वाध्या
वमानी विवदते स पंचभिर्म्महापातकैः संयुक्तो भवति संगभोगिकसंग
आचडिवैरमकुण्णम्मश्रीनगरप्रमुखैः दत्तम्। बोदडिभोगिकोत्र सामान्य।
सोनार चण्डहरि। लिखितं चेदं देवकत्रिभोगिकेण।

Translation

Established ! Well-being ! In the year six hundred increased by seventy one, saṁ[1] 600 70 1

In the increasingly (prosperous) kingdom of śrī-Dantiyadurgga-rāja; who has acceded to the five great sounds, who is the master of the earth,[2] and whose look is sharp and cutting like a sword.

In Śrīpura[3], which is being enjoyed by śrī-Aniruddha, meditating on his (Dantiyadurga's) feet,

at the feet of the worshipful Brahmā,[4] by the *traividya-mahājanas*[4] there, headed by Bōḍavarmma-bhōgika[5], Durgga-bhōgika, Daevamma-bhōgika, Gōviya-saṅga-bhōgika and Goviya

the village taṁbasāhīka[6] situated in Śrīpura-vishaya[3] has been granted with libation of water for the purpose of (carrying out) repairs and renovation to the temple of Bādēśvara, constructed by Bādaḍi-bhōgika, meditating at the feet of Svāmi-dharmma-bhaṭṭa of Kauṇḍinya-sagōtra[7]

[The grant is followed by the usual cautioning against disturbing, this grant]

saṁga-bhōgika, Saṁga, Āshaḍivaivama and Kuṇṇamma[8]

Bodaḍi-bhōgika is the sāmānya[9] here

The goldsmith,[10] Chaṇḍahari

This has been written by Dēvaka-tribhōgikas [10]

Notes

1. Here also (cf. above) the era to which the year cited belonged is not stated. That it must have been Śaka is an inference on circumstantial evidence.

2. Of the adjectival epithets of the ruler Dantiyadurgga cited here. *samadhigata-pañcha-mahāśabda* is usually associated with feudatories, but the others are those of independent rulers.

3. Śrīpura has been doubtfully identified with Śirgaon, on the coast, fourteen miles west of Manor and four miles from Pālghar. It seems to have been an important town of the Vishaya named after it. (*IHQ*, XXXV, p.187).

4. Brahmā mentioned in the context may not have been the main deity at a temple dedicated to him but the patron-God of the institution, Traividyā (with a small shrine therein which was probably a centre for teaching the three *vēdas.* The *mahājanas* referred to might have been the teacher-administrators of that institution as also the leading land holders in that village being the *de facto* holders of land in the village, which actually belonged to the institution. Such a designation of an educational institution was probably peculiar to the Gūjarat region (*csf* Sircr, D.C., *IEG*, p.289). The grantors/teachers seem to have taken the blessings of Brahmā before making the grant as probably all the villages and lands in the enjoyment of the temple/educational institution was held in the name of the God Brahmā (*cf. IHQ*, XXXV, pp.186-87).

5. *Bhōgika* or in the derived form *bōya* is often met with in the inscriptions of the region. It seems to have referred to those members of the village holding sizable land therein and enjoying membership in the body administering the village (*cf. ibid.*, p.55).

6. Taṁbasāhikā has been doubtfully identified with Tamsāhī, about two miles from Mānor (*IHQ*, XXXV, p.187)

7. It is noteworthy that of all the Brahmins mentioned in the record, the builder of the temple is the only one in whose case the *gōtra* is cited.

8. It appears that the whole body of the leading citizens (*mahājanas*) had given the grant. This fact probably explains the citing of different sets of the mahājanas at the two places where such a set is given.

9. Probably Bōdadi-bhōgika represented the whole body of the land holders and the term *sāmānya* seems to have indicated this fact. (Sircar, D.C., *IEG*, p.289).

10. Goldsmith was required to engrave the record on metals, copper-plates.

11. Tri-bhōgika as a surname indicates that the concerned had three shares in the village.

* * * *

No. 54

ATIYA INSCRIPTION FROM NAMAKKAL

Location : Nāmakkal, Salem District, Tamilnadu
Date : C. 750 A.D.
Script : Grantha
Language : Sanskrit
King : Guṇaśila
Dynasty : Atiyaman
Reference : Srinivasan, K.R. and Srinivasan, P.R., *EI*, XXXVI, pp.131-138

Text

Metre : Vv.1, 4 *Āryā*; 2 *Śārddulavikrīḍita*; 3 *Anushṭubh*

अतियकुल . . . . . नुःककुभान्दर्प्पणमिदं गृहम्विष्णोः ।
श्रीगुणशीलो नृपतिः कारितवानतियनाथविष्णुगृहम् ॥ १ ॥

ओं ॥

मार्क्कण्डेयमहर्षिसुपर्ण्णवरुणब्रह्मेशदक्षाशशी
सूर्यस्तुम्वुरुनारदौ गुरुभृगू शार्ङ्गञ्च कौमोदकी ।
चक्रं नन्दकपाञ्चजन्यसहितः कर्त्रे दिशन्तु श्रियं
भ्राजन्ते मधुकैटभक्षयिकृतश्शय्यागृहेद्रेर्वृताः ॥ २ ॥

. . . . त्रषु यस्याद्येषु यशस्विषु ।
सोमः पूर्व्वोतियेन्द्राणाम् दौहित्रेष्वन्वयेस्थितः ॥ ३ ॥

अतियान्वयगुरुणा नरपतिनाम्नवति . . . . ।
अतियेन्द्रविष्णुगृहमितिममुना कारितं कृतिना ॥ ४ ॥

१ उत्पलकर्ण्णिकः

२ नरवाहनः

३ मदनविलासः

४ मानसारः

५ नयपरः

६ नरदेवः

७ प्रकृतिप्रियः

८ उदारचित्तः

९ विमलचरितः

Translation

Verse 1 Atiyakula . . . . God Vishṇu's mansion has the mirror. The Atiyanātha-Vishṇu's palace or temple had been constructed by the king.

Verse 2 The couch of the [God Vishṇu] one who had killed (the demons) Madhu and Kaitabha, around His mountain there are Mārkkaṇḍēya-maharshi, Parṇṇa, Varuṇa Brahma, Īśa, Daksha, Moon, Sun, Tumburu, Nārada, Bhṛgū (who is a preceptor) the weapons of this God) Śāriṅga (the bow), the club (given by Varuṇa, discus, sword (named Nandakā), Pāñchaganya (named as Conch). He has also abundant wealth from his own wife named (Śrī or Lakshmī)

Verse 3 There was Sōma, one of the earlier Atiya kings, who was in the dynasty and who was also a woman's son.

Verse 4 One of the kings in Atiya dynasty had constructed the temple known as Atiyendra-Vishṇugṛiham.

The Birudas (laudatory exploits)

Utpala-Kārunikaḥ

Naravahanaḥ

Madana-vilāsaḥ
Māna-sāraḥ
Nayaparaḥ
Naradēvaḥ
Prakṛiti-priyaḥ
Udāra-chittaḥ
Vimala-charitaḥ
Udarachitaḥ
Vimalacharitaḥ

* * * *

No. 55

TENALI PLATES OF VIJAYADITYA

Location : Tenali, Guntur District, Andhra Pradesh
Date : C. 750 A.D.
Script : Telugu-Kannaḍa
Language : Sanskrit
King : Vijayāditya
Dynasty : Eastern Chālukya
Reference : Gai, G.S., *EI*, XXXVI, pp.297-300

Text

Metres : Vv.1-2 *Anushṭubh*

सिद्धं ॥ स्वस्ति श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारितीपुत्राणां कौशिकीवरप्रसादलब्धराज्यानां मातृगणपरिपालितानां भवन्नारायणप्रसादसमासादितवरवराहलाञ्छनेक्षणवशीकृताराातिमण्डलानां अश्वमेधयाजिनां चलुक्यानां कुलमलंकरिष्णोः चतुरुदधिजलविलंघितयशसो विजयसिद्धिश्रीमंगियुवराजस्य पौत्रः निजभुजनिशितासिधाराप्रशमितपरचक्रविक्रमस्य सर्व्वळोकाश्रयस्य जिष्णोः श्रीविष्णुवर्द्धनमहाराजस्य प्रियतनयः स्वप्रभावोपलब्धप्राज्यराज्यः कौन्तेय इव दुःशासनक्षयकरः कार्त्तिकेय इवाप्रतिहतस्वामिशब्दः शक्तित्रयालङ्कृतः परमब्रह्मण्यः परममाहेश्वरो मातापितृपादानुध्यातः समस्तभुवनाश्रयः श्रीविजयादित्यो महाराजाधिराजपरमेश्वरः [विळानाण्डुविषयनिवासिनो राष्ट्रकूटप्रमुखान् कुटुम्बिनः सर्व्वानित्थमाज्ञापयति] विदितमस्तु वो यथास्माभिः काराञ्चेडुवास्तव्याय आपस्तम्भसूत्राय वेवेदांगेतिहासपुराणोपनिषदर्त्थतत्वज्ञाय हारितगोत्राय देवशर्म्मणः पौत्राय पितुस्समान

गुणस्य श्रीकुमारशर्म्मणः पुत्राय सदानुष्ठीयमानपञ्चमहायज्ञवक्रियाय सदा तिथ्याराधनतत्पराय भट्टारकाय देवशर्म्मणे विळानाण्डुविषये सवितुरु दगयने चन्द्रग्रहणनिमित्ते अस्मदायुरारोग्याभिवृद्धये सर्व्वबाधापरिहारेण शङ्खरंबुंनामग्रामो दत्तः तस्य पूर्व्वतः कावुरीसीमावधिः दक्षिणतः गोट्टि मुकसीमावधिः पश्चिमतः सन्नव्रोलिसीमावधिः उत्तरतः इंटुरिसीमावधिः अस्योपरि न कैश्चित् बाधा करणीयः यः करोति स पञ्चभि र्म्महापातकै स्संयुक्तो भवति अत्र व्यासगीतौ श्लोकौ

बहुभिर्व्वसुधा दत्ता बहुभिश्चानुपालिता ।
यस्य यस्य यदाभूमिस्तस्य तस्य तदा फलम् ॥ १ ॥
स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।
गवां शतसहस्रस्य हन्तुः पिबति किल्बिषम् ॥ २ ॥
आज्ञप्तिरस्य धर्म्मस्य निर्म्मलो धर्म्मसंग्रहः ।
एरय्यवर्म्मा इति विख्यातः उन्नतचित्तो विचक्षणः ॥ ३ ॥

लिखितं अर्जुनस्य पुत्रेण ईशानवर्म्मणा ॥

Summary

The inscription narrates the whole *praśasti* of the Chālukya kings upto Vijayaditya, the son of Vishṇuvardhana, who had obtained the kingdom by his own strength and who destroyed the wicked rulers just as the son of Kunti killed Duśyāsana, who, like Kārtikēya came to be known as unquestioned master, and who was endowed with the three powers.

This king orders all the residents of Viḷānāṇd-vishaya headed by the *rāshṭrakūṭas* thus : I have given the village Śancharaṃbu free from all imposts, situated in Viḷānāṇḍu-vishaya to *bhaṭṭāraka* Dēvaśarma who was learned in *Vēdas, Vēdangas* and other sciences, who was always engaged in the performance of *pañcha-mahāyajñas*, who was a resident of Kārānchēḍu and who was the grandson of Dēvaśarma and the son of Kumāraśarma of Hāritī-gōtra and Āpastuṃbha-sūtra. The boundaries of the grant village are given.

Imprecatory verses follow.

The *Ājñapti* was the learned Esrayyavarma. The inscription was written by Iśānavarma, the son of Arjuna.

* * *

No.56

CHHOTI DEORI INSCRIPTION OF SANKARAGANA

Location : Choti Deori,[1] Murvara Tahsil, Jabalpur District, Madhya Pradesh
Date : C 750 AD.[2]
Script : Early Nāgarī[3]
Language : Corrupt Sanskrit influenced by Local dialect
King : Śankaragaṇa
Dynasty : Kalachuri of Tripuri
Reference : Mirashi, V.V, *CII*, IV, pp. 176-78.

Text

Metre :V.1 *Vaṁśastha*

सिद्धिः नमः।

जटाधरः खंडशशांकशेखरः कपालमालः सितभस्मधूसरः।
दुरात्महा पन्नगधारिकंकणः सदा शिवं वो विदधातु शंकरः॥ १॥

ककदकुटुधुतु शंकरश्रीशंकरगणदेवराज्ये ककंदकुटुविषये श्रीचुदुनागकः। करीकतिनि असेकतिनि अमुकेनैव लिखितं कृदरं पुनर्लिखितं। सर्वप्रमाणमिति। इहके लिखितं तत् सर्व प्रमाणमिति।

Translation

Verse Well being ! Obeisance ! May Śiva, who wears matted locks, whose head is adorned by the crescent moon, who wears a garland of skulls, whose body is grey with white ashes, who destroys evil-minded (people), who wears the bracelet of serpents, always bestow his blessings on you all !

In the family of Kakada Śaṅkara

In the kingdom of Śaṁkaragaṇa-dēva[5], in the *vishaya* of Ḳakaṅdakuṭa[6] (there is) Chuṭu-nāgaka

By him (the grant is made) through writing (written document) of the store-house[6] (granary ?) in (the villages) Karikatin (and) Aśēkatin[7]. What is written here is the authority[8]. What is written here is the authority.

Notes

1. The village is so-called.probably to distinguish it from the larger village named Deori which lies about five miles to the west. It is also called Maḍhā Deori on account of a number of small temples (*mathīs*) thirty to forty in number, which lie buried in dense jungle. According to Cunningham, all these were most probably Śaiva shrines. The pillar on which the present inscription is incised must have also belonged to a Śaiva temple as is indicated by its contents.

2. The ascription of this approximate date to this record is based on the reasoning of Mirashi *(CII*, IV, p.177)

3. This represents a certain stage in the evolution of the Brāhmī script into Nāgarī in the north of India.

4. The expression "Kakada kuṭudhutu Śaṅkara-"preceding the mention of "*Śrī-śaṅkara-gaṇa-dēva-rājyē*" is a puzzling one. As the language of the inscription is mixed with local dialect, it is possible to interpret only tentatively that Śaṅkara (referred to as śrī-Śaṅkaradēva subsequently) belonged to the family (*kuṭu-kuṭumba* of Kakada) of Kakada. The expression, "*kakaṁda kuṭu*-vuśe " as read by Mirashi in the latter part of the inscription, might have had reference to the similar expression in the preceding part of the inscription. By reading the last two syllables as *vuśe* instead of *dhuśe* Mirashi was enabled to interpret that it stood for *vishayē* and that *kakadakuṭu* was the name of the *vishaya* of which Chuṭu-Nāgaka was in charge. It is possible that the suffix *kuṭu* was the local colloquial form of kōṭa i.e. fort (and that *kakada* or *kakaṁ-de-kōṭe* was the seat of Śankara/Śaṅkaragaṇa. Interpreted this way, it will be difficult to explain how śrī-chuṭu-Nāgaka was in the charge of a *vishaya* around Kahada-kōṭa. As the expressions stands in the inscription, nothing definite can be asserted. *cf. CII*, IV, p.177 n.12-13.

5. Though Mirashi has assigned Śaṅkaragaṇa mentioned in this inscription, to a branch of the Kalachuris at Tripurī (*CII*, IV, p.LXVII f) the records he has cited in support of this (The Bilhari inscription of Yuvarājadēva – *ibid*., No.45; Benaras Plates of Karṇa - [Kalachuri]

year 793 – *ibid.*, No.48) do not refer to this branch of rulers as Haihayas descended from Kārtavīryārjuna of Purāṇic fame (See above Vol.I, pp.143-145). According to Mirashi, the Kalachuris called themselves Haihayas, *ibid*, p. CLXVII. These records do not state that they had Tripurī as their capital. Mirashi has apparently identified Śaṅkargaṇa of the present record with the earliest king of that name mentioned in the Benaras plates mentioned above, and who is stated to have been one of the kings protected by Kōkkala, the earliest historical Haihaya ruler mentioned therein.

6. Ḳakanda kuṭu, (on the assumption it was a place name) has been doubtfully identified with Khuṭundā, about 6 miles to the east of Deori (*CII*, IV, p.177). However see *Gazetteer of India and Pakistan*, p.550. Several villages with *kakad* forming the prefix of their names are still stated to be existing. Kakadkōt which was probably flourishing in the 7th century may not be existing now.

7. In Karīkatin and Asēkatin, it is noteworthy, that there is the suffix *katin.* They have been interpreted to have been place-names, Mirashi says; that the word "karī katin" which in its initial portion resembles Kārītalāi (situated about 30 miles to the east) which is perhaps represented by Khurai, 4 miles to the south of Deori Maḍhā. Asēkatin cannot be identified. (*ibid.*, p.177).

8. This statement (recorded twice) is the most intelligible part of this record.

* * * *

No. 57

SAUGOR INSCRIPTION OF SANKARAGANA I

Location : Saugor, Saugor District, Madhya Pradesh.

Date : C. 750 A.D.[1]

Script : Early Nāgarī

Language : Sanskrit

King : Śaṅkaragaṇa (I)

Dynasty : Kalachuri of Tripurī

Reference : Mirashi, V.V., *EI*, XXVII, p.163 f; *CII*, IV, pp.174-76

Text

सिद्धिः । ओं नमः शिवाय । स्वस्ति । परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीवामराजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीशङ्करगणदेवप्रवर्द्धमानविजयराज्ये कशपुरपरमेश्वरकलाईरियवंशोद्भवज्योतिस्सन्ततिरावार्यराजपुत्रश्रीदेउकः । तस्यैव भार्या लोणियवंशे प्रसूता राज्ञी श्रीकृष्णदेवी या चैतन्मातापितृपुण्यार्थं क्षितितले कीर्त्तिं प्रख्यापयति । तवालोकामला इति ॥

Translation

[Auspicious symbol] Obeisance to Śiva. In the ever growing kingship of parama-bhaṭṭāraka-mahārājadhīrāja-paramēśvara-śrī-Śaṅkaragaṇa-dēva, who meditated on the feet of parama-bhaṭṭāraka-mahārājadhīrāja-paramēś-vara-śrī-Vāmarājadēva.

There was Śrī-Dauka, son of Rāvāryarāja, the lord of Kaśapura and an illustrious Kalāiraya-vaṁśa. His wife was Śrī-Krishṇadēvī born in the family of Lōṇiyā. She did the pious deed[2] for the merit of her parents.

Notes

1. This approximate date has been given by Sri V.V.Mirashi.

2. The *kīrti* can be a pious deed (Sircar, D.C., *IEG*, p.,158).

* * *

No. 58

JAVALI PLATES OF SRIPURUSHA

Location : Jāvali, Mūḍagere Taluk, Chikmagalur District, Karnataka

Date : Śaka 672, year 25, Vaiśākha śu.10, Uttarā-phalgunī, Monday, Vrishabha, rāśi saṅkrānti = 750 A.D.

Script : Early Kannaḍa

Language : Sanskrit

King : Śrīpurusha

Dynasty : Western Gaṅga

Reference : Lewis Rice, *EC*, VI, Mg.36; Ramesh, K.V., *IWG*, pp.162-67.

Text

Metre : V.1, 2, 5 *Sragdharā*; 3 *Vasantatilakā*, 4 *Śārdūlavikrīḍita* ; 6-14 *Anuṣhṭubh* .

सिद्धम्। स्वस्ति ॥

जितं भगवता गतघनगगनाभेन पद्मनाभेन।
श्रीमज्जाह्नवेयकुलामलव्योमावभासनभास्करः ॥ १ ॥

स्वखाड्गैकप्रहारखण्डितमहाशिलास्तम्भलब्धबलपराक्रमो दारुणारिगणविदारणोपलब्धव्रणविभूषणविभूषितः काण्वायनसगोत्रः श्रीमत्कोङ्गणिवर्म्मधर्म्ममहाधिराजस्तस्य पुत्रः पितुरन्वागतगुणयुक्तो विद्याविनयविहितवृत्तः सम्यक्प्रजापालनमात्राधिगतराज्यप्रयोजनो विद्वत्कविकाञ्चन

निकषोपलभूतो नीतिशास्त्रस्य वक्तृप्रयोक्तृकुशलो दत्तकसूत्रवृत्तेःप्रणेता श्रीमान्माधवमहाधिराजः तत्पुत्रः पितृपैतामहगुणयुक्तोऽनेकचातुर्द्दन्तयुद्धावाप्तचतुरुदधिसलिलास्वादितयशाः श्रीमद्धरिवर्म्ममहाधिराजः तत्पुत्रो द्विजगुरुदेवतापूजनपरो नारायणचरणानुध्यातः श्रीमान्विष्णुगोपमहाधिराजः तत्पुत्रः त्र्यम्बकचरणाम्भोरुहरजःपवित्रीकृतोत्तमाङ्गः स्वभुजबलपराक्रमक्रयक्रीतराज्यः कलियुगबलपङ्कावसन्नधर्म्मवृषोद्धूणनित्यसन्नद्धः श्रीमान्माधवमहाधिराजः तत्पुत्रः श्रीमत्कदम्बकुलगगनगभस्तिमालिनः कृष्णवर्म्ममहाधिराजस्य प्रियभागिनेयो विद्याविनयातिशयपरिपूरितान्तरात्मा निरवग्रहप्रधानशौर्य्यो विद्वत्सु प्रथमगण्यः श्रीमान्कोङ्गणिमहाधिराजः अविनीतनामा तत्पुत्रो विजृम्भमाणशक्तित्रयः अन्दरियाळत्तूप्पोंरुळरेपिळ्नगराद्यनेक समरमुखमखहुतप्रहतंशूरपुरुषपशूपहारविघसविहस्तीकृतकृतान्ताग्निमुखः किरातार्जुनीयपञ्चदशसर्ग्गटीकाकारो दुर्विनीतनामधेयः तस्य पुत्रो दुर्द्दान्तविमृदितविश्वम्भराधिपमौलिमालामकरन्दपुञ्जपिञ्जरीक्रियमाणचरणयुगलनलिनो मुष्करनामधेयः तस्य पुत्रश्चतुर्द्दशविद्यास्थानाधिगमविमलमतिः विशेषतोऽनवशेषस्य नीतिशास्त्रस्य वक्तृप्रयोक्तृकुशलो रिपुतिमिरनिराकरणोदयभास्करः श्रीविक्क्रमनामधेयः तस्य पुत्रः अनेकसमरसंघातविजृम्भितद्विरदरदनकुलिशाभिघातव्रण संरूढभास्वद्विजयलक्षणलक्षीकृतविशालवक्षस्थलः समधिगतसकल शास्त्रार्थतत्त्वस्समाराधितत्रिवर्ग्गो निरवद्यचरितः प्रतिदिनमभिवर्द्धमान प्रभावो भूविक्क्रमनामधेयः। अपि च।

नानाहेतिप्रहारप्रविघटितभटोरकवाटोत्थितासृग्
धारास्वादप्रमत्तद्विपशतचरणक्षोदसम्मर्द्दभीमे ।
संग्रामे पल्लवेन्द्रन्नरपतिमजयद्यो विळन्दाभिधाने
राजा श्रीवल्लभाख्यस्समरशतजयावाप्तलक्ष्मीविलासः ॥ २ ॥

तस्यानुजो नतनरेन्द्रकिरीटकोटि
रत्नार्क्कदीधितिविराजितपादपद्मः ।
लक्ष्म्या स्वयंवृतपतिर्न्नवकामनामा
शिष्टप्रियोऽरिगणदारुणगीतकीर्त्तिः ॥ ३ ॥

तस्य कोंगुणिमहाराजस्य शिवमारापरनामधेयस्य पौत्रः समवनतसमस्त सामन्तमकुटतटघटित बहलरत्नविलसदमरधनुष्खण्डमण्डितचरणनखमण्डलो नारायणनिहितभक्तिः शूरपुरुषतुरगवरवारणघटासंघट्टदारुण समरशिरसि दर्शितात्मकोपो भीमकोपः प्रकटरतिसमयसमनुवर्त्तनचतुर युवतिजनलोकधूर्त्तो लोकधूर्त्तः सुदुर्धरानेकयुद्धमूर्धलब्धविजयसंपदहित गजघटाकेसरी राजकेसरी । अपि च ।

यो गंगान्वयनिर्म्मलांबरतलव्याभासनप्रोल्लसन्
मार्त्तण्डोऽरिभयंकरः शुभकरस्सन्मार्ग्गरक्षाकरः ।
सौराज्यं समुपेत्य राजसमितौ राजन्गुणैरुत्तमै
राजा श्रीपुरुषश्चिरं विजयते राजन्यचूळामणिः ॥ ४ ॥

कामो रामासु चापे दशरथतनयो विक्रमे जामदग्न्यः
प्राज्यैश्वर्य्ये बलारिर्बहुमहसि रविः स्वप्रभुत्वे धनेशः ।

भूयो विख्यातशक्तिः स्फुटतरमखिलप्राणभाजां विधाता
धात्रा सृष्टःप्रजानाम्पतिरिति कवयो यं प्रशंसन्ति नित्यम्॥ ५॥

तेन प्रतिदिनप्रवृत्तमहादानजनितपुण्याहघोषमुखरितमन्दिरोदरेण श्रीपुरुष नामधेयेन पृथिवीकोंगणिमहाराजेन द्वासप्तत्युत्तरषट्छतेषु शकवर्षेष्वतीतेष्वात्मनःप्रवर्द्धमानविजयैश्वर्य्यै संवत्सरे पञ्चविंशे वर्त्तमाने मण्णेग्राममधिवसति विजयस्कन्धावारे वैशाखशुक्लपक्षदशम्यां उत्तराफल्गुनी नक्षत्रे सोमवारे वृषभराशिसंक्रान्तौ आंगीरसगोत्रेभ्यः शिवशर्म्मदेवशर्म्माज्जशर्म्ममाधवशर्म्मनामभ्यः वासिष्ठगोत्राभ्यां श्रीधरमाधवाभ्यां काश्यपगोत्राय सोमशर्म्मणे भरद्वाजगोत्राय कुमारशर्म्मणे इत्युक्तनामपूर्व्वेभ्यो विंशत्युत्तरशतब्राह्मणेभ्यश्चतुर्व्विद्येभ्यो वेदवेदांगपारगेभ्यः धर्म्मशास्त्रसमयज्ञेभ्यः सिन्दाविषये मणलेआळकेत्रिशतपश्चिमभागे पेण्णेनदीपूर्व्वतटे मूर्व्वप्पराजबाधानिराकरणार्त्थं कोंगणिमहाराजाधिकारिभिरनुदिनमनुपालितः तुरगप्रधावननिष्पादितसीमाभ्यन्तरो बेल्पूर्न्नामग्रामः सर्व्वपरिहारयुक्तः उदकपूर्व्वन्दत्तः। अस्य दानस्य साक्षिणः षण्णवतिसहस्रविषयप्रकृतयः। अपि च।

महाराजेन दत्तस्य परिहारस्य बाधकः।
स एव निधनं यातु सपुत्रपशुबान्धवः॥ ६॥

योऽस्मद्वंश्यैरन्यैश्च स्वदाननिर्व्विशेषं परिपालनीयं य एनं लोभान्मोहात्प्रमादाद्द्वेषाद्वापहरेत् बाधेत वा स पञ्चभिर्म्महद्भिःपातकै संयुक्तो भवति कुलञ्चैव प्रणश्यति। अपि चात्र मनुफलिताः श्लोकाः॥

स्वन्दातुं सुमहच्छक्यं दुःखमन्यस्य पालनम् ।
दानं वा पालनम् वेति दानाच्छ्रेयोऽनुपालनम् ॥ ७ ॥
स्वदत्ताम्परदत्तां वा यो हरेत वसुन्धराम् ।
षष्टिम्वर्षसहस्राणि विष्ठायाञ्जायते क्रिमिः ॥ ८ ॥
अन्यायेन हृतो भूमिरन्यायेन तु हारितः ।
हरतो हारयतश्च हनत्यासप्तमं कुलम् ॥ ९ ॥
हर्ता हारयिता भूमेर्म्मन्दबुद्धिस्तमोवृतः ।
स बद्धो वारुणैःपाशैः तिर्य्यग्योनिषु जायते ॥ १० ॥
न विषं विषमित्याहुः ब्रह्मस्वं विषमुच्यते ।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रिकम् ॥ ११ ॥
ब्रह्मस्वं प्रणयाद्भुक्तं दहत्यासप्तमं कुलम् ।
विक्रमेण तु भोज्यन्ते दशपूर्वान्दशापरान् ॥ १२ ॥
भूमिं यःप्रतिगृह्णाति यश्च भूमिं प्रयच्छति ।
उभौ तौ पुण्यकर्माणौ नियतं स्वर्ग्गगामिनौ ॥ १३ ॥
बहुभिर्व्वसुधा भुक्ता राजभिस्सगरादिभिः ।
यस्य यस्य यदा भूमिः तस्य तस्य तदा फलम् ॥ १४ ॥

सर्व्वकलान्तःपातिच्चित्रकलाभिज्ञेन विश्वकर्माचार्य्येणेदं शासनं लिखितं तस्मै चतुष्खण्डुगं व्रीहि द्विकंगुक्षेत्रं दत्तः ॥

Summary

Then the inscription states that Pṛithivī-Koṅganivarma Śripurusha, when he was camping at the village Maṇṇe[1], made a grant of the village Belpūr on the bank of the river Peṇṇe[2] to the south of Maṇalle-Aḷake[3] 300 in Sinda-vishaya to 120 learned brāhmaṇas[4] headed by Sivaśarma and Dēvaśarma, Ajjaśarma and Mādhavaśarma of Āngirasa-gōtra, Śrīdhara and Madhava of Vaśishṭha gōtra. Sōmaśarma of Kaśyapa-gōtra and Kumāraśarma of Bhāradvāja-gōtra. The boundaries of the grant-village were marked by the trotting of horses[5] regularly trained by the officers of Kongaṇi-mahārāja. The witnesses to this grant are the subjects of 96000 vishaya. The grant was made on Vaiśākha śukla daśami, Monday, when Vṛshabha-sankrānti occurred, in the Śaka year 612 in the prosperous and victorious 25th year of the king. The grant was made for warding of the sufferings of three generations of ancestors.

This inscription was written by Visvakarmāchārya, who was an expert in art of painting which included all the arts. He was granted four *khanḍugas* of land growing grains and two *khanḍugas* growing millet.

Notes

1. Maṇṇe is a village in Nelamaṅgala Tāluk, Bangalore District, Karnāṭaka.
2. Probably river Peṇṇe is Tamil river Peṇṇār
3. Āḷakā-300 and Śinda-vishaya have not been identified
4. Hundred and twenty brāhmaṇa might be the convention. .
5. The demarcation of boundaries was done by horses.

ΦΦΦΦ

No. 59

UDAYENDIRAM PLATES OF NANDIVARMAN II PALLAVAMALLA

Location : Udayendiram[1], Gudiyattam Taluk, North Arcot District, Tamilnadu
Date : Regnal year 21 = 753 or 755 A.D.[2]
Script : Grantha
Language : Sanskrit
King : Nandivarman II Pallavmalla
Dynasty : Pallava
Referene : Hultzsch, E., *SII*, II, pp.361-374; Mahalingam, T.V. *Ins. of Pallavas*, No.76, pp.227-239

Text

Metre: V. 1 *Pṛthvī* ; 2, 3, 6 *Vasantatilakā* ; 4 *Bhujaṅgaprayāta* ; 5 *Mattamayūrī* ; 7, 8 *Anushtubh*

श्रीः स्वस्ति।

सुमेरुगिरिमूर्द्धनि प्रवरयोगबन्धासनं

जगत्त्रयविभूतये रविशशांकनेत्रद्वयम्।

उमासहितमादरादुदयचन्द्रलक्ष्मीप्रदं

सदाशिवमहन्नमामि शिरसा जटाधारिणम्॥ १॥

श्रीमाननेकरणभूमिषु पल्लवाय

राज्यप्रदः परिहितः परचक्रदण्डी।

पूचान् कुलस्य तिलकः प्रथितः पृथिव्यां

स्थेयात्स विल्वलपुराधिपतिश्चिराय॥ २॥

भूपालवन्दितपदद्वयपल्लवानां

दानाम्बुभारविनमत्करपल्लवानाम्।
सम्यग्गुणोच्चयनिरस्तविपल्लवाना
म्वंशश्चिरं जगति तिष्ठतु पल्लवानाम्॥ ३॥

अव्यक्ताद्ब्रह्माजायत ब्रह्मणोङ्गिरो अङ्गिरसो बृहस्पतिः बृहस्पतेः शंयुः शंयोर्भरद्वाजः भरद्वाजाद्द्रोणो द्रोणादपरिमिततेजोधामाश्वत्थामा ततो निराकृतकुलविपल्लवः पल्लवः। एवमनुक्रमेण सन्ततिपरम्परयाभिवर्द्धमाने पल्लवकुले भक्त्याराधितविष्णुः सिंहविष्णुः सिंहविष्णोरपि महेन्द्रसदृश विक्रमो महेन्द्रवर्म्मा। तस्मादगस्त्य इव विमथितवातापिः परियळमणि मंगलशूरमारप्रभृतिषु जेता बहुशो वल्लभराजस्य नरसिंहवर्म्मा। तस्य पुत्रः पुनरेव महेन्द्रवर्म्मा। ततः तेरुवळनल्लूर्य्युद्धे विजित वल्लभबलः परमेश्वरवर्म्मा। तस्मात्परममाहेश्वरः परमब्रह्मण्यो नरसिंहवर्म्मा। तस्य परमेश्वर इवाधिकदर्शनः परमधार्म्मिकः परमेश्वरवर्म्मा। तस्य परमेश्वर वर्म्मणः पुत्रो भरत इव सर्व्वदमनो मेरुरिवाचलो दिवसकर इव स्वकैरेव रिपुतमसान्निरोधभेदकः शशधर इव सकलकलापरिणतोन्यक्कृतनृग नळनिषधनहुषनाभागभगीरथाद्यमानः परनरपतिगण्डस्थलविगळितमद जलधाराद्दुर्द्दिनकल्मषीकृतवामेनरबाहुदण्डो दिगन्तविजृम्भमाण कुमुद वनविपुलकीर्त्तिः प्रणतावनिपतिमकुटमालिकालीढचरणारविन्दः कुसुम चाप इव वपुषि वत्सराज इव कुञ्जरेषु नकुल इव तुरंगमेषु अर्जुन इव कार्म्मुके द्रोण इव धनुर्व्वेदे काव्यनाटकाख्यायिकासु प्रवीणः बिन्दुमतीगूढ चतुर्थपादप्रहेलिकासरच्युतकमात्राच्युतकादिषु निपुणः नयनिधिर्द्धन

भाजनः कलंकरहितः कलिबलमर्द्दनः कल्पकव्रतः ।

कृतान्तो रिपूणामनंगो वधूना
मलंघ्यो बलानामनूनो गुणानाम् ।
शरण्यः प्रजानां सतां कल्पवृक्षः
कृती नन्दिवर्म्मा पतिः पल्लवानाम् ॥ ४ ॥
तीक्ष्णैर्वाणैर्य्यो नरनाथः करिसैन्यम्
भिन्दन्नाजौ राजति राजा रणशूरः ।
मन्दं भिन्दन् ध्वान्तसमूहं करजालै
रुद्यन्नद्रौ पंकजबन्धुः सवितेव ॥ ५ ॥
जैत्रन्धनुः करविभूषणमंगराग
स्सेनामुखेषु रिपुवारणदानवारि ।
आकल्पमत्र परमेततुदारकीर्त्ते
र्य्यस्य प्रभोर्भवति पल्लवकेतनस्य ॥ ६ ॥

नरपतिरधिपतिरवनेर्न्नयभरः पल्लवमल्लो नन्दिवर्म्मा तस्य पुत्रो बभूव। तस्मिन् महीं शासति नरपतौ तस्यैव नन्दिवर्म्मणः एकविंशतिसंख्यां पूरयति संवत्सरे क्रमुकनाळिकेरसहकारतालहिन्तालतमालनागपुन्नाग रक्ताशोककुरवकमाधवीकर्ण्णिकारप्रभृतितरुभवनोपशोभिततीराया मदविघूर्ण्णितमानसमानिनीकुचमुखोद्घातकुंकुमगन्धाया वेगवत्या नद्याः पतिर्जलदागमकालमेलारसासितजलदोपम परवारणकुलपुष्करविवरान्तरपरिनिर्गतसलिलोल्बणकणिकाचितविपणीपथस्य सकलभुवनतलललाम

भूतस्य विल्वलाभिधानस्य नगरस्याधिपतिः पल्लवकुलपरम्परागते पूचान् कुले प्रसूतो द्रमिळनरपतिभिरुपरुद्धं पल्लवमल्लं नन्दिपुरे दृष्ट्वा-तदक्षमया कुवलयदलद्युतिना निशितेन कृपाणेन पल्लवमल्लशत्रुवृन्दस्य कृतान्त इव विजृम्भमाणश्चित्रमायपल्लवराजमुखान्निहत्य सकलमेव राज्यं प्रयच्छन्निम्बवनचूतवनशंकरग्रामनेल्लूर्नेल्वेलिशूरावकुन्दूर्प्रभृतिषु रणभूमिषु पल्लवाय बहुशः परबलं विजेता प्राकृतजनदुर्व्विगाह्ये भैरवेनेल्वेलि संग्रामे शबरसेनापतिसमारूढदन्तिदन्तयुगळसंघट्टनक्षरितमद जालसमालंकृतबाहुदण्डः प्रतिपक्षमुदयनाभिधानं शबरराजं हित्वा मयूरकलापविरचितं दर्प्पणध्वजं गृहीतवान्। उत्तरस्यामपि दिशि पृथिविव्याघ्राभिधानं निषादपतिं प्रबलायमानमश्वमेधतुरंगमानुसारिणमापतन्तमनुसृत्य विजित्य विष्णुराजविषयात्पल्लवसात्कृत्यादिशन्निरवद्य प्रमुखांशुहारानपरिमितसुवर्ण्णसंचयं कुञ्जरानपि यो जग्राह काळीभगवती परिपालितकाळिदुर्ग्गं विपाटयित्वा मण्णैकुटिग्रामे पाण्ड्यसेनां विजितवानुदयचन्द्राख्यधीरवरः परचक्रदण्डी स्वामिने विज्ञप्तवान्। तद्विज्ञापनया सकलराजप्रदातुरसिधारानिष्क्रयार्त्थं पश्चिमाश्रयनदी विषये कुमारमंगलवेळ्ळट्टूक्कोंद्रूग्रामे जलयन्त्रद्वयञ्च उदयचन्द्रमंगलमिति नाम कृत्वा अष्टोत्तरशतेभ्यो ब्राह्मणेभ्यो ददौ। तस्य पुरस्ता त्सीमा स्तोकनदी। दक्षिणतस्सीमा समुद्रदत्तचतुर्व्वेदिमंगलस्योत्तर तश्चक्रतीर्थादुत्तरतस्ततः पश्चिमे कोंद्रूग्रामदेवगृहादुत्तरतस्ततः पश्चिमे पूर्व्ववत्समुद्रदत्तचतुर्व्वेदिमंगलस्य पश्चिमोत्तरतस्सीमा दुरगह्रदादुत्तरतस्तस्मात्पश्चिमे अनडुत्पालाचल

दक्षिणपार्श्वम्। अस्य प्रतीच्यः सीमा लोहितगिरिस्तस्मादुत्तरतो गत्वा वेळालशिखरान्पुरस्तात्कृष्णशिल शिलोच्चयात्पश्चिमे रौहिणगुहा। पश्चिमोत्तरतस्सीमा सिन्दुवारह्रदः। उत्तरतस्सीमा काञ्चिद्वारनामग्रामस्य दक्षिणतस्सीमाद्दक्षिणतः। प्रागुदीच्यः सीमा क्षीरनदी। एवं चतुस्सीमान्तरां नदीकुल्याजलभोग्यां ससर्व्व परिहारामन्यानधर्म्मकृत्यान्विनाश्य भूमिं दत्तवान्। कौण्डिन्यगोत्राय प्रवचनसूत्राय रुद्रशर्म्मणे भागद्वयं। तद्गोत्रसूत्राय गणदिण्डशर्म्मणे तद्गोत्रसूत्राय गणमातशर्म्मणे तद्गोत्र सूत्राय दामशर्म्मणे तद्गोत्रसूत्राय अग्निशर्म्मणे तद्गोत्रसूत्राय मण्टशर्मणे तद्गोत्रापस्तम्बसूत्राय माधवशर्म्मणे तद्गोत्रसूत्राय मण्टशर्म्मणे तद्गोत्रसूत्राय नारायणशर्म्मणे पूर्व्ववद्द्रोणशर्म्मणे पूर्व्ववदग्निशर्म्मणे काश्यपगोत्राय आपस्तम्बसूत्राय भवमातभट्टाय भागत्रयं तद्वन्मणि शर्म्मणे भागद्वयं तद्वत्काळशर्म्मणे तद्वत् तिण्डशर्म्मणे तद्वत् विरमण्टाय तद्वत् कूळाय भारद्वाजगोत्रायाप स्तम्बसूत्राय रुद्रकुमाराय तद्वत्स्कन्दाय तद्वन्नारायणाय तद्वत्ताळिशर्म्मणे तद्वच्चेट्टशर्मणे तद्गोत्राय प्रवचनसूत्राय शूलमण्टाय तद्वत्स्कन्दाय तद्वद्द्रोण रुद्राय जातूकर्णगोत्राय प्रवचनसूत्राय पोरकूळकेयाय वत्सगोत्रायापस्तम्बसूत्राय अभुण्ड गोविन्दशर्म्मणे पूर्व्ववत् माधवशर्मणे पूर्व्ववद्भद्रकाळाय पूर्व्ववत्ताळि शर्मणे पूर्व्ववन्नीलकण्ठशर्म्मणे पूर्व्ववत् रामशर्म्मणे अग्निवेश्यगोत्रायापस्तम्बसूत्राय द्रोणशर्म्मणे वाधूलगोत्रायापस्तम्ब सूत्राय नारायणाय आत्रेयगोत्रायापस्तम्बसूत्राय चट्टिपुरनन्दिने विष्णु वृद्धगोत्राय बह्वृच

निम्बदासिशर्म्मणे पूर्व्ववन्नीलकण्ठाय पूर्व्ववत्पिट्टशर्म्मणे पूर्व्ववन्नील कण्ठाय लोहितगोत्रायापस्तम्बसूत्राय काराम्बिनन्दि शर्म्मणे वसिष्ठ गोत्राय प्रवचनसूत्राय कावनूर्मण्टशर्म्मणे पूर्व्ववत् द्रोणशर्म्मणे गौतमगोत्रायापस्तम्बसूत्राय निम्बशर्म्मणे पूर्ववत् अग्निशर्म्मणे तद्गोत्राय आपस्तम्बसूत्राय . . . . . गद्वयम्। पराशरगोत्राय प्रवचन सूत्राय गणमातशर्म्मणे पूर्ववन्माधवशर्म्मणे तद्गोत्रायापस्तम्बसूत्राय नागशर्म्मणे हरितगोत्रायापस्तम्बसूत्राय विनायकशर्म्मणे तद्वत् स्कन्दाय तद्वत्कोण्डाय तद्वद्दामशर्म्मणे तद्वद्देवशर्म्मणे मुद्गलगोत्राया पस्तम्ब सूत्राय चन्नकाळिने पूर्ववद्द्रोणाय कौशिकगोत्रायापस्तम्बसूत्राय कुमारमण्टाय तद्वच्चन्नकुमाराय तद्गोत्राय प्रवचनसूत्राय तिण्टद्रोणशर्म्मणे भाग द्वयम्। तद्गोत्रायापस्तम्बसूत्राय कूळशर्म्मणे। कट्टुकुचत्तिपाल पोचन् ओट्टियूरन्। प्रशस्तिकर्त्रे परमेश्वराय उत्तरकाकुलोद्भवायैको भागः। वैद्यभागश्च। गंगपुरवासिनो द्रोणश्रेष्ठिरणपुत्रस्य रेवतिनाम्नः परम माहेश्वरस्य द्वौ भागौ।

यावच्चरति खे भानुर्यावत्तिष्ठन्ति पर्व्वताः।
पूचान्कुलञ्च वै तावत् स्थेयादाचन्द्रतारकम्॥ ७॥
पुत्रः श्रीचन्द्रदेवस्य कवित्वपरमेश्वरः।
प्रशस्तेः कवितां चक्रे स मेधाविकुलोद्भवः॥ ८॥

Summary

The charter begins with a prayer for the well-being of the three worlds, offered to the god Sadāśiva together with Umā, who was seated in *Pravra - yōga - bandha*[3]

posture on the top of the mount Meru[4], who had the Sun and Moon as his eyes and who had favoured Udayachandra with prosperity. Further, long life is prayed for, for the lord of Viḷvalapura (i.e. Udayachndra), who obtained the kingdom for the Pallava king, who is kind to others, who punishes the enemies, who is the ornament of the Pilhān family and who is famous in the world, long life is prayed for, for the family of the Pallavas whose sprout-like feet were worshipped by (other) kings, whose sprout-like hands are bent low because of the continuous flowing of water while making grants and whose virtues kept away the enemies of the Pallavas.

Then is given the mythical origin of the Pallava family and its genealogy eulogizing Simhavishṇu, his son Mahēndravarma, his Narasimhavarma, who defeated Vallabharāja[5], i.e. The Chalukya king in the battles at Pariyaḷa, Maṇimangalam[6], Śūramāra and other places. His son was Mahēndravarma. His son Paramēśvaravarman conquered the army of Vallabha in the battle of Peruvaḷanallūr. His son was Narasimhavarma, a great devotee of Śiva. His son was Paramēśvaravarma. This Paramēśvaravarman's son is Nandivarma-Pallavamalla[7]. He is the vanquisher of all like Bharata, undisturbed like mountain Meru and subduer of enemies by his own arms. He undermines the kings like Nṛiga, Naḷa, Nishaḍha, Nahusha, Nābhāga, Bhagiratha and others of yore. He is like Kāma in body, in taming elephants he is like Vatsarāja, in controlling the horses he is like Nakula, in archery he is like Arjuna and in Dhanurvēda he is like Drōṇa. He is an expert in composing different types of literary poems. He is flawless. He puts down the strength of Kali. He is Yama to the enemies and Kāma to the young ladies.

After such a long description of the king Nandivarma-Pallavamalla, his subordinate officer Udayachandra born in Pūchān family and the chief of the city of Viḷvalapura is introduced. He is said to have subdued all the Ramila kings who surrounded the king (Dantivarma) in Nandipura and also killed the vain glorious Chitramāya-Pallava[8] and handed over the whole kingdom to the king. His other exploits like defeating Śabarāja and snatching away from the banner of mirror, subdueing the lord of Nishāda called Pṛithiviyāghra[9] in the north and several other kings like Vishṇurāja and Kāḷidurgas are narrated. He defeated the army of the Pāṇḍya in Maṇṇaikuṭi[10]. Requested by such a hero, in order to honour him who brought the whole kingdom for him through the sharp edge of the sword, the king granted to 108 brāhmaṇas, the village Kumāramangala-veḷḷaṭṭūr in Paśchimaśreya-vishaya renaming it as Udayachandra-mangalam, along with the water levers (*Jalayantra*) in the village of Korra-grāma. The boundaries of the grant village are elaborately described. The names of the donees and their respective shares of. land are enumerated. The concluding verses pray that the Pūchan family may last as long as the Sun, Moon, stars and mountains last and state that the poet Paramēśvara, the son of Chandradēva born in the Mēdhāvi family composed this poem.

Notes

1. The seal of the plates is stated to contain "in high relief on a countersunk surface, a recumbent bull on the proper right between two lamps. The figure and two symbols over the bull are not clear.(*EI*, II, p.262).

2. It is not clear if Nandivarman II Pallavamalla had acceded in 731 or 733 A.D.

3. *Pravara-yōga* in which God Sadāśiva is seated, it has been understood as a "position of profound meditation".

4. Sumēru or simply Mēru, is said to be the central point of Jambū-dvīpa and as the focal point around which all the planets revolve.

5. Vallabha was the distinguishing title of the Chāḷukyas which Dantidurga inherited it on defeating the Chāḷukya (See Ramesh, K.V., *The Chalukyas of Vātāpi*, pp.33, 44, 174-175).

6. Maṇimaṅgalam has been identified with a village of that same name 20 miles to the east of Kāñchīpuram. (Cheṅgalpattu District, *SII*, II, p.363. n.1).

7. Nandivarman II Pallavamalla could not be the son of Pārameśvara-varman II. Nandivarman II was from a collateral branch of Pallavas (See Minakshi, C., The Historical Sculptures of Kāñchi, *Memoir of the Archaeological Survey of India*, No.63, pp.33-37, 54-55; idem; *Administration and Social Life under the Pallavas*, Madras, 1938).

8. Chitramya-Pallava is understood to have been a Pallava scion who contested the claim to the Pallava throne (*ibid.*, pp.154-155; *SII*,II, pp.363-64).

9. Pṛithivīvyāghra was himself a powerful lord or must have been a powerful feudatory of the ruler who was intending to perform the *Aśvamēdha.* Usually the accompaniment of the horse meant to be sacrificed finally was followed by a reliable feudatory. (*SII*, II, p.364).

10. Maṇṇaikkuṭi-grāma is stated to have been near Kumbhakonam, Tanjavur District. Obviously this place must have been somewhere around the river Kāvērī region which was always contended between the Pallavas and Pāṇḍyas.

11. The preffix Udaya-chandra-maṅgalam probably is the Udayendiram.

12. It is not known which river was called Stōka-nadi during Pallava times. Even as its name implies it must have been an insignificant rivulet.

13. Samudradatta-chaturvedimaṅgalam }
Anaḍupāla mountain, }
Lōhitagiri } have not been identified
VeḷāḷāśikharaSindhuvāra-hrada }

14. Kshīra-nadi is of course Pal-āṟu, that flows near Kāñchipuram (*SII*, II, p.365).

15. Oṟṟiyūr is the present Tiruvaṟṟiyūr near Chennai, Tamilnādu, India.

16. Paramēśvara of Uttara-kākula was the one who was in the race of Mēdhāvi

No. 60

SAMANGAD PLATES OF DANTIDURGA

Location : Sāmanagaḍ, Gaḍhingrag Taluk,
Kolhapur District, Maharashṭra
Date : Śaka 675 =753-54 A.D.
Script : Early Nāgarī
Language : Sanskrit
King : Dantidurga
Dynasty : Rāshṭrakūṭa
Reference : Fleet, J.F., *IA*, XI, pp.108 f.

Text

Metre: Vv 1, 6, 7, 9-16, 19, 20 *Anushṭubh* ; 2, 3, *Vasantatilakā*

स्वस्ति ॥

स वोव्याद्वेधसाधाम यन्नाभिकमलं कृतम्।
हरश्च यस्य कान्तेन्दुकलया कमलंकृतम्॥ १॥
आसीद्द्विषत्तिमिरमुद्यतमण्डलाग्रो
ध्वस्तिन्नयन्नभिमुखो रणशर्व्वरीषु।
भूपः शुचिर्व्विधुरिवाप्तदिगन्तकीर्त्ति
ग्गोंविम्दराज इति राजसु राजसिंहः॥ २॥
दृष्ट्वा चमूमभिमुखीं सुभटाट्टहास
मुन्नामितं सपदि येन रणेषु नित्यम्।
दष्टाधरेण दधता भ्रुकुटीं ललाटे
खड्गं कुलं च हृदयं च निजं च सत्वम्॥ ३॥
खडगं कराग्रान्मुखतश्च शोभा

मानो मनस्तत्स्सममेव यस्य ।

महाहवे नाम निशम्य सद्य

स्त्रयं रिपूणां विगलत्यकाण्डे ॥ ४ ॥

तस्यात्मजो जगति विश्रुतदीर्घकीर्त्ति

रार्त्तार्त्तिहारिहरिविश्रुतधामधारी ।

भूपस्त्रिविष्टपनृपानुकृतिः कृतज्ञः

श्रीकक्कराज इति गोत्रमणिर्ब्बभूव ॥ ५ ॥

यस्मिन्प्रशासति महीन्नरपे द्विजानां

वैतानधूमनिचयैः परिकर्वुराणि ।

सन्ध्यासु सौधशिखराणि विलोक्य केकाः

कुर्व्वन्ति वेश्मशिखिनो जलदागमोत्काः ॥ ६ ॥

यस्य द्विजजनाः शान्ताः शान्तिवाचनवारिणा ।

प्रत्यहं गुल्फदग्नेन जनश्चरति मन्दिरे ॥ ७ ॥

तस्य प्रभिन्नकरटच्युतदानदन्ति

दन्तप्रहाररुचिरोल्लिखितांसपीठः ।

क्ष्मापः क्षितौ क्षपितशत्रुरभूत्तनूजः

सद्राष्ट्रकूटकनकाद्रिरिवेन्द्रराजः ॥ ८ ॥

पूरिताशा शुचिर्ध्वस्ता वृत्तिर्ज्योत्स्नेव मातृतः ।

राज्ञी सोमान्वयी तस्य पितृजश्च चलुक्यजा ॥ ९ ॥

श्रीमद्युवतिगणानां साध्वीनामाप सा पदम् ।

रक्षणाद्धरणाल्लोकः परिचारनिरापदम् ॥ १० ॥
सनयं तनयं तस्याः स लेभे भूभृदुत्तमः।
नीतावधेवामिवाशेषजगतः पालितायतिः ॥ ११ ॥
ध्वस्ततेजसि धामौघाप्रक्षालितदिगन्तरे।
श्रीदन्तिदुर्ग्गराजाख्यः स्वकुलाम्भोजभास्करः ॥ १२ ॥
यस्याजौ राजसिंहस्य वित्रस्ता वैरिवारणाः।
सलज्जाः स्तम्भमुन्मूल्य ज्ञायन्ते क्वापि नो गताः ॥ १३ ॥
साट्टालकानि दुर्ग्गाणि हृदयैः सह विद्विषाम्।
पतन्ति यत्प्रतापोग्रकोपांकुरसमुद्गकैः ॥ १४ ॥
महामहानदीरेवारोढोभित्तिविदारणम्।
लोकाविलोकयन्त्युच्चैः कृतं यज्जयकुंजरैः ॥ १५ ॥
मातृभक्तिः प्रतिग्रामं ग्रामलक्षचतुष्टये।
ददत्या भूप्रदानानि यस्य मात्रा प्रकाशिता ॥ १६ ॥
सभ्रूविभङ्गमगृहीतविधौतशस्त्रम्
अज्ञातमप्रणिहितान्तरमपेतयत्नम्।
यो वल्लभं सपदि दंडलकेन जित्वा
राजाधिराजपरमेश्वरतामुपैति ॥ १७ ॥
कांचीशकेरलनराधिपचोलपांड्य
श्रीहर्षवज्रटविभेदविधानदक्षम्।
कर्ण्णाटकं बलमनन्तमजेय रथ्यै

र्भृत्यैः कियद्भिरपि यः सहसा जिगाय ॥ १८ ॥

स च पृथिवीवल्लभमहाराजाधिराजपरमेश्वरपरमभट्टारकखड्गावलोकश्रीदन्तिदुर्ग्गराजदेवः सर्व्वानेव राष्ट्रपतिविषयपतिग्रामकूटान् यथार्हप्रतिपत्याज्ञापयत्यस्तु वः संविदितं यथा पंचसप्तत्यधिकशककालसंवत्सरशतषट्के व्यतीते संवत् ६७५ पूहरिकायां माघमासरथसप्तम्यां तुलापुरुषस्थिते मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये कोप्परपंचशतभुक्त्यन्तर्ग्गतकरंदिवाडेजफितदेवुळवाटनामग्रामः करहाटकवास्तव्याय बह्वृचसब्रह्मचारिणे वसिष्ठगोत्राय भट्टत्रिविक्रमपौत्राय कृष्णभट्टपुत्राय नारायणभट्टाय वेदवेदांगपारगाय अग्निहोत्रबलिचरुप्रवर्त्तननिमित्तं भूमिच्छिद्रन्यायेन उदकपूर्व्वो दत्तः। स चाटभटप्रवेश्य असन्नरप्रवीब्रविनिवृत्ताचारः सर्व्वबाधपरिहारेणास्मद्वंश्यैरन्यैर्व्वा प्रतिपालनीयो नृपतिभिः। यस्य च पूर्वतः उवात्यलेवाडि ग्रामः। दक्षिणतः परगोपब्राह्मणग्रामः पश्चिमतः विल्वाग्रामः उत्तरतः ऐतवाडे ग्रामः एवं चतुराघाटलक्षितो ग्रामः॥ सवृक्षमालाकुलः स्वसीमाप्रयत्नसिद्ध्यादिहिरण्यश्च सदण्डदोषदशापराधो यथासमुचितभागभोगकरसर्व्वोत्पत्यादिसहितो दत्तः॥ अस्य भुंजतः भुंजापयत्यश्च कृषतः कर्षयतः वा न केनचित्परिपन्थिना कार्या॥ उक्तं भगवता व्यासेन।

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम्।
षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः॥ १९॥

यः सम्पद्भिरनुद्धतः परहितव्यासंगिनो यस्य धीः

यस्तत्राप्युपकर्तुंमिच्छति महद्वर्ग्गस्य कास्था धने।
तेनेन्द्रेण नरेन्द्रवृन्दसहितश्रीदन्तिवर्म्माज्ञया
प्रीत्येदं लिखितं तदुन्नतयशः प्रोद्भासनं शासनम् ॥ २० ॥

Summary

After paying obeisance to the god Hara, the record commences with the description of the Rāshṭrakūta king Gōvindarāja. His son was Karkarāja who was comparable to Indra. His son was Indrarāja. His queen belonged to the Sōma race through her mother and to the Chālukya family through her father.[1] She was hailed as Sādhvi among the women. To them was born Dantidurga, who was like the Sun in the sky of his family. In front of him, in the battles the enemy elephants are tormented and the hearts of the enemies along with the storied forts, collapse. He obtained the title *Paramēśvara* by conquering Vallabha (i.e. Chālukya king). He overpowered the army of Karnataka which had vanquished the kings of Kañchi, Kēraḷa, Chōḷa, Pāṇḍya, Śriharsha and Vajhraṭa. Such Khaḍgāvalōka Dantidurga orders all the officers like *rāshṭrapati*, *vishayapati* and *grāmakuṭas*, thus :

Let it be known to you that on the Ratha-saptami day, in the month of Māgha in the Śaka year 675, I have granted, for the increase of merit and fame of my parents and myself, the village named Karandivādejaphita-dēvuḷvāta situated in Koppara-50 *bhukti* to the learned Nārāyaṇa-bhaṭṭa, the son of Kṛishṇa-bhaṭṭa and the grandson of Trivikrama-bhaṭṭa of Vasishṭha gōtra and a resident of Karahāṭaka. The grant was given for performing the rites of *agnihōtra*, *bali* and *chāru*. The details of the boundaries of the grant village are given. It is enjoined that the grant should be protected by the (future) kings on such conditions as non entry of *chāṭas* and *bhaṭas* etc.

Imprecatory verses follow.

This inscription which proclaims the high fame (of the king) is written with pleasure by Indra who is not infatuated by wealth, who is engaged in doing good to others and who has no desire for wealth, at the orders of the king Dantidurga who is surrounded by groups of kings.

Notes

1. It is rather intriguing that the name and identity of this queen is not spelt out in the record.

♣ ♣ ♣ ♣

No. 61

KASAKUDI PLATES OF NANDIVARMAN II

Location : Kaśākudi, Pondicherry
Date : Regnal Year 22 =753 or 755 A.D.
Script : Grantha
Language : Sanskrit and Tamil
King : Nandivarman II Pallavamalla
Dynasty : Pallava
Reference : Hultzsch, *SII*, II, p.342-361.

Text

Metre: Vv.1, 5 *Āryā ;* 3, 4, 11, 12 *Śārdūlavikrīḍita* ; 6, 7, 14, 18, 19 *Upajāti* ; 8 *Sragdharā*; 9 *Vamśastha* ; 10, *Mālinī* ; 13, 15, 1 *Vasantatilakā* ; 16 *Mattamayūrī*

स्वस्ति ॥

जयति जगत्त्रयजन्मस्थितिसंहृतिकारणं पर ब्रह्म ।

सत्यमनन्तमनादि ज्ञानात्मकमेकममृतपदम् ॥ १ ॥

मायाविना येन पदत्त्रयार्त्थिना

सद्यः प्रवृद्धेन पुनर्बलेर्म्मखे ।

विचक्रमे त्रिर्ज्जगतस्स्वसात्भृत्यैः कृतौ

स वोऽस्तु भूत्यै भगवान् त्रिविक्रमः ॥ २ ॥

मौलाविन्दुधरः फणाधरधरः स्कन्धे भवानीधरो

वामे कामधरः प्रणामनिरते गङ्गाधरो मूर्द्धनि ।

मूर्त्तौ धूळिधरो गळे गरधरः केशेषु वेणीधरः

पाणौ शूलधरो हरः पुरहरः पुष्णातु वो मङ्गलम् ॥ ३ ॥

कण्ठे कौस्तुभकाळिकाभरणयोश्छायां परां बिभ्रतौ
दैत्य ध्वंसनचक्रपट्टसधरौ श्यामावदातौ रुचा ।
श्रीगौरीविलसत्कटाक्षविशिखव्यायामरोमाञ्चितौ
पायास्ता भवतस्त्रिविक्रमहरौ सम्पृक्तदेहान्तरौ ॥ ४ ॥
पद्मा पद्मासीना पद्मोज्ज्वलपाणिपद्मयुगळा वः ।
प्रीत्या पश्यतु करिणीकरधृतकनकघटसुरस्नाना ॥ ५ ॥
दृष्ट्वा ललाटे नयनं भियेव
कामो न यामीश्वर इत्युपास्ते ।
विष्णोः स्वसा सा भगवत्यलक्ष्मी
मार्या कदार्य्यां क्षिणुतात् क्षणेन ॥ ६ ॥
कैलासगौरः पृथुनागकक्ष्यः
प्रोद्धूत्तकर्ण्णो बृहदेकदन्तः ।
मातङ्गवक्त्रो मदनिघ्ननेत्रो
भूयादविघ्नाय विनायको वः ॥ ७ ॥
ये देवा दिवि दानयागतपसा काले फलन्तन्वते
ये देवा भुवि षट्सु कर्म्मसु रतास्सत्याशिषस्संयताः ।
ते देवा द्वितये कुलक्रमभुवा भक्त्या समाराधिताः
पायासुः परमेश्वराश्चिरतरं श्रीपल्लवानां कुलम् ॥ ८ ॥
हिरण्यगर्भो जयति प्रजापतिः
श्रियः पतिश्शाक्वरकेतनः क्षितिम् ।

सहेलकल्लोलसमुद्र्वारणां
बलद्विषा यस्य सपत्नवारणाः ॥ ९ ॥

स्वस्ति ॥ नमः श्रियै ॥

प्रथममजनि वेधाः ब्रह्मयोनिः स्वयम्भू
र्न्नळिननयननाभेरुल्लसत्पुण्डरीकात्।
अकृतकवचनानां तत्त्वतो दृष्टवर्त्मा
सकलभुवनसर्ग्गव्यापृतिव्यग्रकर्म्मा ॥ १० ॥
तस्मात्संगरितान्तगामिचरितो यज्ञेंऽङ्गिरा जज्ञिवान्
दीप्ताग्निः स हुताशनाद्दुरितः प्राणाशनः पाप्मनाम्।
सप्तर्षित्वमवाप्तवानृषिवृषः काङ्क्षातपः प्राप्तवान्
पुत्रो मानस एव तामसतरुच्छेदार्त्थटंकोत्तमः ॥ ११ ॥
तस्मादंगिरसो गिरां रसनिधिर्न्नीतिप्रजानाम्पति
श्चक्रे यं गुरुमात्मसात्सुकृतिनाम्भर्त्ता त्रिधामाग्रजः।
यत्प्रज्ञाबलसंश्रयेण सुरतक्रीडां सुरस्त्रीजनो
धत्ते स्वैरमसंस्मरन् दिनकृतस्सम्पद्विपद्व्यापृतिम् ॥ १२ ॥
शंयुश्शुभंयुरनहंयुरजायतास्मा
दंहोविघातकृदहर्पतितुल्यतेजाः।
अन्तर्हिते शिखिनि दैवतहव्यवाहो
भूत्वा व्यधत्त शिखिकृत्यमपि स्ववीर्यात् ॥ १३ ॥
गोत्रस्य कर्त्ता गुणगौरवेण

श्रीपल्लवानाम्मुनिरस्य सूनुः ।
जातो भरद्वाज इति त्रिवेदीं
यां पश्यति स्माद्रिनिभां तपोभिः ॥ १४ ॥
द्रोणोऽभवद्द्रुहिण एव ततः कुरूणा
न्द्रोणाभिधानकलशाम्बुजलब्धजन्मा ।
एणाजिनोपहितजित्वरवेदिकेतु
र्बाणस्त्रवेदचतुरर्ण्णव पारदृश्वा ॥ १५ ॥
तस्माद्यस्मिन्क्रुध्यति कृष्णार्ज्जुनभीमा
श्शास्त्रत्यागश्चक्रुरविघ्नम्भयनिघ्नाः ।
विश्वस्थानां विश्वसनीयो मुनिरासी
दश्वत्थामा मन्मथशत्रोरवतारः ॥ १६ ॥
जातस्ततः स्वपदशंकितमानसेन
शक्रेण तं प्रति विसर्ज्जितमेनकायाम् ।
आपल्लवैरनभिमृष्टसमुद्रनेमिः
श्रीपल्लवस्सपदि पल्लवसंस्तरेषु ॥ १७ ॥
तेजः परं ब्राह्ममनूत्थितोऽपि
स क्षात्रमुच्चैरभजत्स्वभावि ।
अम्भोधरादप्युपलब्धजन्मा
दाहात्मको नन्वशनिः प्रकृत्या ॥ १८ ॥
अशोकयन्नानमतः क्षितीशा

त्सशोकयन्संयति सम्मुखीनान्।

यशोऽकलङ्कम् दधदिन्दुभासोऽ

प्यशोकवर्म्मा तत आविरासीत्॥ १९॥

ततः प्रभृत्यखण्डकलभुवनमण्डलात्मसात्करणाखण्डितविक्रमपरः परिपालितसकलवर्णाश्रमव्यवस्थाविशेषः प्रभाविष्णुर्विष्णोरंशावतार इव वंशावतारः पल्लवानां निखिलभुवनपावनतया गंगावतार इव च निर्मलः समवर्त्तत। यत्रोद्भूताः सर्व्वेऽपि सर्व्वत्राविहतशक्तयो महासेनाः पावकजन्मानः पद्मोद्भवाः सुब्रह्मण्याः कुमारा इव ये भुजबलविपुलप्रतापानलशोषिताशेषद्विषदवार्य्यवीर्य्यार्णवार्णसः प्रकीर्ण्णनिर्म्मलकीर्त्तिचन्द्रिकानिष्कासितसकलकलिकालकलङ्ककालुष्याः समुन्नतचरितातिशयाचलोदयसंवर्द्धितमित्रमण्डलानुरागायुवतिजनहृदयहरिणवागुरायमाणवपुः सौन्दर्याश्चन्दनतरव इव दक्षिणाशाविवर्द्धमानसौरभास्सुरतरव इवानन्यतेजोविलंघितात्मच्छायाः पूषण इव परहितकरा भास्वन्तश्च शब्दागमा इव प्रकृतिप्रत्ययागमोपेता निरपवादवृद्धिगुणाश्च नन्दना अप्यपारिजाता धनागमा अप्यजलाश्चक्रवाळपर्व्वतपर्य्यन्तां सप्तद्वीपसप्तसागरालंकृतां सकलान्दिवमिव दिवस्पतिर्भुवं भुवस्पतयो भुञ्जते। येषां च समस्तशस्त्रशास्त्रनिर्ज्जितोर्ज्जितसमितयामितसमितयो क्रमार्ज्जितधर्मकर्माणः खण्डित कलयः पण्डितमतयो लक्षितमूर्त्तयो रक्षितकीर्त्तयोस्समस्तवसुन्धरोद्वहनधुरन्धरस्कन्धाः स्कन्दवर्मकलिन्दवर्म्मकाणगोपविष्णुगोपवीरकूर्च्चवीरसिंहसिंहवर्म्मविष्णुसिंहप्रभृतयः शत्रुधूमकेतवो मित्रमानहेतवः सर्वमर्य्यादा

केतवोव्यतीयुरवनिपतयः ॥

तदनु कदनकर्म्मव्यापृतः शात्रवाणा
मभवदवनिसिंहः सिंहविष्णुर्व्विजिष्णुः ।
मलयमथ कळभ्रं माळवं चोळपाण्ड्यौ
निजभुजबलदृप्तं सिंहळं केरळांश्च ॥ २० ॥

ततो महीमन्वशिषन्महीन्द्रो
महेन्द्रवर्म्मेति महेन्द्रकीर्त्तिः ।
अशेषयामास विशेषिताज्ञो
यः पुळ्ळरे द्विषतां विशेषान् ॥ २१ ॥

लंकाजयाधरितरामपराक्रमश्री
रुद्वृत्तशत्रुकुलसंक्षयधूमकेतुः ।
वातापिनिर्ज्जयविलम्बितकुम्भजन्मा
वीरस्ततोऽजनि जयी नरसिंहवर्म्मा ॥ २२ ॥

तस्मादजायत निजायतवाहुदण्ड
श्चञ्चाशनी रिपुकुलस्य महेन्द्रवर्म्मा ।
यस्मात्प्रभृत्यलमवर्द्धत धर्म्मकर्म्म
देवद्विजन्मविषयं घटिकां च दातुः ॥ २३ ॥

इच्छाविधेयसकलावनिपाललोकः
पश्चाद्बभूव परमेश्वरपोतवर्म्मा ।
भूतिं परां वहति भूतपतिर्वृषाङ्कः

खट्वाङ्गकेतुरचलस्थितिरद्भुतो यः ॥ २४ ॥
देवब्राह्मणसात्कृतात्मविभवो यः क्षत्रचूळामणि
श्चातुर्वैद्यमवीविशत् स्ववशगां भूदेवतां भक्तितः ।
संप्राप्तो नरसिंहतां स्ववपुषा नाम्ना च दिग्व्यापिना
जातः श्रीपरमेश्वरस्य सकलस्यांगावतारस्ततः ॥ २५ ॥
एता धनानि दयितानि यशोधनानि
जेता कलेर्व्विलसितानि बभूव तस्मात् ।
नेता नयस्य धिषणाधिकृतस्य मार्गं
पाता जगन्ति परमेश्वरपोतवर्म्मा ॥ २६ ॥
तस्य प्रशास्ति पदमृद्धिमदा समुद्रा
दाज्ञाबलेन जितशत्रु वृतः प्रजाभिः ।
मान्यो नयेन मनु संप्रति नन्दिवर्म्मा
विस्तीर्णपल्लवकुलार्ण्णवपूर्ण्णचन्द्रः ॥ २७ ॥
षष्ठः श्रीसिंहविष्णोरनुपतिरनुजः प्राभवद्भीमवर्म्मा
देवः श्रीबुद्धवर्म्मा बुधजनमहितः पञ्चमः पल्लवेन्द्रः ।
तुर्य्यश्चादित्यवर्म्मा तुलितकुलिशभृद्यस्य गोविन्दवर्म्मा
तार्त्तीयीको द्वितीयः क्षितिभृदसुभृतां श्रीहिरण्यश्शरण्यः ॥ २८ ॥
संग्रामे विजयः कलापरिचये कर्ण्णीसुतः कार्म्मुके
रामो वारणतन्त्रवाद्यविषये वत्सेश्वरः श्रीधरः ।
कामो वामविलोचनासु कविताबन्धे स आद्यः कवि

स्तन्त्रालापविधौ स्वन्नयभरो धर्म्मः प्रभारञ्जने ॥ २९ ॥

स्वामी नः पल्लवानां कुलभरणपटुस्सात्त्विकस्सार्वभौमो
भव्यो व्यायामविद्याविनयगुणगुरुर्व्वर्द्धते सार्द्धमृद्ध्या ।
हैरण्यो भीमवर्ग्ग्यों हरिचरणपरः शुद्धमात्रन्ववायो
लक्ष्मण्यो रोहिणीजः सुलभसुचरितो नन्दिवर्मा नरेन्द्रः ॥ ३० ॥

तेन राजाधिराजपरमेश्वरेण परमेश्वरपोतवर्म्म पदप्रशासनपरेण परमपदविषक्तव्यापृतोन्निद्रचेतसा परमेष्ठिपदपंकरुहयुगळविगळितधूळिधूसरशिरसा पुरस्कृतदेवब्राह्मणपूजनासनेन तिरस्कृतकलिकालकालिकपीडनव्यसनेन विवर्द्धमानप्रतापानलपरिशोषितामित्रमण्डलेन विवर्द्धमानानु रागरसपरितोषितमित्रमण्डलेन सकलभुवनसाम्राज्यदीक्षादक्षदक्षिणकरेण सर्व्वोर्व्वीभृन्मकुटमाणिक्यकोणशाणमसृणितचरणयुगलेन पल्लवकुलनन्दन वनलक्ष्मीलताललितवेष्टनकल्पवृक्षेण क्षत्रियमल्लेन पल्लवमल्लेन बप्पभट्टारकपादानुध्यानवर्द्धमानमहिम्ना नन्दिवर्म्मनाम्ना महागुणसलिलनिधिसलिलसंवर्द्धमानसोमराजेन महाराजेन साम्राज्यसंवत्सरे द्वात्रिंशे वर्त्तमाने छन्दःपारावारपारगाय स्वरसमधुरसामगाय छन्दःकल्पव्याकरणज्योतिषनिरुक्तशिक्षाछन्दोविचितिषडंगसंशितस्वाध्यायाध्ययनाय पदधर्मवाक्यधर्मवस्तुधर्मवित्ताय श्रुतिस्मृतिरसायनपानाय कर्मकाण्डज्ञानकाण्डपण्डिताय लोकयुक्तिकलाकौशलपेशलाय काव्यनाटकाख्यायिकेतिहासपुराणपरिणताय किं वहुना सर्वज्ञानविज्ञाननिष्णाताय सर्वकर्म्मानुष्ठाननिष्ठिताय सुवृत्ताय भुवनभवनदीपाय मानाभिजनसुजनाय निराकृत

समस्ततमस्तया मध्यमलोकैकमित्राय लोकमित्रेण सर्वगुणसारसन्दोह सागरगम्भीरेण श्रीमता ह्रीमता वपुष्मतायुष्मता पुरुषेतरभाषेण पुरुष विशेषेण बृहस्पतिना एव दिवस्पतेः भुवस्पतेर्ज्जननयनहृदयनन्दिनो नन्दिनः पल्लवपतेर्न्निसर्गनीतिविनीतेनं विद्वन्मुख्येन मुख्यमन्त्रिणा धीरेण वीरेण ब्रह्मक्षत्रमयीं श्रियमविकलामविचलाञ्च श्रीनन्दिपोतराजभक्तिसम माचन्द्रमस्तारकम्बिभ्राणेन बिभ्राणेन कुलं कुलज्येष्ठेन ज्येष्ठपुत्रेण ब्रह्म श्रीराजेन शीलतस्साक्षात्सोमराजेन तथैव सर्व्वगुणज्येष्ठेन ज्येष्ठेन पौत्रेण पुत्रिणां पौत्रिणां च धुरमारोपिताय सुजन्मपुण्याय द्विजन्मगण्याय ब्रह्म वेदिने ज्येष्ठपादसोमयाजिने छन्दश्च्छन्दानुवर्त्तनाय छन्दोगसूत्राय भरद्वाजपेयादिक्रतुगोत्राय भरद्वाजगोत्राय तोण्डाकराष्ट्रब्रह्मलोकायमान पूनिय वास्तव्याय दोषदरिद्राय वेषविशिष्टायैकपुरुषाय द्विलोकचिन्तनाय त्रिवर्गसाधकाय चतुर्व्वेदाय पञ्चमहाभूतपरार्थाय षडंगाय सप्तसप्तिप्रति माय सुगुणाय सुब्रह्मण्याय स्वयमेव प्रसादाद्गुन्दिवनकोष्ठके तस्मिन्नेव राष्ट्रे प्राङ् पालैयूर्। दक्षिणश्च स एव। प्रत्यङ् मणत्पाक्कः कोळ्ळिपा कश्च। उदङ् वेळिमानल्लूर्। एतदवधिचतुष्टयान्तर्भूतः कोड्डुकोळ्ळिरिति प्रथमनामा ब्रह्मदेयीभावादेकधीरमंगलमिति चरमनाम्ना ग्रामस्सामान्य निवर्त्तनद्वयमर्यादया निरस्तपुरातनदेवदानब्रह्मदेयन्निरस्तकुट्टुम्बि सर्व्व परिहाराभ्यन्तरीकरणेन दूरसरितो वेगवत्याश्च तीरलयतटाकाच्च यथोप पादं रुद्ध्वा चोदकभोगो गृहं क्षेत्रमारामो निष्कुटं चेत्येतदभ्यन्तरं सर्व्वो ब्रह्मदेयं दत्त इति। विज्ञप्तिर्ब्रह्मयुवराजस्य॥ आज्ञप्तिर्घोरशर्म्मा॥

स्वस्ति सिद्धिरस्तु ॥

अकृत्रिमस्त्रयीविधिक्रमक्रतुप्रवर्त्तकः ।
समस्तशास्त्रतत्त्ववित्प्रशस्तिकृत् त्रिविक्रमः ॥ ३१ ॥
भूमिदानात्परं दानं न भूतं न भविष्यति ।
तस्यैव हरणात्पापं न भूतं न भविष्यति ॥ ३२ ॥
बहुभिर्व्वसुधा दत्ता बहुभिश्चानुपालिता ।
यस्य यस्य यथा भूमिस्तस्य तस्य तथा फलम् ॥ ३३ ॥
स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।
षष्टिं वर्षसहस्राणि विष्ठायाज्ञायते कृमिः ॥ ३४ ॥

स्वस्ति श्रीपरमेश्वरमहा कोष्ठागारिणा लिखितम् ॥

स्वस्ति ॥ सिद्धिरस्तु ॥ नमः ॥

Translation

Verse 1 Victory to Para-Brahma.

Verse 2 May the god Trivikrama give us prosperity.

Verse 3 May god Hara bring us auspiciousness.

Verse 4 May the composite form of Hari and Hara protect.

Verse 5 May the goddess Padmā shed her benevolent look on us.

Verse 6 May the Goddess Āryā destroy our misfortune instantly.

Verse 7 May the God Vināyaka ward off our impedements.

Verse 8 May all the Gods and Goddesses protect the Pallavas.

Verse 9 May the king Nandivarmman be victorious.

Well being. Salutations to Śrī.

Verse 10 At first was born the Creator. From him Brahmā was born who knew the Vedic texts and engaged himself in the task of creation.

Verse 11 From Brahmā was born Angīrāḥ who was an eminent sage and occupied a place in the select band of seven sages (*Saptarshi*).

Verse 12 From Aṅgīrāḥ was born Bṛihaspati whom the elder brother of *Tridhāman* (Indra) made his preceptor.

Verse 13 From Bṛihaspati was born Śaṁyu.

Verse 14 This Śamyu's son was Bharadvāja who became the actual founder of the lineage of the Pallavas.

Verse 15 From that Bharadvāja there was Drōṇa who was the preceptor of Kurus.

Verse 16 Drōna's son was Aśvatthāman.

Verse 17 From Aśvatthāman Śrī-Pallava was born.

Verse 18 Though born as a Brāhmaṇa, Śrī-Pallava possessed the spirit of a Kshatriya.

Verse 19 Then there was Aśōkavarman who tormented his enemies and assuaged the grief of those who were subservient to him.

Prose passage: After that Aśōkavarman there were many Pallava rulers each one of whom had his own prowess and specialities. There were many kings known as Skandavarman, Kalindavarman, Kāṇagōpa, Vishṇugōpa, Vīrakūraccha, Vīrasiṁha, Siṁhavarman and Vishṇu-siṁha[3].

(After this there is a lengthy description of the Pallava family).

Verse 20 Then there was Siṁhavishṇu, who, true to his name, was the very lion on the earth (*avani-siṁha*). He was victorious against the Malaya, Kaḷabhra, Māḷava, Chōḷa, Pāṇḍya and Siṁhaḷa rulers, and the ruler of Kēraḷa who was proud of strength of his arms.

Verse 21 Then there was Mahēndra who annihilated the host of his enemies at Puḷḷalūr.

Verse 22 To him was born the victorious Narasiṁhavarman who conquered Vātāpi[4].

Verse 23 Then there was Mahēndravarman who did meritorious acts to Brahmins and temples.

Verse 24 His son was Paramēśvarapōtavarman who possessed great property (*bhūti*), good subjects (*bhūta*), had the emblem of the bull, and the staff known as *Khaṭvāṅga* on his banner.

Verse 25 His son was Narasiṁhavarman. He was very strong and had the crest-jewel of guardian - warriors. He had great wealth, which he gave to temples and Brahmins. He was well-versed in the four Vēdas.

Verse 26 His son was Paramēśvaravarman who also possessed great treasures and who protected the worlds.

Verse 27 Then there was Nandivarman II Nandimalla, who had been chosen by subjects and had great wisdom.

Verse 28 His sixth (ancestor) was Bhīmavarman, the younger brother of Śrī Siṁhavishṇu. His fifth (ancestor) was Buddhavarman, whose son was Ādityavarman. His son was Gōvindavarman. His son was Hiraṇya. His son was Nandivarman II Pallavamalla, the present king.

Verse 29 This Nandivarman (II) was a brave warrior, an expert player of stringed instrument, a poet of first order and an entertainer of his subjects.

Verse 30 Our lord (Ṇandivarman) ably bears the legacy of the Pallava family. He is virtuous, modest and prosperus with his fortunes growing. He always meditates on the feet of God Hari.

In his twentysecond regnal year, this Rājādhirāja Paramē-śvara on being requested by Brahmaśrīrāja, and when the executor (*āṇatti*), was Ghōraśarman, gifted the village named Kōṭukoḷḷi which was newly named as Ēkadhīra-maṅgalam[5] in the Undivana-kōshṭha (*ūrrukkā ttukkōṭṭam*[6] which was somewhat like a district) within the boundaries of Pālaiyur on the east and south, Maṇatpākka on the west and Koḷḷipākka and Veḷimānallūr on the north, with the exception of the *dēvadānas* and *brahmadēyas* (plots gifted to temples and brāhmaṇas measuring two *paṭṭis*[7] - about six acres) to Jyēshṭhapāda-Sōmayāji of the Bhāradvāja-gōtra and Chhandoga-sūtra (Sāma-vēdin ?) residing in Pūni[8]. This gifted village could enjoy wet and dry lands and irrigation facilities from big and small channels of the rivers Cheyyār, Dūrasarit and Vekkā[9].

This gifted land would have all exemptions (*parihāras*).[10]

The eulogy of this charter was written by Trivikrama, who knew the truths of all sciences and had performed the sacrifices according to the rules of the three Vēdas.

Notes

1. Brahmā is known as Vēdhāḥ, Brahmayōni etc.

2. Kumāra or Subrahmaṇya is the Śakti-kumāra.

3. These names are not known elsewhere.

4. Pallava Narasiṁhavarman I is well-known as the victor of Pulikēśin II-Chālukya.

5 . Kōḍukoḷḷi or Ekadhīramaṅgalam is not known.

6. Undiva or Uttukkoṭṭa division around Kāñchīpuram (see *SII*, III, p.345).

7. The 2 *paṭṭis* were probably equivalent of one *vēli* or 6 ½ acres. *Paṭṭi* as land-measure is used only in Toṇḍaimaṇḍalam.

8. Pūni is not known.

9. Dūrasarit, Vekkā, and Cheyyār are small rivers in Toṇḍaimaṇḍalam.

10. Very long lists of these *parihāras* are found in the Tamil text.

◆ ◆ ◆ ◆

No. 62

PATTADAKAL PILLAR INSCRIPTION OF KIRTIVARMAN II

Location : Paṭṭadakal[1], Bagalkot District, Karnataka
Date : [754 A.D.?][2]
Script : Siddhamātṛikā (Early Nāgarī)[3]
Language : Sanskrit
King : Kīrttivarman II
Dynasty : Chālukya of Bādāmi
Reference : Fleet, J.F., *EI*, III, pp.1-7

Text

Metre:

ओं ओं नमः शिवाय ॥ स जयतु वामबाहुपरिचुंबितवदनपयोधरस्थळी
अळिकुळलोळलीळाळकावळिविधृतकराग्रमण्डलो-
 दशशतनयनकिरणपरिवर्द्धितरागरसाति वर्द्धितो
 विकसितपुण्डरीकप्रतिमो हरगौरिसंगमो स जयतु ॥ १ ॥

चाळुक्यवंशवर्द्धमानरघुरिव कलियुगनिसृष्टमनाः सूर्यसुत इव दानरत स्सदा वृकोदर इव साहसरसिकः श्री निरवद्योदारविजयादित्यसत्याश्रय श्रीपृथिवीवल्लभमहाराजाधिराजपरमेश्वरभट्टारकस्तेन स्थापितो महाशैल प्रासादश्रीविजयेश्वरभट्टारकस्तस्य दक्षिणदिग्भागे। श्रीविजयादित्यदेव स्यात्मजः प्रियः पुत्रः श्रयनिवारितः समस्तसामन्तानतपादयुग्मः काङ्चीपुरविमर्द्दनश्रीविक्रमादित्यसत्याश्रय श्रीपृथिवीवल्लभमहाराजाधिराजपरमेश्वरभट्टारकस्तस्य हैहयवंशसम्भूता प्रिया महादेवी उमा भगवतीव लोकमाता तया स्थापितो महाशैलप्रासादश्रीलोकेश्वरभट्टारकस्तस्यो

त्तरदिग्भागे। श्रीलोकमहादेव्या या सोदर्य्या कनीयसी भगिनी श्रीविक्रमादित्यदेवस्य प्रिया राज्ञी स्वस्ति कीर्त्तिवर्म्मसत्याश्रयश्रीपृथिवीवल्लभ महाराजाधिराजपरमेश्वरभट्टारकश्रीनृपसिंहराजस्य जननी श्रीत्रैलोक्य महादेवी तया स्थापितो महाशैलप्रासादश्रीत्रैलोक्येश्वरभट्टारकस्तस्य पश्चिमदिग्भागे। इत्येवमायतनानां मध्ये शाण्डिल्य सगोत्रेण शिववर्द्धमानरूपपौत्त्रेण शिवरूपपुत्त्रेण शुभदेवरूपेण भूयः शिवशासनांकभगवत्पूज्यपयोभक्षिपादप्रशिष्यशिष्येण ज्ञानशिवाचार्य्यैण गंगाया उत्तरकूळे मृगथणिकाहारविषयादिहागतेन श्रीविजयेश्वरभट्टारकस्याश्रयावस्थितेन स्थापितोयं त्रिशूलमुद्रांकः स्वकीयायतनद्वारे महाशैलस्तम्भः॥ अत्र लिखितमिदं शासनं प्रशस्तिपूर्व्वकं। श्रीमत्कौथुमत्रिसाहस्त्रवेदालंकृतशं . . . . . . आर्य्यभट्टगयाद्धरेण विजयादित्य शासनात् बेळ्वलविषये अरपुणुसेनामग्रामस्य पूर्व्वदिग्भागे . . . . . . नामग्रामोर्ज्जितस्तस्यार्द्ध ब्रह्ममूर्त्ति आर्य्यभट्टत्रिविक्रमचतुर्व्वेदाय दत्तं तस्य हस्ते ज्ञानशिवाचार्य्यैण त्रिंशद्भिर्ग्गद्याणकैः सुवर्ण्णस्य क्रयदानाद्गृहीतानि त्रिंशन्निवर्त्तनानि क्षेत्त्राणि श्रावणमासे अमावास्यायां सर्व्वग्रासे सूर्य्यग्रहणे मातापित्रोः पुण्याभिवर्द्धये आत्मनः श्रेयोर्त्थं च आचार्यप्रसङ्गदेवकर्म्मिकावर्त्तनोपायनिमित्तं देवस्य पूजासंस्काराय च स्वकीयायतने दत्तानि रक्षितव्यानि .

. . . . मत . .

Translation

Ōm ! Ōm ! Reverence to Śiva ! Victorious, be that union of (the god) Hara and (the goddess) Gaurī, in which the

face and breasts (of the goddess) : in which the fingers (of the-god) separate themselves among the curled tresses (of the goddess) that imitate the quivering movements of a swarm of black bees; (and) in which the face (of the goddess) resembles in beauty a fully expanded white water-lily (i.e. the god), enhanced by the sweetness of a yellow water-lily (i.e. goddess) brought to maturity by the rays of the sun.

Line 4 Possessed of a mind that was free from (the contaminations of) the Kali age like a very Raghu promoting the increase of the race of the Chaḷukyas; ever delighting in charity like (Karṇa), the son of the Sun; characterized by impetuosity, like Vṛikōdara, - (such was) the glorious and blameless and generous Vijayāditya-Satyāśraya, the favourite of fortune and of the earth, the *Mahārājādhirāja,* the *Paramēśvara,* the *Bhaṭṭāraka.* By him there was erected a great stone temple of (the god) the holy Vijayēśvara-bhaṭṭāraka. On the south of this:

Line 7 The dear son, of the glorious Vijayādityadēva, (was) the illustrious unrepulsed one, to whose feet obeisance was done by all feudatory chiefs, the bruiser of the town of Kāñchī, the glorious Vikramāditya-(II)-Satyāśraya, the favourite of fortune and of the earth, the *Mahārājādhirāja* the *Paramēśvara*, the *Bhaṭṭāraka.* His dear (or favourite) queen-consort, born in the race of the Haihayas, (was) Umā who like the divine (goddess) Umā, was a very mother of mankind. By her there was erected a great stone temple of (the god) the holy Lōkēśvara-bhaṭṭāraka. On the north of this: -

Line 11 Of (her) the glorious Lōkamahādēvi, the uterine younger sister,- a dear (or favourite) queen of the glorious Vikramādityadēva; (and) the mother of, - Hail -Kīrti-varman(II)-Satyāśraya, the favourite of fortune and of the earth, *Mahārājādhirāja*, the *Paramēśvara*, the *Bhaṭṭāraka*, the glorious Nṛipasiṁharāja, - (was) the glorious

Trailōkya-mahādēvī. By her there was erected a great stone temple of (the god) the holy Trailōkyēśvara-bhaṭṭāraka. On the (?) west of this: -

Line 15 Thus, in the middle of these (three) shrines, - by the sculptor Śubhadēva, who belongs to the Śāṇḍilya gōtra, (and) who is the son's son of the sculptor Śivavardhamāna, (and) the son of the sculptor Śiva; or, rather, by the Āchārya Jñānaśiva, who is the disciple of the disciple's disciple at the feet of him, the venerable and worshipful Payōbhakshin, who had the appellation of Śivaśāsana, (and) who has come here from the Mṛigathaṇikāhāra-vishaya on the north bank of the (river) Gaṅgā, (and) is dwelling in the asylum of (the god) the holy Vijayēśvara-bhaṭṭāraka, - there has been set up, in (?) the gateway of his own particular shrine, this great stone pillar, which bears the mark of the seal of the trident.

Line 18 Here is written this (following) charter, preceded by the (above) eulogy: - By the illustrious Śaṁ . . . . Ārya-Bhaṭṭa-Gaṅgādhara (?), who belongs to the Kauthuma (*śākhā*) and is adorned by (a knowledge of) the Vēda that consists of three thousand (verses), there has been given to Brahmamūrtti-Ārya-Bhaṭṭa-Trivikrama, who knows the four Vēdas, half of the village named . . . ., on the east of the village named Arpuṇuse in the Beḷvala-vishaya, which was acquired through a charter of Vijayāditya, (And) into his (Trivikrma's) hand, by the *Ācharya Jñānaśiva*, - in the month Śrāvaṇa, on the new-moon *tithi*, at a total eclipse of the sun; in order to increase the religious merit of (his) parents, (and for) his own welfare; as a provision for the discourses of the *Āchārya*, and for the studies of those who attend to the rites of the god; and for perfecting the worship of the god, there have been given, at his own shrine, fields (of the measure of) thirty *nivarttanas*, which were purchased with thirty *gadyāṇakas*[3] of gold; they should be preserved

. . . .

Notes

1. Paṭṭadakal seems to have been the ancient name of Kiśuvōḷal .(*EI*, VIII, p.3 and *EI*, XXXII, p.318)

2. The date is not found except about Śrāvaṇa, amāvāsya, Solar eclipse. But Fleet, gave the full details of the date Śaka 677 =754A.D. June 25 which had Śrāvana, amavāsya and Solar eclipse.

3. One *gadyana* is an equivalent of one *tōla* (DCS, *IEG*, p.108).

* * * *

No. 63

ZULAKALLU PLATES OF VIJAYADITYA I

Location : Zulakallu, Palnad Taluk, Guntur District.[1]
Andhra Pradesh

Date : C.755 A.D.[2]

Script : Early Telugu

Language : Sanskrit

King : Vijayāditya I

Dynasty : Eastern Chāḷukya

Reference : 1) Gai, G.S., *EI*, XXXVI, pp.300-302; Venkataramanayya, N,[3] *Epigraphia Āndhrica*, III, pp,1-4

Text

Metre : Vv. 1-4 *Anushtubh.*

स्वस्ति श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारितीपुत्राणां
कौशिकीवरप्रसादलब्धराज्यानां मातृगणपरिपालितान्नां स्वामिमहासेन
पादानुध्यातानां भगवन्नारायणप्रसादसमासादितवरवराहलांछनेक्षण
क्षणवशीकृताराातिमण्डलानां अश्वमेधावभृथस्नानपवित्रीकृतवपुषाञ्चलुक्या

नां कुलमलंकरिष्णोःविविधयुद्धलब्धविजयसिद्धेर्भुवनमनोराममंगियुवराजस्य पौत्रः नयविनयविक्रमोपार्जितचारुभूरिकीर्त्तेः सर्व्वलोकाश्रयश्री विष्णुवर्द्धन महाराजस्य प्रियतनयः स्वासिधाराप्रभावोपार्जिताशेषभूपाल मकुटकोटिमाणिक्यशाणकषणमसृणनखमणिकिरणकेसरोद्भासितपादपद्म युगलः प्रभु मन्त्रोत्साहशक्तिसंपन्नः परमब्रह्मण्यः परममाहेश्वरो माता पितृपादानुध्यातः समस्तभुवनाश्रयश्रीविजयादित्यमहाराजाधिराज परमेश्वरभट्टारकः पल्लिनाण्डुविषयनिवासिनो राष्ट्रकूटप्रमुखान्कुटुम्बिनः सर्व्वानित्थमाज्ञापयति विदितमस्तु वोस्माभिः परन्धूरुवास्तव्याय भारद्वाजसगोत्राय आपस्तम्भसूत्राय तैत्तिरीयसब्रह्मचारिणे वेदवेदांगविदे रुद्रशर्मणः पौत्राय स्व कर्मानुष्ठाननिपुणाय यज्ञशर्मणः पुत्राय वेदवेदांगेतिहास पुराणपारगाय चतुः षष्टिकलाभिज्ञाय साक्षात् ब्रह्मण इव गोलशर्मणे सर्व्वकरैः परिहारीकृत्यायुरारोग्यैश्वर्य्याभिवृद्धये अल्लुवाल्लुनाम ग्रामो दत्तः अस्यावधयः पूर्व्वतः चुविकण्ठिपोकरुसुसीम दक्षिणतः जुविकल्लु पश्चिमतः चिन्तपलि उत्तरतः मुपरु। सूर्यग्रहणनिमित्तं उदक पूर्वंकृत्वा सर्वकरपरिहारेण दत्तमस्योपरि न केनचिद्बाधा करणीया करोति यः पञ्चमहापातकसंयुक्तो भवति व्यासेनाप्युक्ताः श्लोकाः।

बहुभिः वसुधा दत्ता भहुभिश्चानुपालिता।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ १॥
स्वदत्ताम्परदत्तां वा यो हरेत वसुन्धराम्।
षष्टिर्व्वर्षसहस्राणि विष्ठायां जायते कृमिः॥ २॥

ब्रह्मस्वन्तु विषं घोरं न विषं विषमुच्यते ।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम् ॥ ३ ॥
आज्ञप्तिरस्य धर्मस्य निर्मलो धर्मसंग्रहः ।
बोळमनामा लोकेस्मिन् पुण्यचित्तो नरोत्तमः ॥ ४ ॥

मारमाचार्येण लिखितम् ।

Summary

[The introductory portion upto the mention of the dynasty of Chāḷukyas is very similar to that found in the other charters of this dynasty]

The grandson of Maṁgi-yuvarāja, who was an ornament in the family of Chāḷukyas, who gladdened the world, who had achieved victories in various battles, and the dear son of Vishṇuvarddhana, who had acquired great reputation and fame by employing diplomacy, conciliation and (where necessary) coercion (against his enemies) and was a refuge for all the world, was śrī-Vijayāditya - mahārājādhirāja - paramēśvara - bhaṭṭāraka, whose pair of lotus-like feet are resplendent with a golden tinge due to the rays emanating from the gems embedded in the crowns of all other rulers without exception, vanquished by him with the prowess of his sword, and the nails of which feet have become tender due to their being rubbed by those gems of all enemy kings. He is endowed with the three talents of domineering, deliberation and enthusiasm. He was pious and favourable to Brahmins, who was very much devoted to God Īśvara, who meditated on the feet of his parents. He is the refuge for all the worlds, He ordered all the husbandsmen, headed by *Rāshṭrakūṭa* residing in Palli-nāṇḍu-vishaya.[4] Let it be known to all by us, the village, Alluvālu[5] has been given on the occasion of the solar eclipse, with due oblation of water, and with exemption from all taxes, for the increase in health and prosperity (of ourselves) to Gōla-śarmman, who is like Brahmā incarnate, having mastered the *Vēdas, Vēdāṅgas*, *Itihāsas* and *Purāṇas* and being well conversant in the sixtyfour *kalās* (branches of knowledge – arts and sciences)[6] the son of Yajña-śarmman, who was adept in the performance of his ordained tasks and grandson of Rudra-śarmman, who was well-versed in the *Vēdas* as well as *Vēdāṅgas*, a student-adherent of Taittirīya-[śākhā], who belonged to Bhāradvāja-gōtra, and who was a follower of Āpastambha-sūtra (code of rules for the performance of the rituals ordained for a Brahmin) and a native of Paṟandhūru[7].

The (boundary) limits of the vllage were Alluvālu, on the east, the boundary of Chuvikaṇṭhipōkarusu, on the south Juvikalu, on the west Chintapali, on the north Mupaṟu[5].

None should cause any obstruction to this gift. If anyone obstructs, he will incur all the five great sins.

Vyāsa has also told the following verses [three of the usual imprecatory verses]

The executor (*ājñapti*) of (this charter) was the excellent Brahmin, by name Bōḻama who was pure, and had accumulated merit by adhering to and was performing the *dharmma* (the ordained way of life) and whose mind was (pervaded) by meritorious (thoughts); written by Māram-āchāryya.

Notes

1. This set of copper plates is now deposited with the Andhra Pradesh State Museum at Hyderabad.

2. The charter is undated. This approximate date has been assigned on the basis of known reign period of the king of the record.

3. Venkataramanayya, N. has edited this charter.

4. Pallināṇḍu-vishaya has been identified with the modern day Palnad taluk in Guntur district (*Ep.Andhrica*, III, p.2)

5. Alluvālu, the grant village has not been identified. However, the (village) Juvikalu on the south of Alluvālu has been understood as the old name of the findspot of the record. Chintapali is on the west of the modern Chintappalle, which is some three miles to the northwest of Zulakallu (*EI*, XXXVI, p.301).

6. *Kalā* has been defined as any "practical art, mechanical or fine art". The sixtyfour *kalās* are enumerated in Śaivatantra (T) (MW, *SED*, p.261).

7. Paṟandhūru, the village from which the donee hailed has been doubtfully identified with Parachuru in the Bapatla taluk, Guntur District, Andhra Pradesh. (*Ep.Andhrica*, III, p.2).

* * * *

No. 64

HANSOT PLATES OF THE CHAHAMANA BHARTRIVADDHA

Location	: Hansot, Anklesvar Taluk, Broach District. Gujarat
Date	: Vikrama 813 =756 A.D.
Script	: Siddhamātṛika (Early Nāgarī)
Language	: Sanskrit
King	: Bhartṛivaḍḍha
Dynasty	: Chāhamāna
Reference	: Sten Konow, *EI.*, XII, pp.197-204.

Text

Metres: Vv. 1, 2, 4, 5 & 7 *Anushṭubh;* 3 *Upajāti* ; 6 *Śālinī*

ऽओं स्वस्ति । विकटकटकोत्तुङ्गः सिद्धमण्डलमण्डनः ।
मेरुरिव जयाधारश्चाहमान . . . . क्रमः ॥ १ ॥

तस्मिन्वङ्शे समुत्पन्नः प्रकटपराक्रमाक्रान्तदिङ्मण्डलोनेकसमरसंघट्ट
रिपुगजघटाटोपविघटनदोर्द्दण्डः . . . जितसकलारातिपक्षः श्रीमहेश्वर
दामो नाम राजा बभूव । तस्य सुतः प्रकटिताशेषभूमण्डलप्रतापो विक्रमै
करसोनेक नरपतिशतमकुटतटघटितमणिनिकरनिकाममुल्लसितोद्योतित
चरणकमलयुगलः श्रीभीमधामः । तस्यात्मजोनेकसामन्तकिरीटकोटि
घृष्टचरणारविन्दः प्रसाधिताशेषभूमण्डलः श्रीमद्भर्तृवड्ढः । तस्य सुतो
विगतघनगगनशशिकरनिकरावदातया कीर्त्त्योन्मादितसकलजगत्त्रयः
आनतमहीपालमौलिमार्ज्जितचरणकमलयुगलः परममाहेश्वरः श्रीहरदामः
तस्य प्रियात्मजः प्रसाधिताशेषविपक्षमण्डलोदारश्रीः शशिकरनिर्म्मल

यशौघधवलितसकलभुवनः श्रीमद्धूभटदेवः। तस्य सुतः समस्तसद्गुणाधारभूतः परममाहेश्वरः समधिगतपञ्चमहाशब्दो महासामन्ताधिपतिः श्रीमद्भर्तृवड्ढः सर्व्वानिवागामिनृपतिमहत्तरवासापकादीन् समनुबोधयत्यस्तु वः संविदितं श्रीभृगुकच्छावस्थितैर्यथास्माभिर्मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये सौङ्गपद्रवास्तव्यायाध्वर्युमाध्यन्दिन कौण्डिन्यसगोत्र वाजसनेयसब्रह्मचारिणे ब्राह्मणभट्टबूटाय ताविपुत्रायाक्रूरेश्वरविषयान्तर्ग्गतस्य अर्जुनदेवीग्रामस्य सूर्यग्रहणे उदकपूर्व्वं संप्रतिपादितश्चतुर्थभागः॥ तथा वरमेविवास्तव्य तत्त्रैविद्यसामान्यमाठरसगोत्राय माध्यन्दिनसब्रह्मचारिब्राह्मणचरमशर्म्मपुत्रब्राह्मणजबाय चतुर्थ . . . . दितः। तथा सौङ्गपद्रवास्तव्याय तत्त्रैविद्यसामान्याध्वर्युमाध्यन्दिन असुरायणसगोत्राय वाजसनेयसब्रह्मचारिणे ब्राह्मणभाटल्लाय भट्ट वा . . . . पुत्राय अर्जुनदेवीग्रामोयमुदकपूर्व्वमादित्यग्रहणे संनिदत्त एवमेभ्यो र्ज्जुनदेवीग्रामः सोद्रङ्गः सोपरिकरो भूमिच्छिद्रन्यायेनाचाटभट प्रावेश्यः सहाभ्यन्तरसिद्धि . . . . यतोस्मद्वंश्यैरन्यैश्चागामिनृपतिभिः प्रबलपवन प्रेरितोदधि जलतरङ्गचंचलं जीवलोकमभावानुगतानसारान्विभवान्दीर्घ कालस्थेयसश्च गुणानाकलय्य सामान्यभोगभूप्रदानफलेप्सुभिः शशिकर रुचिरं चिराय यशश्चिचिचीषुभिः सोयमस्मद्दायोनुमन्तव्यः पालयितव्यश्चेति यो वाज्ञानतिमिरपटलावृतमतिराच्छिन्द्यादाच्छिद्यमानं वानुमोदेत स पंचभिर्म्महापातकैः संयुक्तः स्यादित्युक्तं च भगवता व्यासेन

वहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं ॥ २ ॥
यानीह दत्तानि पुरा नरेन्द्रैर्द्दानानि धर्म्मार्त्थयशस्कराणि ।
निर्म्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥ ३ ॥
विन्ध्याटविष्वतोयासु शुष्ककोटरवासिनः ।
कृष्णाहयो हि जायन्ते भूमिदायं हरन्ति ये ॥ ४ ॥
स्वदत्तां परदत्तां वा यो हरेत वसुन्धरां ।
तेन जाता जनेता च नरके पातिता ध्रुवं ॥ ५ ॥
सर्व्वानितान् भाविनः पार्थिवेन्द्रान् भूयो भूयो याचते भर्तृवड्ढः ।
सामान्योयं धर्म्मसेतुर्नृपाणां स्वे स्वे काले पालनीयो भवद्भिः ॥ ६ ॥
षष्टिर्वर्षसहस्राणि स्वर्ग्गे मोदति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥ ७ ॥

लिखितं एतन्मया वालभ्य भट्टकक्केण भट्ट वत्सुवसूनुना ऊनाक्षरमधिकाक्षरं वा सर्व्वमत्र प्रमाणमिति यदुपरिलिखितं श्रीमन्नागावलोकप्रवर्द्धमानविजयराज्ये श्रीभृगुकच्छावस्थित भट्टलल्लुवदूतकः ॥ यत्राङ्कतोपि सुविशुद्धसंवत्सरशताष्टके त्रयोदशाधिके ८०० १० ३

Translation

Ōṁ [||*] Well being.

Verse Victorious is the Chahamāna family, which was exalted with a large army, which had a big territory, which was like Mēru (which is lofty with large ridges) adorned with the circle of *siddhas*, with the support of Jaya (the Sun)

In that dynasty, there was a *Rājan* śrī-Mahēśvaradāma who invaded circle of the quarters with the valiant

prowess and whose staff-like arms which were meant to destroy the swelling frontal globes of the elephants of his foes in the encounters in numerous battles. His son was the illustrious Bhīmadāma, who had also the prowess of winning the battles, and whose pair of lotus feet were shining and splendid with jewels in the crowns of several hundred kings. His son was Bhartṛi-vaḍḍha I, whose feet were touched by the crowns of numerous feudatories. His son, the devoted worshipper of Mahēśvara, was the illustrious Haridāma who delighted all the three worlds. His son was illustrious Dhrūbhaṭa-dēva who whitened the whole world with his spotless fame. His son was Bhartṛivaḍḍha who was also a worshipper of Mahēśvara and who had the *pañcha-mahāśabdas* informed all (future) kings, *mahattaras*, *vāsāpakas* (officials whose duty it was to assign places of residence to strangers) and so forth.

Be it known to you for the merit of our parents and of ourselves, the fourth part of the Arjunadēvī[1] village situated within Akrurēsvara[2] district has been today on the occasion of the eclipse of the Sun after libation of water granted by us while staying in the glorious Bhṛigukachchha[3] to the resident of Saujñapadra[1] the Adhvaryu of the Mādhyandina branch and of the Kāunḍinya-gōtra, a student of the Vājasanēya-(*saṁhitā*), the Brāhmaṇa Bhaṭṭa Būṭa, the son of Tāvi. And a fourth part is also given to the Brāhmaṇa Jaba, the son of the Brāhmaṇa Charama-śarman, a resident of Varamēvi[1], belonging to the community of *tri-vēdins* of the Māṭhara-gōtra[4] and a student of Mādhyaṁdina branch. Likewise (another part?) of this village Arjunadēvī had on the occasion of the eclipse of the Sun after libation of water, been granted to the member of the community of *tri-vēdins* residing in Saujñapadra, to the Adhvaryu of the Mādhyandina branch of Āsurāyaṇa[5] gōtra, the student of the Vājasanēya-[*saṁhitā*] and to Brāhmaṇa Bhāṭalla, the son of Bhaṭṭa-vā . . . .

Because now the village Arjunadēvī has been granted with *udraṅga* and *uparikara* according to the *bhūmi-chchhidra* rule, not to be entered by *chāṭas* and *bhaṭas*, with *abhyantara-siddhi* (given to them), therefore this our gift should be sanctioned and preserved by future kings of our linege and others considering that the possessions are followed by destruction and without value, and that virtue lasts a long time. [Seven of the usual verses here said by worshipful Vyāsa] The *dūtaka* is Bhaṭṭalalluva a resident of śrī-Bhṛigukachchha. Issued in the victorious reign of śrīman Nāgāvalōka. This has been written by Bhaṭṭa Kakka from Valabhī, the son of Bhaṭṭa Vatsuva. In figures 813.

Notes

1. Arjunadēvi, Saujñapadra as also Varamēvi villages had not been identified.

2. Akrūrēvarā is modern Anklēśvar, now a taluk place in Broach District.

3. Bhṛgukachchha is the same as the present town of Broach . (*EI*, XII, p.201).

4. Māṭhara-gotra has the *pravara* of Kāśyapa, Āvatsāra, Raibha or Vatsāra, Kaśyapa, Nidhruva (J.Brough, pp.163, 168, Śāthara-Mātharas is not in Webster's Berlin copy of Bodseian).

5. Āsurāyaṇa gōtra has the *pravara* of Kāśyapa, Āvatsāra and Naidhruva or Vāsishṭha (*ibid.*, pp.159-160, 163, 166).

* * *

No.65

VAKKALERI PLATES OF KIRTIVARMAN II

Location : Vakkalēri, Kolar District, Karnataka.
Date : Śaka 679=757 A.D.[1]
Script : Telugu-Kannaḍa
Language : Sanskrit
King :·Kirtivarman II
Dynasty : Chālukya of Vātāpi
Reference : Kielhorn, F., *EI*, V, pp. 200-205

Text

Metre: Vv. 1-4 *Anushṭubh*

स्वस्ति । जयत्याविष्कृतम् विष्णोर्व्वाराहं क्षोभितार्णवम् ।
दक्षिणोन्नतदंष्ट्राग्रविश्रान्तभुवनं वपुः ॥ १ ॥

श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारितीपुत्राणां सप्तलोक
मातृभिस्सप्तमातृभिरभिवर्द्धितानां कार्त्तिकेयपरिरक्षणप्राप्तकल्याणपरम्परा
णाम्भगवन्नारायणप्रसादसमासादितवराहलांछनेक्षणक्षणवशीकृताशेषमही
भृतां चलुक्यानां कुलमलंकरिष्णोरश्वमेधावभृथस्नानपवित्रीकृत गात्रस्य
श्रीपोलेकेशिवल्लभमहाराजस्य सूनुः पराक्रमाक्रान्तवनवास्यादि
परनृपतिमण्डलप्रणिबद्धविशुद्धकीर्त्ति श्रीकीर्त्तिवर्म्मपृथिवीवल्लभमहाराज
स्तस्यात्मजस्समरसंसक्तसकलोत्तरापथेश्वरश्रीहर्षवर्द्धनपराजयोपात्तपरमे
श्वरशब्दस्तस्य सत्याश्रयश्रीपृथिवीवल्लभमहाराजाधिराजपरमेश्वरस्तस्य
प्रियतनयस्य प्रज्ञातनयस्य खड्गमात्रसहायस्य चित्रकण्ठाभिधानप्रवर
तुरंगमेणैकेनैवोत्सादिताशेषविजिगीषोरवनिपतित्रितयान्तरितां स्वगुरो
श्रियमात्मसात्कृत्वा प्रभावकुलिशदलितपाण्ड्यचोळकेरळकळभ्रप्रभृतिभू

भृदद्भ्रविभ्रमस्यानन्यावनतकाञ्चीपतिमकुटचुम्बितपादाम्बुजस्य विक्रा
मादित्यसत्याश्रयश्रीपृथिवीवल्लभमहाराजाधिराजपरमेश्वरभट्टारकस्य प्रिय
सूनोः बालेन्दुशेखरस्य तारकारातिरिव दैत्यबलमतिसमुद्धतं त्रैराज्य
काञ्चीपतिबलमवष्टभ्य करदीकृतकवेरपारसीकसिंहळादिद्वीपाधिपस्य
सकलोत्तरापथनाथमथनोपार्ज्जित पाळिध्वजादिसमस्तपारमैश्वर्य्यचिह्नस्य
विनयादित्यसत्याश्रय श्रीपृथिवीवल्लभमहाराजाधिराजपरमेश्वरभट्टारकस्य
प्रियात्मजश्शैव एवाधिगताशेषास्त्रशास्त्रो दक्षिणाशा विजयिनि पितामहे
समुन्मूलितनिखिलकण्टकसंहतिरुत्तरापथविजिगीषोर्गुरोरग्रत एवाहवव्या
पारमाचरन्नरातिगजघटापाटनविशीर्य्यमाणकृपाण धारस्समग्रविग्रहाग्रे
सरस्सन्साहसरसिकःपराञ्मुखीकृतशत्रुमण्डलो गंगायमुनापाळिध्वजपद
डक्कामहाशब्दचिह्नमाणिक्यमतंगजादीन्पितृसात्कुर्व्वन्परैः पलायमानैरा
साद्यकथमपि विधिवशादपनीतोपि प्रतापादेव विषयप्रकोप
मराजकमुत्सारयन्वत्सराज इवानपेक्षितापरसहायकस्तदवग्रहान्नि र्गत्य
स्वभुजावष्टम्भप्रसाधिताशेषविश्वम्भरः प्रभुरखण्डितशक्तित्रयत्वा च्छत्रु
मदभङ्जनत्वादुदारत्वान्निरवद्यत्वाद्यस्समस्त भुवनाश्रयस्सकलपारमैश्व
र्य्यव्यक्तिहेतुपाळिध्वजाद्युज्ज्वलप्राज्यराज्यो विजयादित्यसत्याश्रय
श्रीपृथिवीवल्लभमहाराजाधिराजपरमेश्वरभट्टारकस्य प्रियपुत्रस्सकलभुवन
साम्राज्यलक्ष्मीस्वयंवराभिषेकसमयानन्तरसमुपजातमहोत्साह आत्म
वंशजपूर्व्वनृपतिच्छायापहारिणः प्रकृत्यमित्रस्य पल्लवस्य समूलोन्मूल
नाय कृतमतिर्गनित्वरया तुंडाकविषयं प्राप्याभिमुखागतन्नन्दिपोत

वर्म्माभिधानम्पल्लवं रणमुखे संप्रहृत्य प्रपलाय्य कटुमुखवादित्र
समुद्रघोषाभिधानवाद्यविशेषौखट्वांगध्वजं प्रभूतप्रख्यातहस्तिवरान्स्व
किरणनिकर विकासनिराकृततिमिरम्माणिक्यराशिङ्च हस्ते कृत्वा
कलशभवनिलय हरिदंगनांचितकंचीयमानां कांचीमविनाश्य प्रविश्य
सततप्रवृत्तदान नन्दितद्विजदीनानाथजनो नरसिंहपोतवर्म्मनिर्म्मापित
तीतेषु प्रवर्द्धमानविजयराजसंवत्सरे एकादशे वर्त्तमाने भीमरथिनद्युत्तरतट
शिलामयराजसिंहेश्वरादि देवकुलसुवर्णराशिप्रत्यर्प्पणोपार्ज्जितोर्जितपुण्यो
निवारितप्रतापप्रसरप्रतापितपाण्ड्यचोळकेरळकळभ्रप्रभृति राजन्यकः
क्षुभितकरिमकरकरहतदलितशुक्तिमुक्तमुक्ताफलप्रकरमरीचिजालविलसित
वेलाकुले घूर्णमानार्णो निधाने दक्षिणार्णवे शरदमलशशधरविशदय
शोराशिमयं जयस्तम्भमतिष्ठिपद्विक्रमादित्यसत्याश्रयश्रीपृथिवीवल्लभ
महाराजाधिराजपरमेश्वरभट्टारकस्य प्रियसूनुर्बाल्ये सुशिक्षितशस्त्रशास्त्र
श्शत्रुषड्वर्ग्गनिग्रहपरस्स्वगुणकलापानन्दितहृदयेन पित्रा समारोपित
यौवराज्यः स्वकुलवैरिणः काञ्चीपतेर्न्निग्रहाय मां प्रेषयेत्यादेशं प्रार्थ्य
लब्ध्वा तदनन्तरमेव कृतप्रयाणस्सन्नभिमुखमागत्य प्रकाशयुद्धं कर्तुम
समर्थं प्रविष्टदुर्ग्गम्पल्लवं भग्नशक्तिं कृत्वा मत्तमतंगजमाणिक्यसुवर्ण
कोटीरादाय पित्रे समर्पितवानेवं क्रमेण प्राप्त सार्व्वभौमपदः प्रतापा
नुरागावनतसामन्तमकुटमालारजःपुंजपिंजरित चरणसरसीरुहः कीर्त्ति
वर्म्मसत्याश्रय श्रीपृथिवीवल्लभमहाराजाधिराजपरमेश्वरभट्टारकस्सर्व्वानेव
माज्ञापयति। विदितमस्तु वोस्माभिर्नवसप्तत्युत्तरषट्छतेषुशकवर्षेष्व

स्थभण्डारगविट्टगेनामग्राममधिवसति विजयस्कन्धावारे भाद्रपदपौर्णमास्यां श्रीदोसिराजविज्ञापनया कामकायनगोत्राय ऋग्यजुर्व्वेदपारगश्रीविष्णुशर्म्मणः पौत्राय कृष्णशर्म्मणः पुत्राय माधवशर्म्मणे पानुङ्गल्विषये अरदोरेनदीदक्षिणतटे तामरमुगे पानुङ्गल् किरुवळ्ळि बाळवुरु इत्येतेषां ग्रामाणां मध्ये नेङ्गियूर्न्नन्दिवळ्ळिसहितस्सुळ्ळियू न्नाम ग्रामो दत्तस्तदागामिभिरस्मद्वंश्यैरन्यैश्च राजभिरायुरैश्वर्य्यादीनां विलसितमचिरांशुचञ्चलमवगच्छद्भिराचन्द्रार्क धरार्णवस्थितिसमकालं यशश्चिचीषुभिस्स्वदत्तिनिर्व्विशेषम्परिपालनीयम् ॥ उक्तञ्च भगवता वेदव्यासेन व्यासेन ।

बहुभिर्व्वसुधा भुक्ता राजभिस्सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ २ ॥
स्वन्दातुं सुमहच्छक्यं दुःखमन्यस्य पालनं ।
दानं वा पालनं वेति दानाच्छ्रेयोनुपालनं ॥ ३ ॥
स्वदत्ताम्परदत्तां वा यो हरेत वसुन्धरां ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिरिति ॥ ४ ॥

महासान्धिविग्रहिकश्रीमदनिवारितधनंजयपुण्यवल्लभेन लिखितमिदं शासनं ॥

Translation`

Verse 1 Good prosperiiy. The usual benediction for God Varāha.

Prose As usual upto the mention of Pulakēśin II the genealogy is described. That Pulakēśin II's son was

Vikramāditya who had all the strategies. He had the sword as his weapon as also the horse named Chitrakaṇṭha with which he became victorious. He had recovered for himself the wealth of his parent (predecessors) which was abstracted by the triad of kings and with his hatchet he had crushed the kings of Pāṇḍya, Chōḷa, Kēraḷa, Kaḷabhra and such others. He made the Kāñchīpati to kiss his lotus feet with the latter's crown. He had the titles of *Śatyāśraya*, *śrī-Pṛithivī-vallabha*, *Mahārājādhirāja Paramēśvara* and *Bhaṭṭāraka*. His son was like the son of one who had the crown of the young moon and who had crushed the demon Tāraka. He had stopped the pride of the lord of Kāñchīpuram even though the latter had three kings (?) to help him.

He had levied the tribute from Kavēra, Pārasīka and Simhaḷa. He had many elephants and also had the emblems of *Pāḷidhvaja* etc. to show his greatness and his crushing of the northern kings. His son was Vinayāditya who also had the titles, *Satyāśraya*, *śrī-Prithivī-Vallabha*, *Mahārājādhirāja*, *Paramamāhēśvara* and *Bhaṭṭāraka*. Though he was only young, he was the master of arms and missiles. When his grandfather was conquering the southern kingdoms, this grandson was vanquishing the northern regions. He could split the elephants and conquering many enemies got many elephants and diadoms. He got the emblems of Gaṅgā-Yamunā *pāḷidhvaja*, *pada*, *ḍhakka* etc. While he was fighting those many enemies but due to some reason, he had been held by the enemies like Vatsarāja. But he was able to get out of the confinement without external help and due to prowess of his arms became the illustrious support of this world. He was generous and unblameable. He could get again emblems of *pālidhvaja* etc. His son was Satyāśraya, Pṛithivīvallabha, Mahārāja, Paramēśvara, Bhaṭṭāraka Vijayāditya who, with a view to thoroughly iradicating his natural enemy, the Pallava, quickly conquered the

Tuṁdaka-rāshtra (Toṇḍai-maṇḍalam), made Nandi-pōta to flee having obtained the Kaṭumukha (a musical instrument) Samudraghōsha (another musical instrument) and the skull-club. He also obtained heaps of diamonds. Kāñchī was destroyed but the temple of Rājasiṁha was spared. At the same time he had also vanquished the kings of Pāṇḍyas, Chōḷa, Kēraḷa, and Kaḷabhra. His son was Satyāśraya, śrī-Prithivīvallabha, Mahārājādhirāja, Paramēśvara, Bhaṭṭāraka Vikramāditya whose son was again dexterous of arms and missiles. Even though he was still young he was made the *yuvarāja*. Just as usual he vanquished Kāñchī and acquired crores of diamond and a lot of gold. This Satyāśraya, śrī-Prithivīvallabha Mahārājādhiraja, Paramēśvara, Bhaṭṭāraka Kīrttivarmma conferred - on the Śaka 679 and during his eleventh regnal year, on the northern bank of the river Bhīmarathī, when he was camping in the village of Bhaṇḍāraga-viṭṭage, on the fullmoon day of Bhādrapada, at the request of śrī-Deśirāja on Mādhava-śarmman, son of Kṛishṇa-śarmman and grandson of Vishṇu-śarmman, in the Kāmakāyana-gōtra, who was well versed in the Ṛig-vēda and Yajur-vēda the village Sulliyūr in the Pānungal-vishaya[2] very near to the village Neṅgiyūr-Nandivaḷḷi and in the midst of the villages Tāmaramuge, Pānuṅgal-Kiṟuvaḷḷi and Bālāvura[3] on the southern bank of the river Aṟudōṟa.

This grant may be protected in future by all – whether of our family or others – who desire everlasting fame.

[Then follow three of the usual imprecatory verses ascribed to the worshipful Vēdavyāsa.]

This charter was written by *Mahāsāndhivigrahika*, śrīmad-Anivārita[4] Dhanañjaya Puṇyavallabha.

Notes

1. Bhaṇḍāraka-viṭṭage must be the modern Bhandār-kawte (Kowteh of the map on the stream which flows into the stream known as Sīna which again flows into the River Bhīmarathi) (*EI*, V, p.201).

2. Pānuṅgal is the modern Hāngal in the Dharwar District. (*ibid.*)

3. Bāḷavura seems to be modern Bāḷūr, three miles south by east of Hāngal (*ibid*).

4. *Anivārita* was probably the title of Vikramāditya I (*USVAE*, Vol.IV, part II, No.8)

5. The other persons have not been identified.

* * * *

No. 66

HULLENAHALLI PLATES OF SRIPURUSHA

Location	: Huḷḷenahaḷli, Mandya Taluk, Mandya District, Karnataka
Date	: C. 760 A.D.
Script	: Early Kannaḍa
Language	: Sanskrit, Kannaḍa
King	: Śrīpurusha
Dynasty	: Western Gaṅga
Reference	: 1) Shama Sastry, R., *MAR*, 1927, pp.105-110; 2) Ramesh, K.V., *IWG.*, No.65.

Text

Metre: Vv. 1, 4 *Sragdharā;* 2 *Vasantatilakā* ; 3 *Śārdula-vikṛita* ; 5, 6, 7 *Anushṭubh.*

स्वस्ति जितं भगवता गतघनगगनाभेन पद्मनाभेन श्रीमत्जाह्नवेय कुलामलव्योमावभासनभास्करः स्वखड्गैकप्रहारखण्डितमहाशिलास्तम्भलब्धवलपराक्रमो दारुणारिगणविदारणोपलब्धव्रणविभूषणविभूषितः काण्वायनसगोत्रः श्रीमत्कोङ्गुणिवर्म्मधर्म्ममहाधिराजः तस्य पुत्रः पितुरन्वागतगुणयुक्तो विद्याविनयविहितवृत्तः सम्यक्प्रजापालनमात्राधिगतराज्यप्रयोजनो विद्वत्कविकाञ्चननिकषोपलभूतो नीतिशास्त्रस्य वक्तृप्रयोक्तृकुशलो दत्तकसूत्रवृत्तेर्प्रणेता श्रीमान् माधवमहाधिराजः

तत्पुत्रः पितृपैतामहगुणयुक्तोनेकचातुर्द्दन्तयुद्धावाप्तचतुरुदधिसलिला
स्वादितयशाः श्रीमत् हरिवर्म्ममहाधिराजः तत्पुत्रः द्विजगुरुदेवता
पूजनपरो नारायणचरणानुध्यात श्रीमत् विष्णुगोपमहाधिराजः तत्पुत्रः
त्र्यम्बकचरणाम्भोरुहरजर्पवित्रकृतोत्तमाङ्गः स्वभुजवलपराक्रमक्रयक्रीत
राज्यः कलियुगबलपङ्कावसन्नधर्म्मवृषोद्धरणनित्यसन्नद्धः श्रीमान् माधव
महाधिराजः तस्य पुत्रः विद्याविनयातिशयपरिपूरितात्मा निरवग्रह
प्रधानशौर्य्यः श्रीमत् अवनीतनामधेयः तस्य पुत्रः विजृम्भमाणशक्तित्रयः
अन्दरिआलत्तूर्पोरुळरेपेळ्नगराद्यनेकसमरमुखमखहुतप्रहतशूरपुरुषपशू
पहारविघसविहस्तीकृतान्ताग्निमुखः किरातार्ज्जुनीयपञ्चदशटीकाकारः
दुर्विनीतनामधेयः तस्य पुत्रः दुर्द्दन्तविमर्द्दविमृदितविश्वम्भराधिप
मौलिमालामकरन्दपुञ्जपिञ्जरीक्रियमाणचरणयुगलनळिनः मुष्करनामधेयः
तस्य पुत्रः चतुर्द्दशविद्यास्थानाधिगतविमलमतिः विशेषतोऽनवशेषस्य
वक्तृप्रयोक्तृकुशलो रिपुतिमिरनिकरनिराकरणोदयभास्करः श्रीविक्रम
प्रथितनामधेयः तस्य पुत्रः अनेकसमरसम्पादितविजृम्भितद्विरद
रदनकुलिशाभिगातः व्रणसम्रूढभास्वद्विजयलक्षणलक्षीकृतविशालवक्ष
स्थलः समधिगतसकलशास्त्रार्त्थतत्वः समाराधित त्रिवर्ग्गः निरवद्य
चरितर्प्रतिदिनम् अभिवर्द्धमानप्रभावो भूविक्रमनामधेयः अपि च

नानाहेतिप्रहारप्रविघटितभटोरःकवाटोत्थितासृक्
धारास्वादप्रमत्तद्विपशतचरणक्षोदसम्मर्द्दभीमे ।
सङ्ग्रामे पल्लवेन्द्रान् नरपतिमजयद् यो विळन्दाभिधाने

राजा श्रीवल्लभाख्यस्समरशतजयावाप्तलक्ष्मीविलासः ॥ १ ॥

तस्यानुजो नतनरेन्द्रकिरीटकोटि
रत्नार्क्कदीधितिविराजितपादपद्मः ।
लक्ष्म्या स्वयम्वृतपतिर्न्नवकामनामा
सृष्टप्रियोरिगणविदारणगीतकीर्त्तिः ॥ २ ॥

तस्य कोङ्गुणिमहाराजस्य शिवमारापरनामधेयस्य पौत्रः समवनत समस्तसामन्तमकुटघट्टितबहुलरत्नविलसदमरधनुष्खण्डमण्डितचरणनख मण्डलः नारायणचरणनिहितभक्तिः शूरपुरुषतुरगनरवारणघटासंघट्ट दारुणसमरशिरसिविहितात्मकोपो भीमकोपः प्रकटरतिसमयसमनुवर्त्तन चतुरयुवतिजनलोकधूर्तो लोकधूर्तः सुदुर्द्धरानेकयुद्धमूर्द्धलब्धविजयसंपद् अहितगजघटाकेसरी राजकेसरी अपि च

यो गङ्गान्वयनिर्म्मलाम्बरतलव्याभासनप्रोल्लसन्
मार्तण्डोरिभयङ्करः शुभकरः सन्मार्गरक्षाकरः ।
सौराज्यं समुपेत्यराजसमितौ राजन् गुणैरुत्तमै
राजा श्री पुरुषश्चिरं विजयते राजन्यचूडामणिः ॥ ३ ॥
कामो रामासु चापे दशरथतनयो विक्रमे जामदग्न्यः
प्राज्यैश्वर्य्ये बलारिर्व्बहुमहसि रवि स्वप्रभुत्वे धनेशः ।
भूयो विख्यातशक्तिः स्फुटतरमखिलप्राणभाजां विधाता
धात्रा सृष्टप्रजानां पतिरितिकवयो यं प्रशंसन्ति नित्यम् ॥ ४ ॥

स तु प्रतिदिनप्रवृत्तमहादानजनितपुण्याहघोषमुखरितमन्दिरोदरः

श्रीपुरुषप्रथमनामधेयः पृथिवीकोङ्गुणिमहाराजाधिराजः बाणवंशोद्भवः

स्वदत्तां परदत्तां वा यो हरेत वसुन्धरां ।

षष्टिर्वर्षसहस्राणि विष्ठायां जायते कृमिः ॥ ५ ॥

बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः ।

यस्य यस्य यतो भूमिस्तस्य तस्य तदा फलम् ॥ ६ ॥

ब्रह्मस्वन्तु विषं घोरं न विषं विषमुच्यते ।

विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम् ॥ ७ ॥

Translation

[The introductory portion of this charter upto the mention of the ruler of the charter, Pṛithivī-Koṅguṇi-mahārājādhirāja who had the first name Śrīpurusha, is almost identical with the corresponding portion in the Jāvāḷi charter dealt with above No.58].

Kannaḍa prose : Śrī-Diṇḍigarar born in the family of Bāṇas who was administering Oḻnūḷu in Kaṟvappu-nāḍu-1000, made the supplication to Śrīpurusha-mahārāja on the occasion of Dakshiṇāyana-vishu, the king divided the village Kovaḷeveṭṭu, into three parts, and granted each part respectively to Janārddēana of Gārgya-sagōtra, Kēśav-abhaṭṭa of Kauśika-gōtra who knew all *śastras* by name (?) and Nāga-śarmman of Kāśyapa-gōtra, as *brahma-dēya*[2].

With Diṇḍigē-nāḍiyar and Kaundaḍi occupying the office of *perggaḍe,*[3] Beḷ.ḷiyar of Nagarūr, Vaṇṇākar of Maravūr, Mādadi of Kallaḍupi and Jiyavāyar of Mōdūr were (inducted as) witnesses

Three house-sites (?) were also granted[4] .

[Then the boundaries of the village granted are detailed in the Kannaḍa language[5]. That is followed by three of the usual verses[6] extolling the merit of land-grants and pointing out the dire consequences of ravaging such lands granted.]

Notes

1. This approximate date has been assigned to this undated charter on the strength of the other dated charters of this king recording grants to Brahmins dealt with above (See No. 59)

2. The text here is very corruptly drafted. The translation as given above is tentative. The phrase, *nāmata[h*] sarvva-śāstrasya jānāti* indicates only that the person referred to (i.e.) Kēśava-bhaṭṭa only knew the *śāstras* by name.

3. *Perggaḍe* – From the context, it can be understood that the term referred to the superintendent of the concerned geographical division (See Sircar, D.C., *IEG,* pp. 128, 249, 369).

4. The translation here follows that of Ramesh, K.V. who has partly amended the text (*Padeyam mūṟum=āse* which is clearly readable on the charter) to °'*mūṟu manē* to bring out this meaning, as otherwise the text as it is, is unintelligible.

5. In the same way as in other charters, the granted village is stated to have been bounded by several topographical features, which must have been quite cognisible to the people of the locality. It is noteworthy that several tanks and a *pādari* tree are stated to have marked the boundaries in most of the directions.

6. In this charter, there is no reference to the author/authors who composed the socalled imprecatory verses, quoted here.

####

No.67

HOSUR PLATES OF SRIPURUSHA

Location	: Hosur, Goribidnur Taluk, Kolar District, Karnataka
Date	: Śaka 684=762 A.D.[1]
Script	: Early Kannaḍa
Language	: Sanskrit
King	: Śrīpurusha *alias* Pṛithivī-Koṅgaṇi-mahārāja
Dynasty	: Gaṅga of Talakāḍu
Reference	: Rice, Lewis, *EC* X, Gd.47; Ramesh, K.V., *Ins. of the Western Gaṅgas*, No.45

Text

Metre:

सिद्धम्। स्वस्ति। जितम्भगवता गतघनगगनाभेन पद्मनाभेन। श्रीमद् जाह्नवेयकुलामलव्योमावभासन भास्करः स्वखड्गैकप्रहार खण्डित महा शिलास्तम्भलब्धबलपराक्रमो दारुणारिगणविदारणोपलब्धव्रणविभूषण विभूषितः काण्वायनसगोत्रः श्रीमत्कोञ्गणिवर्म्मधर्म्ममहाधिराजः तस्य पुत्रः पितुरन्वागतगुणयुक्तो विद्याविनयविहितवृत्तः सम्यक्प्रजापाल नमात्राधिगतराज्यप्रयोजनो विद्वत्कविकाञ्चननिकषोपलभूतो नीति शास्त्रस्य वक्तृप्रयोक्तृकुशलो दत्तकसूत्र विवृत्तेःप्रणेता श्रीमान्माधव महा धिराजः तत्पुत्रः पितृपैतामहगुणयुक्तोऽनेकचातुर्द्दन्तयुद्धावाप्त चतुरुदधि सलिलास्वादितयशाः श्रीमद्धरिवर्म्म महाधिराजः तत्पुत्रः त्रयम्बक चरणाम्भोरुहरजःपवित्रीकृतोत्तमाङ्गः स्वभुजबलपराक्रमक्रयक्रीतराज्यः कलियुगबलपंकावसन्नधर्म्मवृषोद्धरणनित्यसन्नद्धः श्रीमान्माधवमहाधि

राजः तत्पुत्रः श्रीमत्क्दम्बकुलगगन गभस्तिमालिनः कृष्णावर्म्ममहाधि
राजस्य प्रियभागिनेयो विद्याविनायातिशयपरिपूरितान्तरात्मा निरवग्रह
प्रधानशौर्य्योविद्वत्सु प्रथमगण्यः श्रीमान्कोङ्गणिमहाधिराजः अविनीतनामा
तत्पुत्रो विजृम्भमाणशक्तित्रयः अन्दरि आलत्तूप्पोंरुळरेपेर्न्नगराद्यनेकस
मरमुखमखहुतप्रहतशूरपुरुषपशूपहारविघसविहस्तीकृतकृतान्ताग्निमुखः
किरातार्जुनीयपञ्चदशसर्ग्गटीकाकारोदुर्व्विनीतनामधेयः तस्य पुत्रो दुर्द्दान्त
विमर्द्दविमृदितविश्वम्भराधिप मौलिमालामकरन्दपुञ्जपिञ्जरीक्रियमाणचरण
युगलनळिनोमुष्करनामधेयः तस्य पुत्रः चतुर्द्दशविद्यास्थानाधिगत विमल
मतिः विशेषतोऽनवशेषस्य नीतिशास्त्रस्य वक्तृप्रयोक्तृकुशलो रिपुतिमिर
निराकरणोदयभास्करः श्रीविक्रमप्रथित नामधेयः तस्य पुत्रः अनेकसमर
सम्पादितविजृम्भितद्विरदरदनकुलिशाभिघातः व्रणसंरूढभास्वद्विजयल
क्षणलक्षीकृतविशालवक्षस्थलः समधिगत सकलशास्त्रार्थतत्त्वः समारा
धितत्रिवर्ग्गो निरवद्यचरित। प्रभावो भूविक्रमनामधेयः। अपि च।

नानाहेतिप्रहार प्रविघटित भटोर . . कवाटोत्थितासृग्
धारास्वादप्रमत्तद्विपशतचरणक्षोदसम्मर्द्दभीमे।
संग्रामेपल्लवेन्द्रं नरपतिमजयद्योविळन्दाभिधाने
5. This statement indicates how piously these chiefs adhered to the Jain faith.

6. *Gunda* and its variant *kunda* is seem to have been incorporated in their names by the members of this family of chiefs. *Yuvarāja* attached to the name Nirgunda-yuvarāja, can be studied in the context of the use of this title in other charters. That title signified that the chief concerned was a subordinate of a suzerain and a very close adherent at that. In these instances the epithet does not seem to have meant to refer to the heir apparent.

7. The *vishaya*, the territorial subdivision seems to have acquired this name on account of its having been the territory controlled by the Nirgundarāja. However, the latter's supplication to his suzareign to get the grant made in favour of the temple of Jina indicated that he was not free to dispose of the land in that territory at his pleasure.

8. Jasahitadēva was obviously a hitherto unknown alternate name of Śrīpurusha-Pṛithivī-koṅgaṇi-mahārāja. The citation of this name here might have had a special significance unfathomable at the present time.

9. The reservoir as well as the husbandsman had obviously been named after the first name Nirguṇḍa-yuvarāja. These names again indicate the identification of the area with the family of those Bāṇa chiefs.

10. Here the words *kaṇḍuga* or *gaṇḍuga* as used can be understood as corrupt or variant forms of the word *khaṇḍuga*, a measure of capacity as found used in the other charters (*cf.* Sircar, D.C., *IEG*, p.156).

11. Dēvamgēri-madamane as it is distinguished from *maneya manē-tanam* (sites for houses) must have referred to a site of a special character. It is quite possible *mada* is a corrupted form of *maṭha* and this is a reference to the site for a monastery at Dēvamgēri.

12. The eighteen types of citizens/subjects (*ashṭā-daśa-prakṛitiyaḥ*) are stated to refer to all classes of tenants/ tenants belonging to all communities (*ibid.*, p.32). It is quie likely *prakṛitayaḥ* as used here was meant to be a synonym of *jāti* or *prajā*, or castes, enumerated by Kittel (*Kannaḍa-English Dictionary*), as numbering eighteen in Kannaḍa -speaking areas: as Brāhmaṇa, Kshatriya, Vaiśya, Liṅga-vanta, Baṇajiga, Gaṅgaḍikāra-Vokkaliga, Maḍivāli, Kelasiga, Kuṟuba, Kumbāra, Kaṭuka, Baḍagi, Akkasāle, Toreya, Uppāra, Besta, Holeya and Mādiga (*cf. ibid.*, p.31; Ramesh, K.V., *op.cit.*, p.189 n.4).

13. The number of *vishayas*, territorial divisions, ninetysix thousand, is again a conventional one apparently intended to indicate the whole of socially and politically organized world.

14. *Kaṅgu* is stated to be a (special kind of) millet (could it be the same as the Tamil *kambü*)

15. Though not specified in the charter these fields apparently were part of the village Ponnaḷḷi, granted to the Jinālaya and had been set apart as the fee for his effort to the writer of the record, Viśvakarmmāchāryya. The specification that these fields should be regarded and protected in the same way as a *brahmadēyam* (special tenure in respect of the land granted to and held by Brahmins) indicated the esteem in which the community of artisans was held in that period.

* * *

No. 84

TIRUPPATTUR INSCRIPTION OF VARAGUNA I

Location : Tiruppattūr, Tiruppattur Taluk,
Ramanathapura District, Tamilnadu
Date : Year 6+4 (4+6) = 778 A.D.[1]
Script : Grantha , Tamil
Language : Sanskrit, Tamil
King : Māṟaṉ - Śaḍaiyaṉ (Varaguṇa I)
Dynasty : Pāṇḍya
Reference : Ramanatha Iyer, A.S., *SII*, XIV, No.9

Text

Metres : *Anushṭubh*

स्वस्ति श्री ।

दीपार्त्थं श्री स्थलीशाय दिनाराणां दशादिशत् ।
पट्टाख्यमारतनया शंकरस्य प्रिया सती ॥ १ ॥

Translation

Verse Paṭṭā, the daughter of Māra and the dear and devoted (wife) of Śaṁkara gave 10 *dīnāras*[2] for a lamp for śrī-Sthalīśa

[The Tamil text which follows, starts with the mention of the king and date and enlightens that the donatrix Māṟam Paṭṭattāḷ,[3] was a *brāmaṇi* (Brahmin wife) of Mōśi Kaṇḍan-Śaṅkaran, son of the kiḻār of Arugandūr.[4] The God for whom the benefaction was made was referred to as Tiruttaḷi-pperumānaḍigaḷ[5] of Tiruppattūr. The protection of the 1,700 was invoked for the benefaction and for this (kindness) the donatrix was prepared to bear the feet (of the protector) on her head].

Notes

1. From the placing of this inscription in the volume dealing with inscriptions of the Pāṇḍyas, it is concluded that Māṟan-Śaḍaiyaṉ, the Pāṇḍya king cited in this record was identical with the Jaṭāvarman

Parāntaka of the charter discussed above.

2. The word *dināra* which is otherwise known as the name of a gold coin current in west Asia, has been used here in the Sanskrit text to denote what was locally known as *kāśu*. The Tamil text says that 10 *kāśu*. was deposited for the carrying out of the benefaction.

3. The name indicated that Paṭṭattāḷ was the daughter of Māṟan (*cf.* the Sanskrit text). It is noteworthy that the lady continued to add her father's name even after marriage.

4. The designation *kiḻār* literally indicated only an "elder". But the reference here to the *kiḻār*, as one of a place called Arugandūr, indicates that the person concerned, the father-in-law of the donatrix, was a leading citizen or an officially entitled lord of that village. Probably Mōśi kaṇḍaṉ Śaṅkaraṉ, his son would inherit the title on the demise of his father.

5. It will be seen that it is this designation of the God in Tamil which was rendered as *śrī-sthalīśa* in the Sanskrit verse prefacing this inscription. Śrī-sthala is stated to be the name of a temple of Śiva (MW, *SED*, p.1100, col.2). Apparently, *tiruttaḷi* or śrī-sthali was a designation applicable only to the temple of God Śiva.

* * * *

No. 85

DHULIA PLATES OF KARKARAJA

Location : Dhulia, Dhulia District, Maharashtra
Date : Śaka 701=779 A.D.
Script : Early Nāgarī
Language : Sanskrit
King : Karkkarāja
Dynasty : Rāshṭrakūṭa
Reference : Bhandarkar, D.R., *EI,* VIII, pp.182-187.

Text

Metres: Vv.1, 7, 21-24, 26 *Anushṭubh;* 2, 3, 5, 6, 8, 11, 12, 20 *Vasantatilakā*; 4, 9, 19, 25 *Upajāti*; 10, 13-18 *Āryā*

ॐ ॥ स वोव्याद्वेधसा धाम यन्नाभिकमलं कृतं ।
हरश्च यस्य कान्तेन्दुकलया कमलंकृतं ॥ १ ॥

आसीद्द्विषत्तिमिरमुद्यतमण्डलाग्रो
ध्वस्तिं नयन्नभिमुखो रणशर्व्वरीषु ।
भूपः शुचिर्व्विधुरिवाप्तदिगन्तकीर्त्ति
ग्गोविन्दराज इति राजसु राजसिंहः ॥ २ ॥

दृष्ट्वा चमूमभिमुखीं सुभटाट्टहासा
मुन्नामितं सपदि येन रणेषु नित्यं ।
दष्टाधरेण दधता भृकुटिं ललाटे
खड्गं कुलं च हृदयं च निजं च सत्त्वं ॥ ३ ।

खड्गं कराग्रान्मुखतश्च शोभा
मानो मनस्तस्सममेव यस्य ।

महाहवे नाम निशम्य सद्यः
त्रयं रिपूणां विगलत्यकाण्डे ॥ ४ ॥
तस्यात्मजो जगति विश्रुतदीर्घकीर्त्ति
रात्तार्त्तिहारिरविविक्रमधामधारी ।
भूपस्त्रिविष्टपकृतानुकृतिः कृतज्ञः
श्रीकर्क्कराज इति गोत्रमणिर्बभूव ॥ ५ ॥
यस्मिन्प्रशासति महानरपे द्विजानां
वैतान धूमनिचयैः परिकर्बुराणि ।
संध्यासु सौधशिखराणि विलोक्य केकाः
कूजंति वेश्मशिखिनो जलदागमोक्ताः ॥ ६
यस्य द्विजजनाक्रान्तशांतिवाचनवारिणा ।
प्रत्यहं गुल्फदघ्नेन यशश्चरति मंदिरे ॥ ७ ॥
तस्य प्रभिन्नकरटच्युतदानदंति
दन्तप्रहाररुचिरोल्लिखितांसपीठः ।
क्ष्मापः क्षितौ क्षपितशत्त्रुरभूत्तनूजः
सद्राष्ट्रकूटकनकाद्रिरिवेन्द्रराजः ॥ ८ ॥
सेवासमायातबृहन्नरेन्द्रवृन्दाभिवन्द्यांघ्रियुगलस्य तस्य ।
अम्लानवक्त्रार्थिगणैः प्रवीणैः संसेव्यते श्रीः स्वजनैरजस्त्रं ॥ ९ ॥
तस्योपार्जित . . . तरुदधिवलयमालिन्याः ।
भोक्ता भुवः शतक्रतुसदृशः श्रीदंतिदुर्ग्गराजोभूत् ॥ १० ॥

अ . . . . . गृहीतनिशातशस्त्र
मज्ञातमप्रणिहितार्थमपेतयत्नं ।
यो वल्लभं सपदि दं . . . त्वा
राजाधिराजपरमेश्वरतामवाप ॥ ११ ॥
काञ्चीशकेरलनराधिपचोलपाण्ड्य
श्रीहर्ष . . . विभेदविधानदक्षं ।
कर्णाटकं बलमचिंत्यमजेयमन्यै
र्भृत्यैः कियद्भिरपि यः सह . जिगाय ॥ १२ ॥
तस्मिन्दिवं प्रयाते वल्लभराजे सति ।
श्रीकर्क्कराजसूनुर्म्महीपतिः कृष्णराजोभूत् ॥ १३ ॥
यस्य स्वभुजपराक्रमनिःशेषोत्सादितारिदिक्चक्रं ।
कृष्णस्येवाकृष्णं चरितं श्रीकृष्णराजस्य ॥ १४ ॥
शुभतुंगतुंगतुरगप्रवृद्धरेणूद्धूर्ध्वरुद्धरविकिरणं ।
ग्रीष्मेपि नभोनिखिलं प्रावृट्कालायते स्पष्टं ॥ १५ ॥
दीनानाथप्रणयिषु यथेष्टचेष्टं समीहितमजस्त्रं ।
तत्क्षणमकालवर्षो वर्षति सर्व्वार्त्तिनिर्म्मथनः ॥ १६ ॥
येन निजराज्यमूर्ज्जितमशेषभूपालपालितमनन्तं ।
श्रीराष्ट्रकूटविश्रुतचरितं श्रीकृष्णराजस्य ॥ १७ ॥
तस्य सुतः सकलमहीमण्डलपरिपालनक्षमः शूरः ।
जितवीरवैरिवर्ग्गो नाम्ना गोविन्दराजोभूत् ॥ १८ ॥

यस्य प्रबल बलप्रद्योतिताशामुखनिर्द्दलितवीरवैरिवर्गस्य पृथ्वीवल्लभमहाराजाधिराजपरमेश्वरश्रीप्रभूतवर्षस्य सकलमहीमण्डलैकतिलकस्य प्रवर्द्धमानराज्ये ।

तस्यानुजः श्रीध्रुवराजनामा महानुभावो विहितप्रतापः ।
प्रसाधिताशेषनरेन्द्रचक्रः क्रमेण बालार्क्कवपुर्ब्बभूव ॥ १९ ॥

तस्य सुतः समधिगतपंचमहाशब्दसुवर्ण्णवर्षप्रतापशब्दश्रीकर्क्कराजस्तदाज्ञया सर्व्वानेव राजसामन्तभोगिकविषयपतिराष्ट्रग्राममहत्तराधिकारिकान् समाज्ञापयत्यंस्तु वः संविदितं मातापित्रोः पुण्ययशोभिवृध्यर्थमात्मनश्च शकनृपकालातीतसंवत्सरशतेषु सप्तस्वेकोत्तरेषु अंकेनापि संवत्सरशत ७०१ पुष्यमासे शुक्लपक्षे दशम्यां संक्रान्तौ सिन्दीनगरावस्थितेन श्रीकर्क्कराजेन ।

तेनेदमध्रुवमशाश्वतमप्रतिष्ठं
स्वप्नेन्द्रजालजलवीचिचलस्वभावं ।
मत्वा जगत्तदपि पल्लवतोयतुच्छं
संसारसागरसुखोत्तरणं विचिन्त्य ॥ २० ॥

श्री अ . . . त्तवास्तव्यस्यानेकशास्त्रावगाढसंशुद्धबुद्धिप्रभावाभिभूताखिलवि . . . दं वेदवेदांगेतिहासपुराणव्याकरणमीमांसातर्क्कनिरुक्तयज्ञविद्या . . . पारगाय तत्त्रैविद्यसामान्यकौशिकसगोत्रकठसब्रह्मचारिणे भट्टज . . . भट्टचन्दादित्यसुताय ॥ नासिक्कविषयान्तर्ग्गतः रक्खुल्लनामा ग्रामः प्रतिपादि . . दकपुरस्सरं दत्तः । यस्य पूर्व्वतो चेभटिकानाम

ग्रामसीमा। दक्षिणतो गोदावरी। . श्चिमतो वटमुखं नाम ग्रामः। उत्तरतो वटपुरं नाम ग्रामः॥ एवं चतुराघाटविशु . . द्रंगः सपरिकरः अचाटभट प्रवेश्यो भूमिच्छिद्रन्यायेन दत्तः। तथा च व . . . नोक्तं॥

स्वं दातुं सुमहच्छख्यं दुःखमन्यस्य पालनं।
दानं वा पालनं वेत्ति दानाच्छ्रेयोनुपालनं॥ २१॥
स्वदत्तां परदत्तां वा यो हरेत वसुन्धरां।
षष्टिं वर्षसहस्राणि विष्टा . जायते कृमिः॥ २२॥
तडागानां सहस्रेण अश्वमेधशतेन च।
गवां कोटिप्रदानेन भूमि . . न शुध्यति॥ २३॥
षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमंता च तान्येव नर . . . ॥ २४॥
दत्तानि यानीह पुरा नरेन्द्रैर्दानानि धर्म्मार्थयशस्कराणि।
निर्म्माल्यवांतः प्रतिमा . . नि को नाम साधुः पुनराददीत॥ २५॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।
. . . यस्य यदा भूमिस्तस्य तस्य तदा फलं॥ २६॥

लिखितं च मया श्रीप्रतापशीलाज्ञया . . न दुग्गडिसुतेनोज्ज्वलशासम्॥

Summary

[This inscription furnishes the genealogy of the Rāshṭrakūṭas as usually found in the cognate records of this dynasty. Verses 1-3, 5-9, 13-14 and 19 of this record are also found in the Bhāṇḍak plates of Krishṇarāja I (No.79 above), verses 10-12 and 15-16 are found in his Talegāon plates (No.72 above) and verse No.4 is also

found in the Pimpari plates of *Dhārāvarsha* Dhruvarāja (No.82 above)].

Verse 17 Extols Kṛishṇarāja as the one whose career was well-known to the governors (*Rāshṭrakūṭas*) or as the famous (ruler) of the Rāshṭrakūṭa dynasty.

This inscription further records a grant by the Rāshṭrakūṭa chieftain Karkarāja described as Suvarṇavarsha and Pratāpaśīla. The order was addressed to *rājasamanta, bhōgika, vishayapati* and *rāshṭragrāma-mahattara.* It refers to the prosperous reign of Gōvinda (II). The charter was issued by Karkarāja while staying at Sindinagara[1] on the occasion of a *saṁkrānti* to a Brāhmaṇa (name lost), son of Bhaṭṭa Chandrāditya of the Kauśika *gōtra*, and a student of the Kaṭha school. The grantee was a great scholar who had mastered the *Vēda, Vedāṅga, Itihāsa, Purāṇa, Vyākaraṇa, Mīmāṁsā, Tarka, Nirukta* and *Yajñvidyā.* The village granted to him was Rakkhulla-grāma[2] situated in the province (*vishaya*) of Nāsikka. The boundaries specified are to the east Chēbhaṭikā[3], to the south the Gōdāvarī; to the west Vaṭamukha[4] and to the north Vaṭapura. *Udraṅga* and *uparikara* were the rights attached to the grant and *chāṭa* and *bhaṭa* were barred entry to the village granted as per the *bhūmichchhidranyāya.*

[This grant portion is followed by as many as six imprecatory verses usually found in such land grants]

This charter was written under the orders of Pratāpaśīla, (Karkarāja) by the son (whose name is lost) of Duggaḍi.

Notes

1. Sindinagara is identified with Sinnar, in the Nāsik Taluk and District.

2. Rakkhulla village is the same as Lākhalgāṁva to the north of river Gōdāvarī.

3. Chēbhaṭikā is Chehdi in Nasik Taluk and District.

4. Vaṭamukha is probably Ōḍhēm, north of Vaṭapura in Nāsik District.

No. 86

BHOR STATE MUSEUM PLATES OF DHARAVARSHA DHRUVARAJA

Location : Bhor, Poona District, Maharashtra
Date : Śaka 702=780 A.D.
Script : Early Nāgarī
Language : Sanskrit
King : Dhārāvarsha Dhruvarāja
Dynasty : Rāshṭrakūṭa
Reference : Altekar, A.S., *EI.*, XXII, pp.176-186

Text

Metres: Vv.1, 26-27, 29, 31 *Anushṭubh*; 2, 3, 5, 6, 8, 9, 15 *Vasantatilakā*; 4, 19 *Upajāti*; 7 *Gīti*; 10, 17, 20, 21, 22 *Śārdūlavikrīdita*; 11-14, 23, 25 *Āryā*; 16, 18 *Sragdharā*; 24, 28, 30 *Indravajrā*; 32 *Pushapitāgrā*

स वोव्याद्वेधसा धाम यन्नाभिकमलं कृतम्।

हरश्च यस्य कान्तेन्दुकलया कमलंकृतम् ॥ १ ॥

आसीद्द्विषत्तिमिरमुद्यतमण्डलाग्रो

ध्वस्तिं नयन्नभिमुखो रणशर्व्वरीषु।

भूपश्शुचिर्व्विधुरिवाप्तदिगङ्तकीर्त्ति

र्ग्गोविन्दराज इति राजसु राजसिंहः ॥ २ ॥

दृष्ट्वा चमूमभिमुखीं सुभटाट्टहासा

मुन्नामितं सपदि येन रणेषु नित्यं।

दष्टाधरेण दधता भृकुटिं ललाटे

खड्गं कुलं च हृदयञ्च निजञ्च सत्वम् ॥ ३ ॥

खड्गं कराग्रान्मुखतश्च शोभा

मानो मनस्तस्सममेव यस्य ।

महाहवे नाम निशम्य सद्य

स्त्रयं रिपूणां विगलत्यकाण्डे ॥ ४ ॥

तस्यात्मजो जगति विश्रुतदीर्घकीर्त्ति

रार्त्तार्त्तिहारिहरिविक्रमधामधारी ।

भूपस्त्रिविष्टपनृपानुकृतिः कृतज्ञः

श्रीकक्कराज इति गोत्रमणिर्बभूव ॥ ५ ॥

तस्य प्रभिन्नकरटच्च्युतदानदन्ति

दन्तप्रहार रुधिरोल्लिखितांसपीठः ।

क्ष्मापः क्षितौ क्षपितशत्रुरभूत्तनूजः

सद्राष्ट्रकूटकनकाद्रिरिवेन्द्रराजः ॥ ६ ॥

तस्योपार्जितमहसस्तनयश्चतुरुदधिवलयमालिन्याः ।

भोक्ता भुवः शतक्रतुसदृशः श्रीदंतिदुर्ग्गराजोभूत् ॥ ७ ॥

काञ्चीशकेरलनराधिपचोलपाण्ड्य

श्रीहर्षवज्रटविभेधविधानदक्षम् ।

कर्णाटकं बलमचिन्त्यमजेयमन्यै

र्भृत्यैः कियद्भिरपि यः सहसा जिगाय ॥ ८ ॥

अभ्रूविभंगमगृहीतनिशातशस्त्र

मश्रांतमप्रतिहताज्ञमपेतयत्नम् ।

यो वल्लभं सपदि दण्डबलेन जित्वा

राजाधिराजपरमेश्वरतामवाप ॥ ९ ॥
आसेतोर्व्विपुलोपलावलिलसल्लोलोर्म्मिमालाचला
दाप्रालेयकलंकितामलशिलाजालात्तुषाराचलात्
आ पूर्व्वापरवारिराशिपुलिनप्रान्तप्रसिद्धावधे
र्येनेयं जगती स्वविक्रमबलेनैकातपत्रीकृता ॥ १० ॥
तस्मिन्दिवं प्रयाते वल्लभराजे क्षतप्रजाबाधः ।
श्रीकक्कराजसूनुर्म्महीपतिः कृष्णराजोभूत् ॥ ११ ॥
यस्य स्वभुजपराक्रमनिश्शेषोत्सादितारिदिक्चक्रं ।
कृष्णस्येवाकृष्णं चरितं श्रीकृष्णराजस्य ॥ १२ ॥
शुभतुङ्गतुङ्गतुरगप्रवृद्धरेणूर्द्ध्वरुद्धरविकिरणं ।
ग्रीष्मेपि नभो निखिलं प्रवृट्कालायते स्पष्टम् ॥ १३ ॥
दीनानाथप्रणयिषु यथेष्टचेष्टं समाहितमजस्रम् ।
तत्क्षणमकालवर्षे वर्षति सर्व्वार्त्तिनिर्व्वपणम् ॥ १४ ॥
राहप्पमात्मभुजजातबलावलेप
माजौ विजित्य निशितासिलताप्रहारैः ।
पालिध्वजावलिशुभामचिरेण यो हि
राजाधिराजपरमेश्वरतां ततान ॥ १५ ॥
क्रोधादुत्खातखड्गप्रसृतरुचिचयैर्भासमानं समन्ता
दाजावुद्वृत्तवैरिप्रकटगजघटाटोपसंक्षोभदक्षम् ।
शौर्यं त्यक्त्वारिवर्ग्गो भयचकितवपुः क्वापि दृष्ट्वैव सद्यो

दर्प्पध्मातारिचक्रक्षयकरमगमद्यस्य दोर्द्दण्डरूपम् ॥ १६ ॥
पातायश्चतुरम्बुराशिरशनालंकारभाजो भुव
स्त्रय्याश्चापि कृतद्विजामरगुरुप्राज्याज्यपूजादरः ।
दाता मानभृदग्रणीर्गुणवतां योसौ श्रियो वल्लभो
भोक्तुं स्वर्ग्गफलानि भूरितपसा स्थानं जगामामरम् ॥ १७ ॥
येन श्वेतातपत्रप्रहतरविकरव्राततापात्सल़ीलं
जग्मे नासीरधूलीधवलितशिरसा वल्लभाख्यः सदाजौ ।
स श्रीगोविन्दराजो जितजगदहितस्त्रैणवैधव्यहेतु
स्तस्यासीत्सूनुरेकः क्षणरणदलितारातिमत्तेभकुम्भः ॥ १८ ॥
तस्यानुजः श्रीध्रुवराजनामा महानुभावो प्रहतप्रतापः ।
प्रसाधिताशेषनरेन्द्रचक्रः क्रमेण बालार्क्कवपुर्बभूव ॥ १९ ॥
जाते यत्र च राष्ट्रकूटतिलके सद्भूपचूडामणौ
गुर्व्वी तुष्टिरथाखिलस्य जगतः सुस्वामिनि प्रत्यहम् ।
सत्यं सत्यमिति प्रशासति सति क्ष्मामासमुद्रान्तिका
मासीद्धर्म्मपरे गुणामृतनिधौ सत्यव्रताधिष्ठिते ॥ २० ॥
श्रीकाञ्चीपतिगांगवेंगिकयुता ये मालवेशादयः
प्राज्यानानयति स्म तान् क्षितिभृतो यः प्रातिराज्यानपि ।
माणिक्याभरणानि हेमनिचयं यस्य प्रपद्योपरि
स्वं येन प्रति तं तथापि न कृतं चेतोन्यथाभ्रातरं ॥ २१ ॥
सामाद्यैरपि वल्लभो न हि यदा सन्धिं व्यधात्तं तदा

भ्रातुर्दत्तरणे विजित्य तरसा पश्चात्ततो भूपतीन्।
प्राच्योदीच्यपराच्यचाभ्यविलसत्पालिध्वजैर्भूषितं
चिह्नैर्यः परमेश्वरत्वमखिलं लेभे महेन्द्रो विभुः ॥ २२ ॥
शशधरकरनिकरनिभं यस्य यशः सुरनगाग्रसानुस्थैः।
परिगीयतेनुरक्तैर्व्विद्याधरसुन्दरीनिवहैः ॥ २३ ॥
हृष्टोन्वहं योर्थिजनाय सर्व्वं
सर्व्वस्वमानन्दितबन्धुवर्ग्गः।
प्रादात्प्ररुष्टो हरति स्म वेगात्
प्राणान्यमस्यापि नितान्तवीर्यः ॥ २४ ॥
तेनेदमनिलविद्युच्चञ्चलमवलोक्य जीवितमसारम्।
क्षितिदानपरमपुण्यं प्रवर्त्तितो ब्रह्मदायोयं ॥ २५ ॥

स च परमभट्टारकमहाराजाधिराजपरमेश्वरपरमभट्टारकश्रीमदकालवर्षदेवपादानुध्यात परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीधारावर्षश्रीध्रुवराजनामा श्रीनिरुपमदेवः कुशली सर्व्वानिव यथासम्बध्यमानकान् राष्ट्रपतिविषयपतिग्रामकूटायुक्तकनियुक्तकाधिकारिकमहत्तरादीन् समादिशत्यस्तु वः संविदितं यथा श्रीनीरानदीसंगमसमावासितेन मया मातापित्रोरात्मनश्चैहिकामुष्मिकपुण्ययशोभिवृद्धये करहाडवास्तव्यतच्चातुर्व्विद्यसामान्यगार्ग्गसगोत्रबह्वृचसब्रह्मचारिणे दुर्ग्गभटपुत्राय सांगोपांगवेदार्थतत्त्वविदुषे वासुदेवभट्टाय श्रीमालविषयांतर्ग्गतलघुविंगनामा ग्रामः तस्य चाघाटनानि। पूर्व्वतः श्रीमालपत्तनं दक्षिणतो लयणगिरिः

पश्चिमतः बृहद्विंगकग्रामः उत्तरतः नीरा नाम नदी। एवमयं चतुराघाटनोपलक्षितो ग्रामः सोद्रंगः सोपरिकरस्सदण्डदशापराधस्सभूतवातप्रत्यायस्सोत्पद्यमानविष्टिकः सधान्यहिरण्यादेयोऽचाटभट प्रवेश्यः सर्व्वराजकीयानामहस्तप्रक्षेपणीय आचंद्रार्क्कार्ण्णवक्षिति सरित्पर्व्वतसमकालीनः पुत्रपौत्रान्वयक्रमोपभोग्यः पूर्व्वप्रदत्तदेवब्राह्म दायरहितोभ्यंतरसिद्ध्या भूमिच्छिद्रन्यायेन शकनृपकालातीतसंवत्सरशतेषु सप्तसु वर्षद्वयाधिकेषु सिद्धार्थनाम्नि संवत्सरे माघसितरथसप्तम्यां महापर्व्वणि बलिचरुवैश्वदेवाग्निहोत्रातिथिपञ्चमहायज्ञक्रियोत्सर्पणार्थं स्नात्वाद्योदकातिसर्गेण प्रतिपादितः। यतोस्योचितया ब्रह्मदायस्थित्या भुंजतो भोजयतः कृषतः कर्षयतः प्रतिदिशतो वा न कैश्चिदल्पापि परिपंथना कार्या। तथागामिभद्रनृपतिभिरस्मद्वंश्यैरन्यैर्व्वा सामान्यं भूमिदानफलमवेत्यविद्युल्लोलान्यनित्यैश्वर्य्याणि तृणाग्रलग्नजलबिन्दुचञ्चलञ्च जीवितमाकलय्य स्वदायनिर्व्विशेषोयमस्मद्दायोनुमंतव्यः प्रतिपालयितव्यश्च। यश्चाज्ञानतिमिरपटलावृतमतिराच्छिद्यादाच्छिद्यमानकं वानुमोदेत स पञ्चभिर्महापातकैश्चोपपातकैश्च संयुक्तः स्यादिति। उक्तं च भगवता वेदव्यासेन।

षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥ २६॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः।
कृष्णाहयो हि जायन्ते भूमिदायं हरन्ति ये॥ २७॥
अग्नेरपत्यं प्रथमं सुवर्ण्णं

भूर्व्वैष्णवी सूर्यसुताश्चगावः ।
लोकत्रयं तेन भवेद्धि दत्तं
यः काञ्चनं गाञ्च महीञ्च दद्यात् ॥ २८ ॥

बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं ॥ २९ ॥

यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्म्माल्यवांतप्रतिमानि तानि को नाम साधुः पुनराददीत ॥ ३० ॥

स्वदत्तां परदत्तां वा यत्नाद्रक्ष नराधिप ।
महीं महीमतां श्रेष्ठ दानाच्छ्रेयोनुपालनम् ॥ ३१ ॥

इति कमलदलाम्बुबिंदुलोलां
श्रियमनुचिंत्यमनुष्यजीवितं च ।
अतिविमलमनोभिरात्मनीनै
र्न हि पुरुषैः परकीर्त्तयो विलोप्याः ॥ ३२ ॥

श्रीनागपराणकदूतकं लिखितं श्रीगौडसुतेन श्रीसामंतेन ॥

Summary

[After the benedictory verse seeking protection of Hari and Hara, this inscription gives the genealogy of the Rāshṭrakūṭa dynasty from Gōvinda I upto Dhruva. All the twentyfive verses occurring in the genealogical portion of this inscription, except verses Nos. 21 and 22 are also found in the Pimpari plates (No.80 above) of Dhārāvarsha Dhruvarāja who issued the present charter.]

Verses 21 and 22 of this charter describe the war between the grantor (Dhruvarāja) and his elder brother

Gōvindarāja II. As stated in these verses Dhruva (who had lost the favour and good will of his brother) submitted for sometime to his brother, seeking to win him over by peaceful means. But Gōvinda II spurned aside these overtures and formed a confederacy with the kings of Vēṅgi, Kāñchī, Mālava and Gaṅgavāḍī even though they were hostile kings (*prātirājyānapi*). The two brothers then openly fought with each other, and Dhruva got the throne after defeating his brother.

This charter records the order of Dhruvarāja addressed to the *Rāshṭrapati* and other officers concerned. It states that while staying at Saṁgama on the banks of the river Nīrā[1], for the increase in the religious merit and fame in this and the other world of his parents and of himself, he granted the village Laghuviṅga[2] situated in Śrīmāla[5]-*vishaya* to Vāsudēvabhaṭṭa of the Gārgga-sagōtra and a Bahvṛicha, who was the son of Durgabhaṭṭa, who was a resident of Karahāḍa and a member of the Brāhmaṇa community versed in the four *Vēdas* of the place, and was famous for his proficiency in the interpretation of the *Vēdas* and *Vēdāṅgas*, along with *udraṅga*, *uparikara* and other privileges attached to the village granted and excluding the lands previously granted to Brāhmaṇas. This grant was made on the auspicious occasion of Rathasaptami in the bright fortnight of the month of Māgha duing the cyclic year Siddhārtha in the Śaka year 702, for conducting the five rituals (*pañcha-mahā-yajña*) *viz. bali*, *charu*, *vaiśvadēva*, *agnihōtra* and *atithi*.

The grant village Laghuviṅga was bounded on the north, east, south and west by the Nīrā river, Śrīmāla town, Layaṇa-giri[4] and Bṛihad-viṅga[5] respectively.

The record closes with the usual appeal and admonition for the protection of the grant in which context as many as seven verses ascribed to Vyāsa have been quoted.

The grant was executed by (*dūtaka*) *Rāṇaka* Nāgapa and written by Śrī Sāmanta, son of Śrī Gauḍa.

Notes

1. Nīrā river must be in Pune District (*cf. EI*, XXII, pp.176, 181).
2. Laghuviṅga must be in the Pune District. (*cf. ibid*, p.181).
3. Śrīmala-vishaya must be in the Pune District (*ibid.*)
4. Layaṇagiri must have been in Pune Distict. (*ibid.*)
5. Bṛihad-v iṅga must have been in Pune District (*ibid.*)

○ ○ ○ ○

No. 87

TIRUPPATTUR INSCRIPTION OF VARAGUNA I

Location : Tiruppattūr, Tiruppattur Taluk, Ramanathapuram District, Tamilnadu.

Date : Year 4 + 4635th day (i.e.) 4 +12 (expired)=784 A.D.

Script : Grantha; Tamil

Language : Sanskrit; Tamil

King : Varaguṇa-mahārāja[1]

Dynasty : Pāṇḍya

Reference : Ramanatha Iyer, A.S., *SII*, XIV, No.15.

Text

Metres : V.1 *Upajāti*

स्वस्ति श्री

नूतनग्रामाशिवाय काचान्
काटम्बबेळान्दश पञ्च चादात् ।
वृद्द्यैव दीपोज्ज्वलनाय तेषां
शश्वद्विजित्यारिमबाह्य बाह्यम् ॥ १ ॥

Translation

Verse Kāṭamba-vēlān, after gaining victory over the enemy who is inside and at the same time is also outside,[2] gave 15 *kāchas*,[3] for burning a lamp for God Śiva of Śrī-Nūtana-grāma[4].

[This single verse in Sanskrit prefaces the main text of the inscription in Tamil]. Here the text opens with the citation of the name of the king, Kō-Varaguṇa-mārāyar,[5] and the date as given above and gives the purport of the inscription as found in the Sanskrit verse more elaborately at first and in continuation refers to a second benefaction made by the same donor. The donor's name is given as Kaḍambaṉ Vēḷāṉ, entitled Maṟavaṉ-Aṇukkappēraryaṉ[6] of Perumāttūr. The God for whom the benefactions were made is here cited as Tiruttaḷi-bhaṭārar[7] of Tirupputtūr. The second endowment was of the same amount of 15 *kaḻañju* which was to serve as the capital for arranging the supply of 15 strands of fragrant flowers daily for the same god. Both the endowed amounts were entrusted to the *sabhā* of Tirupputtūr (the concerned portion with regard to the first endowment for the lamp is damaged but there is sufficient indication to this effect in the extant portion).

Notes

1.The ascription of the inscription and the calculation of the equivalent in Christian era for the date cited have been done on the same basis as was done in regard to the inscriptions discussed above.

2. The phrase *abāhya bāhyam* literally means, "after conquering the enemy, who was outside as well as inside". Interpreted on philosophical basis the enemy who is inside as well as outside can be undrerstood as corruption in the mind and in behaviour respectively. But considering that the Tamil text enlightens that Kaḍamba-vēḷāṉ was a military commander as indicated by his military title Aṇukkap-pērarayaṉ (a captain of the military unit of body-guards) and as he was also maṟavaṉ (a fierce tribal group, members of which were eagerly enlisted into their armies by the chiefs of those times) it can be deduced that the phrase referred to his victory over an enemy who was actually an insider (a feudatory or subject) who by his hostile

conduct had to be dealt with as an outsider. The benefactions made through this record might have been thanks givings for the donor's success in exterminating such an enemy in the service of the king.

3. Though *kācha* in Sanskrit literally means a crystal or quartz (MW. *SED*, p.268, col.2) in the light of the details provided by the Tamil text, it is seen to have represented the Tamil term, *kaḻañju,* a standard weight of gold or a gold piece of that standard weight that was used in transactions.

4. Śrī-Nūtana-grāma is the Sanskrit rendering of the name of the place Tirupputtūr (Tiru-pudu-ūr).

5. Varaguṇa is known to have been a title of Jaṭila-varman Parāntaka (See *EI*, XXXII, p.269 f; *ibid.*, XXXVI, p.116, n.1).

6. *Aṇukkar* were those nearest to the person of the chief to whom they were attached (i.e.) they were the body-guards of the king /chief. *Pēraraiyan* indicated the bearer's high rank.

7. For an explanation of the name Tiruttaḷi-bhaṭārar, see above.

* * *

No. 88

JETHWAI PLATES OF THE RASHTRAKUTA QUEEN SILAMAHADEVI

Location : Jethwai, Nimar District, Madhya Pradesh
Date : Śaka 708=786 A.D.
Script : Early Nāgarī
Language : Sanskrit
Queen : Śīlamahādēvī
Dynasty : Rāshṭrakūṭa
Reference : Bhandarkar, D.R., *EI*, XXII, pp.98-109.

Text

Metre : Vv. 1, 23, 26-28, 30 *Anushṭubh*; 2, 3, 5, 6, 8, 9, 15, 24 *Vasantatilakā*; 4, 19, 22, 25, 29 *Upajāti*; 7 *Gīti*; 10, 17, 20 *Śārdūlavikrīḍita*; 11-14, 21 *Ārya*; 16, 18, *Sragdharā*; 31 *Pushpitāgrā*

ओं ।

स वोव्याद्वेधसा धाम यन्नाभिकमलं कृतं ।
हरश्च यस्य कान्तेन्दुकलया कमलंकृतं ॥ १ ॥

आसीद्द्विषत्तिमिरमुद्यतमण्डलाग्रो
ध्वस्तिन्नयन्नभिमुखो रणशर्व्वरीषु ।
भूपः शुचिर्व्विधुरिवाप्तदिगङ्तकीर्त्ति
ग्गौंविन्दराज इति राजसु राजसिंहः ॥ २ ॥

दृष्ट्वा चमूमभिमुखीं सुभटाट्टहासा
मुन्नामितं सपदि येन रणेषु नित्यं ।
दष्टाधरेण दधता भृकुटिं ललाटे
खड्गं कुलं च हृदयञ्च निजञ्च सत्वम् ॥ ३ ॥

खड्गं कराग्रान्मुखतश्च शोभा
मानो मनस्तः सममेव यस्य ।
महाहवे नाम निशम्य सद्य
स्त्रयं रिपूणां विगलत्यकाण्डे ॥ ४ ॥
तस्यात्मजो जगति विश्रुतदीर्घकीर्त्ति
रात्तार्त्तिहारिहरिविक्रमधामधारी ।
भूपस्त्रिविष्टपनृपानुकृतिः कृतज्ञः
श्रीकक्कराज इति गोत्रमणिर्बभूव ॥ ५ ॥
तस्यद्विभिन्नकरटच्युतदानदन्ति
दन्तप्रहाररुचिरोल्लिखितांसपीठः ।
क्ष्मापः क्षितौ क्षपितशत्रुरभूत्तनूजः
सद्राष्ट्रकूटकनकाद्रिरिवेन्द्रराजः ॥ ६ ॥
तस्योपार्ज्जितमहसस्तनयश्चतुरुदधिवलयमालिन्याः ।
भोक्तता भुवः शतक्रतुसदृशः श्रीदन्तिदुर्ग्गराजोभूत् ॥ ७ ॥
काञ्चीशकेरलनराधिपचोलपाण्ड्य
श्रीहर्षवज्रटविभेदविधानदक्षं ।
कर्ण्णाटकं बलमनन्तमजेयमन्यै
र्भृत्यैः कियद्भिरपि यः सहसा जिगाय ॥ ८ ॥
अभ्रूविभङ्गमगृहीतनिशातसस्त्र
मश्रान्तमप्रतिहताज्ञमपेतयत्नं ।

यो वल्लभं सपदि दण्डबलेन जित्वा
राजाधिराजपरमेश्वरतामवाप ॥ ९ ॥
आसेतोर्व्विपुलोपलावलिलसल्लोलोर्म्मिमालाजला
दाप्रालेयकलंकितामलशिलाजालात्तुषाराचलात् ।
आपूर्व्वापरवारिराशिपुलिनप्रान्तप्रसिद्धावधेः
येनेयं जगती स्वविक्रमबलैनैकातपत्त्रीकृता ॥ १० ॥
तस्मिन्दिवं प्रयाते वल्लभराजे क्षतप्रजाबाधः ।
श्रीकर्क्कराजसूनुर्म्महीपतिः कृष्णराजोभूत् ॥ ११ ॥
यस्य स्वभुजपराक्रम निःशेषोत्सादितारिदिक्कक्रं ।
कृष्णस्येवाकृष्णं चरितं श्रीकृष्णराजस्य ॥ १२ ॥
शुभतुङ्गतुङ्गतुरगप्रवृद्धरेणूर्द्ध्वरुद्धरविकिरणं ।
ग्रीष्मेपि नभो निखिलं प्रावृट्कालायते स्पष्टं ॥ १३ ॥
दीनानाथप्रणयिषु यथेष्टचेष्टं समीहितमजस्त्रं ।
तत्क्षणमकालवर्षो वर्षति सर्व्वार्त्तिनिर्व्वपणं ॥ १४ ॥
राहप्पमात्मभुजजातबलावलेप
माजौ विजित्य निशितासिलताप्रहारैः ।
पालिध्वजावलिशुभामचिरेण यो हि
राजाधिराजपरमेश्वरतां ततान ॥ १५ ॥
क्रोधादुत्खातखड्गप्रसृतरुचिचयैर्भासमानं समन्ता
दाजावुद्वृत्तवैरिप्रकटगजघटाटोपसंक्षोभदक्षं ।

शौर्यं त्यक्त्वारिवर्ग्गों भयचकितवपुः क्वापि दृष्ट्वैव सद्यो
दर्प्पध्मातारिचक्रक्षयकरमगमद्यस्य दोर्द्दण्डरूपं ॥ १६ ॥
पातायश्चतुरम्बुराशिरशनालंकारभाजो भुव
स्त्रय्याश्चापि कृतद्विजामरगुरुप्राज्याज्यपूजादरः ।
दाता मानभृदग्रणीर्गुणवतां योसौ श्रियो वल्लभो
भोक्तुं स्वर्ग्गफलानि भूरितपसा स्थानं जगामामरं ॥ १७ ॥
येन श्वेतातपत्रप्रहतरविकरव्राततापात्सलीलं
जग्मे नासीरधूलीधवलितशिरसा वल्लभाख्यः सदाजौ ।
स श्रीगोविन्दराजो जितजगदहितस्त्रैणवैधव्यहेतु
स्तस्यासीत्सूनुरेकः क्षणरणदलितारातिमत्तेभकुम्भः ॥ १८ ॥
तस्यानुजः श्रीध्रुवराजनामा महानुभावो प्रहतप्रतापः ।
प्रसाधिताशेषनरेन्द्रचक्रः क्रमेण बालार्क्कवपुर्बभूव ॥ १९ ॥
जाते यत्र च राष्ट्रकूटतिलके सद्भूपचूडामणौ
गुर्व्वी तुष्टिरथाखिलस्य जगतः सुस्वामिनि प्रत्यहं ।
सत्यं सत्यमिति प्रशासति सति क्ष्मामासमुद्रान्तिका
मासीद्धर्म्मपरे गुणामृतनिधौ सत्यव्रताधिष्ठिते ॥ २० ॥
शशधरकरनिकरनिभं यस्य यशः सुरनगाग्रसानुस्थैः ।
परिगीयतेनुरक्तैर्व्विद्याधरसुन्दरीनिवहैः ॥ २१ ॥
हृष्टोन्वहं योर्थिजनाय नित्यं
सर्व्वस्वमानन्दितबन्धुवर्ग्गः ।

प्रादात्प्ररुष्टो हरति स्म वेगात्
प्राणान्यमस्यापि नितान्तवीर्यः ॥ २२ ॥
रक्षता येन निश्शेषं चतुरंबोधिसंयुतं ।
राज्यं धर्म्मेण लोकानां कृता तुष्टिः परा हृदि ॥ २३ ॥
यो सौ प्रसाधितजगत्रयसारदुर्ग्गो
गंगौघसन्ततिनिरोध विवृद्धकीर्तिः ।
आत्मीकृतोन्नतवृषाङ्कविभूतिरुच्चै
र्व्यक्तं ततान परमेश्वरतामिहैकः ॥ २४ ॥

तस्य परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमदकालवर्षदेवपादानुध्यात परमभट्टारकमहाराजाधिराजपरमेश्वरधारावर्षश्रीध्रुवराजदेवस्य महादेवी सर्व्वलोकाश्रयविष्णुवर्द्धनश्रीविट्टरसराजदुहिता परमेश्वरी परमभट्टारिकां श्री शीलमहादेवी ॥

तयेदमालोलतृणाग्रलग्न
स्वल्पाम्बुबिन्द्वध्रुवमाकलय्य ।
नृजीवितं धर्म्मनिबद्धबुद्ध्या
द्विजातिदायोयमकारि भूरिः ॥ २५ ॥

सा च धारावर्षश्रीमहादेवी कुशलिनी सर्व्वानिव सम्बध्यमानकान्राष्टपति विषयपतिग्रामकूटनियुक्तयुक्ताधिकारिकमहत्तरादीन् समादिशति । अस्तु वो विदितं यथा मया मातापित्रोरात्मनश्चैहिकामुष्मिकपुण्ययशोभिवृद्धये श्रीकुरुगोटवास्तव्यशालंकायनसगोत्र अध्वर्युकाण्वसब्रह्मचारिब्राह्मण

मारदिसूनुर्म्मारर्च्चः ॥ श्रीनान्दीपुरद्वारीवास्तव्यतच्चातुर्विद्यसामान्य जातू
कर्ण्यसगोत्र अध्वर्युमाध्यन्दिनसब्रह्मचारिब्राह्मणभट्टनारायणसूनुदुर्ग्गा
दित्यः। आभ्यां श्रीमन्नान्दिपुरद्वारीविषयान्तर्ग्गतः कोलपद्रनामग्रामः
यस्याघट्टनानि पूर्व्वतः तटनअपन्नासारवद्धानिस्सोयिसंगमश्चरणि
फालग्रामश्च दक्षिणतः निस्सोर्दकुण्डलावहाः निग्रदिपद्रग्रामश्च ततो
दोङ्गरिका च उखलपद्रग्रामश्च तद्वहश्च पश्चिमतः उखलपद्री नाम नदिका
तोरणपद्रनामा ग्रामो झंकरिपटनिस्सोईसंगमः भद्रवटग्रामश्च उत्तरतो
दोङ्गरिका नवग्रामश्च एतदाघट्टनोपलक्षितः सधान्यहिरण्यादेयः अचाट
भटप्रावेश्यः अखिलराजकीयानामहस्तप्रक्षेपणीयः आचन्द्रार्कार्ण्ण
वक्षितिसरित्पर्व्वतसमकालीनः भूमिच्छिद्रन्यायेन शकभूपालकालातीत
सम्वत्सरशतसप्तके अष्टोत्तरके आश्वयुजकृष्णामावास्यायां महत्त्यादित्य
ग्रहणपर्व्वणि अद्योदकातिसर्ग्गेण बलिचरुवैश्वदेवाग्निहोत्रपञ्चमहायज्ञोप
क्रियोत्सर्प्पणाय प्रतिपादितः यतोनयोरेतद्भुंजानयोः भोजयतोः
प्रतिदिशतोर्व्वा न केनचिद्व्यासेधे प्रवर्त्तितव्यं। तथागामिभद्रनृपति
भिरस्मद्वंश्यैरन्यैर्व्वा सामान्यं भूमि दानफलमवेक्ष्य जलबुद्बुदचंचलं च
जीवितमैश्वर्यं चाकलय्य स्वदायनिर्व्विशेषमस्मद्दायः पालयितव्यः।
यश्चाज्ञानतो व्याच्छिद्यादाच्छिद्यमानं वानुमोदेत स पञ्चभिर्म्महापातकै
स्सोपपातकैर्युक्तः स्यादित्युक्तं च भगवता वेदव्यासेन ॥

षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥ २६॥

विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।
कृष्णाहयो हि जायन्ते भूमिदायं हरन्ति ये ॥ २७ ॥
बहुभिर्व्वसुधा भुक्ता राजभिस्सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं ॥ २८ ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्मुक्तमाल्यप्रतिमानि तानि को नाम साधुः पुनराददीत ॥ २९ ॥
स्वदत्तां परदत्तां वा यत्नाद्रक्ष नराधिप ।
महीं महीमतां श्रेष्ठ दानाच्छ्रेयोनुपालनं ॥ ३० ॥
इति कमलदाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
अतिविमलमनोभिरात्मनीनैर्न हि पुरुषैः परकीर्त्तयो विलोप्याः ॥ ३१ ॥

इति धारावर्षश्रीपृथ्वीवल्लभमहादेवीसमादिष्टसोमयाजिशंखय्यो दूतको लिखितं च परमेश्वर्याज्ञया खड्गसेनसूनुना महासन्धिविग्रहाधिकृतेन गुणभरापरनाम्ना वसुदेवेनेति ओं ॥

Summary

[After the usual benedictory verse seeking protection of Hari and Hara, this inscription furnishes the genealogical account of the Rāshṭrakūṭa dynasty from Gōvinda I upto Dhruva and records the grant of a village by the latter's wife, *Paramēśvarī*, *Paramabhaṭṭārikā*, Śrī-Śīlama hādēvī to two Brāhmaṇas. Verses 1 to 23 of this inscription occur in the Pimpari plates of Dhruvarāja (above No.82) exactly in the same order.]

Continuing the strain of description commencing from Verse No.19, Verse No.24 extols Dhruvarāja as the one who assumed the Super Lordship (*paramēśvaratā*).

The prose portion following the metrical composition refers to Śīlamahādēvī, queen of Dhruvarāja who was a daughter of the Eastern Chālukya king Vishṇuvardhana IV, and records the grant of the village Kōlepadra, situated in the distrit of Nāndīpuradvārī, by this queen, to two Brāhmaṇas. One of the donees was Mārachcha, son of Māradi who was an *adhvaryu* (officiating priest) and a student of the Kāṇva-śākhā, who pertained to Śālaṅkāyanā-gōtra and who was a native of Kurugōṭa. The other donee was Durgāditya, son of Bhaṭṭanārāyaṇa. He too, was an *adhvaryu* and a student of Mādhyandina-śākhā. He was a native of Nāndīpuradvārī and a member of the Community of Brāhmaṇas well-versed in the four Vēdas (*chāturvidya-sāmānya*) of that place. He belonged to the Jātūkarṇya-gōtra.

This grant was made for the increase in the religious merit and fame, in this and the other world, of the donor and her parents on the occasion of the solar eclipse in the Śaka year 708 (expired) on the Amāvāsyā day of the dark half of the month of Āśvayuja (sought to be corresponding to Wednesday, 27th September, A.D. 786) for conducting the five rituals (*pañcha-mahāyājña*) *bali, charu,* etc. The grant was a perpetual one and attached with the usual privileges of *dhānya* and *hiraṇya* and protected against the entry of *chāṭa* and *bhaṭa* and interference by the state officials.

The order of the queen pertaining to this grant was addressed to the officials concerned, *Rāshṭrapati* and others, as usual.

The boundaries of the village granted were: on the east certain villages beginning with Tataṇa (there seems to be five villages in all); on the south the river (*vaha*) Nissōī-kuṇḍalā, the village Nigradipadra, a hillock (*dōṅgarikā*) and the village Ukhalapadra and the river at that place (*tadvaha*); on the west the river called Ukhalapadrī, the village Tōraṇapadra, the confluene (*saṁgama*) of the rivers Jhaṁkaripaṭa and Nissōī and the village Bhadravaṭa; and on the north a hillock (*drōgarikā*) and Navagrāma.

The record ends with the usual appeal and admonition for the protection of the grant in which context five verses ascribed to Vyāsa have been cited.

The *dūtaka* (executor) of the grant was *Sōmayāji* Śaṁkhayya and it was written, by *Mahāsandhivigrahādhikṛita* Vasudēva *alias* Guṇabhara, son of Khaḍgasēna on the orders of the queen.

☼☼☼☼

No. 89

HILOL PLATES OF YEAR 470

Location : Hilol, Dehgam Taluk, Ahmedabad District, Gujarat
Date : 470=788 A.D.
Script : Siddhamātṛikā (Early Nāgarī)
Language : Sanskrit
King : Kakka
Dynasty : Rāshṭrakūṭa
Reference : Sankalia, H.D. and Sircar, D.C., *EI*, XXXIV, pp.213-218.

Text

Metres : Vv. 1-2 *Anushṭubh*

ओम्। संवत्सरशतचतुष्टये सप्तत्याधिके श्रीखेटकमहाभिस्थानात् समधि
गतपंचमहाशब्दमहासामंताधिपतिपरमराजाधिराजपरमेश्वरश्रीकक्कराज्य
विषयाधिपतिश्रीहर्षपुरमहाभिस्थानात् समधिगतपंचमहाशब्दमहासामंत
श्रीचंद्रादित्येन साणंदस्थानविनिर्ग्गतमात्रीश्वरपुत्रस्य भट्टमातृगणकाश्यप
सगोत्रमाध्यंदिनषडंगवेदैश्च विभूषितांगबालाग्निहोतृणतंन्निष्ठपरम एतद्गुण
संयुक्तस्य श्रीचंद्रादित्येन स्वस्तिधनं भूमिदानं स्वगोत्रपृथग्भावेन
मातृगणेन लब्ध्वा ववुलककेदारमिश्रचतुर्भागक्षेत्रस्य चतुर्भागो हिलोहिल
ग्रामनिवेशदक्षिणदिशायां चतुराघाटानं पूर्वां दिशि वर्द्धमानेश्वरक्षेत्रं
दक्षिणदिशि ब्राह्मणभाउल्लचाटक्षेत्रं पश्चिमदिशि तटाकं उत्तरदिशि नदी
उदिष्ट क्षेत्रं थक एवं चतुराघाटनोपलक्षितं ओम् श्रीचंद्रादित्येन भूमिदानं
मातृगणस्य स्वस्तिधनं एवं तस्य माघाटानं पूर्वदिशि ब्राह्मणक्षेत्रं
भटिस्वामिसामंत तथा सामंतब्राह्मणराजनकस्य तथा सामंतमहत्तर

ईश्वरस्य तथा ब्राह्मणभट्ट मुत्तिल्ल तथा सामंत मदहर . . कस्य सीहरखिनिवासिभट्ट ईश्वरस्य तथा सामंतब्राह्मण संधुशर्म्म तथा साक्षी ब्राह्मण अग्गकस्य तथा ब्राह्मण साक्षी अहीनस्य खल्लापल्लिग्रामनिवासी साक्षी भट्टल्लेल्लस्य तथा साक्षी केउकस्य कूसंबग्रामनिवासी ब्राह्मणभट्टदत्तस्य तथा ब्राह्मणसाक्षी सेणभट्टस्य तथा साक्षी ब्राह्मण विज्ञेकस्स तथा सिंभनकस्य एवं चतुर्भागदूयौ श्रीचंद्रादित्येन स्वहस्तदत्तस्य मार्ग्गशिरमास शुद्धसप्तम्यां भौमदिने धनिष्ठानक्षत्रायां पूर्वाह्ने एवं श्रीचंद्रादित्येन श्रद्धया परमाविष्ट स्वहस्तेन स्वस्तिधनं सदित्यदशापराधम् अकरप्रयुक्तम् . . . अष्टहस्तमयम् च सीमायां स्फोटनं च पादाटकग्रामे चतुर्भाग द्वितीय चतुर्भाग हिलोहिलग्रामे श्रीहर्षपुरात् अयं तेन करणभुलायसमक्षं तथा कैस्तिके महाबलाधिकृत ब्राह्मणभट्ट ईश्वरस्य अध्यक्षभट्ट वासुदेव तथा षडंगविद् भट्टमहाप्रतीहार अइम्मत बालेश्वर भट भाउल्ल एवं श्रीचंद्रादित्येन समक्षं करणसहितं भूदेवकृतं भट्ट मातृगणस्य ।

अनेकैर्व्वसुधाभुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ १ ॥
सुवर्णमेकं गामेकं भूम्यामप्येकमंगुलम् ।
हरंति नरको यांति यावदाहूतसंप्लवम् ॥ २ ॥ इति ॥

Summary

This inscription refers itself to the reign of *Samadhigatapan̄chamahāśabda Mahasāmantādhipati Paramarājādhirāja Paramēśvara* Sri-Kakka ruling from Khēṭaka[1], and

records a grant of land by the *Vishayadhipati Samadhigatapañchamahāśabda Mahā-sāmanta* Chandrāditya, issued from Harshapura[2], in favour of *Bhaṭṭa* Mātṛigaṇa, son of Mātrīśvara hailing from Sānanda[3], who belonged to the Kāśyapa-*gōtra* and the Mādhyadina-śākhā, who was well-versed in the Vēdas and its six *aṅgas* and kept the sacred fire since his childhood.

The grant consisted of two pieces of land, each a 'quarter' (*chatur-bhāga*), one of them situated in Pādāṭaka-grāma[4] and the other in Hilōhila-grāma. The gift land thus consisted of one-fourth share of each of the two villages.

The first piece of land was partly marshy land with *babbūlaka* trees and lay to the south of the entrance of Hilōhilā-grāma. Its boundaries were, to the east a plot of land belonging to the deity Vardhamānēśvara; to the south the land containing an orchard belonging to the Brāhmaṇa Bhāulla; to the west the tank; and to the north localities called Karīra, Rushṭi and Kōṭumbaka.

The second piece of land was bounded in all directions by the fields belonging to different Brāhmaṇas, who were, the neighbour (*sāmantaḥ*) Bhaṭisvāmin, Brāhmaṇa neighbour Sāṁjaka, the neighbour Īśvara of Madahara, Brāhmaṇa Bhaṭṭa Prathilla, the neighbour Dhāiṁka of Madahara, *Bhaṭṭa* Īśvara who was an inhabitant of Sīharakhijya[5] and the Brāhmaṇa neighbour Sambaśarman. The witnesses to this gift were, the Brāhmaṇas Aggaka, and Vārīśa, *Bhaṭṭa* Lēlla, an inhabitant of the village Khallāpalli[6], Kōṭaka, Brāhmaṇa *Bhaṭṭa* Datta who was an inhabitant of the village Kūsamba[7], Brāhmaṇa Sēṇabhaṭṭa, Brāhmaṇa Tūśēka and Siddhuyaka.

These two pieces of land together with the customary presents were granted on Monday, the seventh *tithi* of the bright fortnight of the month of Mārgaśira in the (Gupta-

Valabhī) year 470, corresponding to Monday, which is supposed to be the 10th November 788 A.D.

The donee was not given the right of raising an enclosure at the border of the gift land and winnowing grains at the border.

Thus in the presence of the group of officials stationed at Harshapur, *viz.*, Brāhmaṇa *Mahābalādhikṛita* Bhaṭṭa Īśvara of Kaisattaka, *Adhyaksha* (probably, a judge) Vāsudēva, *Mahāpratīhāra Bhaṭṭa* Arammata, who was versed in the six *aṅgas* (of the Vēdas) and Bhāulla of Vālēkhabha and in the presence of all the people the land gifted by the illustrious Chandraditya was accepted by Mātṛigaṇa.

Two of the usual imprecatory verses are quoted at the end of this record.

Notes

1. Khēṭaka is now the headquarters of Kaira or Kheda District.(*EI* XXXIV, p.216).

2. Harshapura is identified with Harsol on the Meshwa river in the Prantij Taluk of Kaira district. (*ibid.)*

3. Sānanda-sthāna is the same as Sānand near Ahmedabad.

4. Pādāṭaka may be the same as Pahāḍa or Pāḍā near Raudāvat about a mile east of Hilol across Vātrak river near Ahmedābād. (*ibid.*)

5. Sīharakhi or Sīharakhibjya is identified with the modern Serakhi near Baroda (*ibid.*)

6. Khallāpalli is probably Khadāl (or Kharāl) about 10 miles east of Hilol, across the Vātrak river (*ibid.*)

7. Kūsamba seems to be Kōsam two miles north of Khadāl (*ibid.*)

◆ ◆ ◆ ◆

No. 90

TASAI INSCRIPTION OF (HARSHA) YEAR 182

Location : Tasaī, Alwar District, Rajasthan
Date : [Harsha] year 182=789 A.D.[1]
Script : Siddhamātṛikā (Early Nāgarī)
Language : Sanskrit
King : . .
Dynasty : . .
Reference : Sircar, D.C., *EI,* XXXVI, pp.49-52

Text

Metres : Vv.1; *Śārdūlavikrīḍita* ; 2-10; *Anushṭubh*

. . . . जालसैः
प्राप्तं यैः सुरसद्मसङ्गतिसुखं विप्रादिभिर्वाँछितम् ।
. . . . . विशेषको गुणनिधिर्म्मीयाभिधानो भवात्
सूनुः सत्यवतो विभावितमतिःपूर्ण्णेन्दुबिम्बोपमः ॥ १ ॥

नागस्वाम्यभवत्तस्मात्स्वजायाजनितस्सुतः ।
कश्यपाद्दक्षकन्यायां नागस्वामिरिवापरः ॥ २ ॥

सोपयेमे महाभागां गोवां गायत्रि सन्निभाम् ।
यस्यास्सूनुरभूद्विद्वान् नाम्ना हलवनेति च ॥ ३ ॥

तेनोढा शीलसम्पन्ना गी उल्ला गुणभूषिता ।
गौरीव त्रिपुरघ्नेन छायेवानुगता सती ॥ ४ ॥

क्षीरोदधेस्समुत्पन्नो मुक्तामणिरिवापरः ।
शुचिस्वच्छो गरिष्ठश्च गुणरश्मिसमुज्वलः ॥ ५ ॥

रण्यादित्यः सुतस्तस्माद्विजवर्य्यादजायत ।

तेनेदं कारितं शुभ्रं विष्णोर्गृहमनुत्तमम् ॥ ६ ॥

रचिता देशटेनेयं भट्ट देद्दट सूनुना ।

प्रशस्ता वत्सरशते द्वाशीते विकटाक्षरा ॥ ७ ॥

चामुण्डदत्तपुत्रेण माहटेन विपश्चिता ।

उत्कीर्ण्णा स्वर्ण्णकारेण सरोर्धिष्ठान वासिना ॥ ८ ॥

द्वे पले दीपतैलस्य गुग्गुलस्य पलद्वयम् ।

चत्वारिंशतिमालाश्च कुंकुमस्याष्टमाषकाः ॥ ९ ॥

द्वादश्यां कृष्णपक्षस्य वारुण्याश्चद्विकद्वयम् ।

पूजार्थं वासुदेवस्य . . . . ॥ १० ॥

Summary

This fragmentary inscription, whose initial part engraved on another fragmentary stone[1] was discovered subsequently, records the construction of a temple of the god Vishṇu by a person named Raṇyāditya. It is in the form of an eulogy furnishing the ancestry of Raṇyāditya.

There was one Bhava to whom was born a virtuous son called Mīya. The latter's son was Nāgasvāmi who married the blessed lady Gōvā. Their son was the scholarly Halavana who married the virtuous Giullā of good conduct. To this couple was born Raṇyāditya who constructed the bright and unsurpassed temple of Vishṇu.

The eulogy was composed by Dēśaṭa, son of *Bhaṭṭa* Dēddaṭa in the (Harsha) year 182 and engraved by the goldsmith Māhaṭa, the son of Chāmuṇḍadatta and an inhabitant of Sarōdhishṭhāna.

Two *palas* of oil for the lamp, two *palas* of incense called *guggula*, forty garlands and eight *māshakas* of saffron (*kuṁkuma*) were granted for the worship of

Vāsudēva (the deity installed in the temple built by Raṇyāditya). Certain quantity of wine (*vāruṇī*) was also to be supplied on the twelfth *tithi* of the dark fortnight of every month for the same purpose.

Notes

1. It contains about one and a half *Anushṭubh* stanzas in two lines of writing beginning with an ornamental and an ordinary symbol for *siddham*. The god Tripurusha, in whom Brahman, Vishṇu and Īśvara (Śiva) are combined, are adored in verse 1. (*EI*, XXXV, p.7, n.3).

◆ ◆ ◆ ◆

No. 91

TANDANTOTTAM PLATES OF NANDIVARMMAN II

Location : Taṇḍantōṭṭam, Kumbhakonam Taluk, Tanjavur District, Tamilnadu

Date : Regnal year 581 = 789 or 791 A.D.

Script : Grantha, Tamil

Language : Sanskrit, Tamil

King : Nandivarmman (Vijaya-Nandivikramavarmman)

Dynasty : Pallava

Reference : E.Hultzsch, V.Venkayya and H.Krishna Sastri : *SII*, II, pp.517-535.

Text

Metres: Vv. 1 *Upēndravjrā* ; 2 *Mandākrāntā* ; 3, 9, 11 *Vasantatilakā* ; 4 *Sragdharā* ; 5, 10, 12, 13 *Śārdulavikṛīḍita*; 6, 8, 14 *Āryā* ; 7 *Pṛithvī*

जयन्दक्षिणाशाम्

भुरण्युतेजाः पुराविरासी

दरण्यसंस्थापितशत्रुलोकः ।

शरण्यभूतश्शरणोन्मुखानां
हिरण्यवर्म्मा जगतां हिताय ॥ १ ॥
श्रीमान्धीमाञ्जितरिपुगणस्तेजसान्धाम राजा
तीरोपान्तस्थितजयगजस्सागराणाञ्चतुर्ण्णाम् ।
आसीदाशापरिततयशा नन्दिवर्म्मेति नाम्ना
जातस्तस्मात्समिति महितस्सर्व्वशस्त्रप्रयोगैः ॥ २ ॥
राजाह्वयो यमनमन्न मृतांशुरेको
यस्मै जगत्यकरदो विषयोप्यमर्त्यः ।
यस्मिन्नगम्यमवति क्षितिमिन्द्रकल्पे
प्रस्थानवर्त्म नरकम् प्रति च प्रजानाम् ॥ ३ ॥
यस्सच्चक्रस्य भर्ता हरिरिव विबुधाश्शक्रवद् यं श्रयन्ते
येनाभूद्भूस्सनाथा सुचरितममलं रोचते चारु यस्मै ।
यस्माद्धीरेकधीराद्युधि परनृभुजां यस्य कीर्त्या दशाशाशा
संपूर्ण्णाः श्रीश्च यस्मन्निवसति सुचिरन्त्यक्तचापल्यदोषा ॥ ४ ॥
उद्वेगः पवने वने चपलतासंगः कलावत्क्षयः
पक्षे शुक्लविवर्ज्जके विषधराधिक्यन्निदाघात्यये ।
निस्त्रिंशग्रहणम् भटेषु मरुताञ्चित्रे विमानस्थिति
र्य्यस्मिन्विप्रवरद्विषश्च भुजगा एव क्षितिं शासतिः ॥ ५ ॥
धत्ते गंगादपहृतमुग्रोदयकौस्तुभं गळाभरणं ।
स्वहृदयसन्निहिताच्युतशयनमिवाहीन्द्रमुरसा यः ॥ ६ ॥

स्वभर्तुरिव यम्मदो जय इवांगवाङ्गंगमो
गिरीन्द्र इव पट्टवर्द्धन इति द्विपेन्द्रोभजत्।
सविभ्रमपरिभ्रमद्भ्रमरवृन्दगण्डूषित
क्षरन्मदविशेषशेषकृतमण्डगण्डस्थलः ॥ ७ ॥
रक्षितसत्वच्छायः प्रियसत्यो जिष्णुरच्युतः श्रीमान्।
यः खलु नरकान्तात्मा हरिरिति बहुमन्यते विबुधैः ॥ ८ ॥
तस्मै निवेद्य विधिनाष्टशतत्रयाय
वेदत्रयस्मृतिजुषाम् विदुषान्द्विजानाम्।
नाम्ना दयामुख इतीममदापयत्तं
ग्रामं कृती कृतदयामुखमंगलाख्यम् ॥ ९ ॥
अस्याज्ञप्तिरभूत्स एव मतिमान्धर्म्मार्त्थकामोपधा
शुद्धशुद्धचरित्रपात्रममदस्स्वाम्येकभक्तिव्रतः।
सत्सामान्यधनश्च धर्म्मशरणस्संबन्धिनिर्य्यन्त्रणः
कोशाध्यक्षनियोगकर्म्मकुशलः कुल्यः कुमाराह्वयः ॥ १० ॥
यो गोष्पदावधिमपि प्रददाति भूमिं
यो वा हरत्यगणयन्परिपाकमुग्रम्।
आचन्द्रतारमधितिष्ठत एव तौ द्वौ
नाकौकासाञ्च सदनन्नरकञ्च घोरम् ॥ ११ ॥
धर्म्म शर्म्म कृतम्मया कृतमिमं साम्राज्यदीक्षाव्रतो
रक्षत्यक्षतलक्षणं क्षिति तले यः क्षत्रचूळामणिः।

मूर्द्धन्यत्र मुकुन्दवन्द्यचरणद्वन्द्वं विहायापरे
ष्वज्ञातप्रणतौ वसेत्पदयुगन्तस्येत्यवोचन्नृपः ॥ १२ ॥
गावः पावनसर्वगात्रशुचयः कामाय वस्सन्तु याः
शुद्धिं स्वामिव दर्शयन्ति हि पयोव्याजाद्वानास्स्वयम् ।
मान्याः पान्तु महीसुराश्च भवतो वागायुधास्स्वर्गिणां
ये यागेप्यमृताशिनां स्वहविषा सन्तोषमातन्वते ॥ १३ ॥
परमोत्तरकारणिकस्याकृत कवितास्वयम्वृतवरस्य ।
उत्तरकारणिकाख्यस्तनयः परमेश्वरः प्रशस्तिमिमाम् ॥ १४ ॥

Translation

Conquering southern country (This is the latter portion of the verse which has been cut off.)

Verse 1 (Once) again, for the good of the world was born Hiraṇyavarmman[1] of stirring prowess who made (his) enemies settle in forests but he was an asylum for those that desire the protection.

Verse 2 From him was born the wise (and) prosperous king Nandivarmman possessed of the prowess and conqueror of the many enemies whose elephants reached the shores of the four oceans, whose fame had extended upto all quarters and who was praised in battle for (his knowledge in) the use of all weapons.

Verse 3 The only (one) of the name *rāja* that did not bow to him was the dead-rayed Moon, and the (only) country in this world that did not pay him tribute was (that) where no men exist (i.e. the heaven where the undying gods live). This Nandivarmman was comparable to Indra in ruling the earth, those subjects do not lead to hell (There is a pun intended here in the words *rāja* (the king and the moon) and *amartya.*[2]) In the second half of the verse the poet wants to say that the people were not allowed to go to hell (i.e. to commit sin) but were forced to achieve every other object of life.

Verse 4 He was the lord of a circle of good people as Hari (who possesses the powerful weapon, *charka*). The wise cling to him as (*gods*) to Śakra (i.e. Indra); by him the earth had coupled with a husband; to whom faultless good deeds are most welcome; who was the sole hero on the battle-field that the enemy kings take fright, whose fame had filled the ten quarters and in whom Śrī (goddess Lakshmī) dwelt permanently after abandoning (her) vice of fickleness.[3]

Verse 5 While this (king) was ruling the earth, anxiety (or great rush, was seen) only in the wind; tendency towards inconstancy (or *the existence of the creeper chapala*) in the forest; decay of the learned (or *the waning of the moon* in the dark fortnight) increase of serpents (or abandoning of clouds) at the end of summer; merciless attack (or the grasping of swords) by soldiers. Dishonourable living (or riding on aerial cars could not be seen by the pictures of gods). The enemies of good Brāhmaṇas (or able snake charmers) could not be tolerated. Dissolute persons (or serpents) did not have been tolerated.

Verse 6 He wore on (his) breast the gem called Ugrōdaya (which was like Kaustubha) the gem being on the breast by Achyuta. As if the Achyuta bears the bed of the serpent. His Ugrōdaya was like his necklace snatched by Gaṅgā.

Verse 7 He had an excellent elephant known as Paṭṭavarddhana as if it was like his arrogance. This elephant was like a mountain. His temple had a red paint on it and it was excessively flowing rut which was sipped by the swarm of bees.

Verse 8 He was like (God) Hari for protecting all living beings because He loves Satyā but He was like demon of Naraka to those who were evil.

Verse 9 This pious man (Nandivarmman) was told by Dayāmukha[4] who gave the village which was also named as Dayāmukhamaṅgalam, which was gifted to 308 learned Brahmins,[5] who had studied the three Vēdas and smṛitis.

Verse 10 The *ājñapti* (*Dūta* or communicator) of this charter was Kumāra, who was honest, who was pure in religious merit, wealth (*artha*) and desires (*kāma*) who was upright in conduct, prideless, who was devoted to his master, whose wealth is shared by good men, who seeks to virtue, who was free to all relations, and who was clever in discharging the duties of a treasurer.

Verse 11 The one who may grant the land as small as a hoof of a cow, he will dwell in heaven till the Moon and stars last. The other man who robs such land will be in the dreadful hell.

Verse 12 The king requires that this gift should be protected. Those that protect this deed of mine without disturbance, will be on my head just by on the head of Mukunda (God Vishṇu).

Verse 13 May the sacred cow whose every limb is purifying, because their milk is white. The revered gods on earth are the Brāhmaṇas, who may shed like the nectar on Gods.

Verse 14 The eulogy (*praśasti*) was written by Paramēśvara, surnamed as Uttarakāraṇika, son of Parama-ōttarakā-raṇika, the self chosen lord of poetry.

Notes

1. This set of copper plates is incomplete, one or more plates at the beginning have been lost. The first verse tells about Hiraṇya-varmmā

2. The *amartya* can be interpreted as uninhabited territory or as the territory of the immortals.

3. It is noteworthy the prakriti *yad* in all its cases regularly found in the verse 4.

4. Dayāmukha might have been a feudatory of Nandivrman II.

5. See below. The available plates of the charter gives the list of only 199 brahmins.

No. 92

DAULATABAD PLATES OF RASHTRAKUTA SANKARAGANA

Location : Daulatābād, Aurangabad District, Maharashtra
Date : Śaka 715=793 A.D.
Script : Siddhamāṭrikā (Early Nāgarī)
Language : Sanskrit
King : Śaṅkaragaṇa
Dynasty : Rāshṭrakūṭa
Reference : Bhandarkakr, D.R., *EI*, IX, pp.193-197

Text

Metre: Vv. 1, 12, 14 *Anushṭubh* 2, 4, 7, 8, 10, 11, *Vasantatilaka*; 5, 9 Ārya; 6 *Śārdūlavikriḍita*

ॐ स्वस्ति ॥

स वोव्याद्वेधसा धाम यन्नाभिकमलं कृतं ।
हरश्च यस्य कान्तेन्दुकलया कमलंकृतं ॥ १ ॥
आसीद्द्विषत्तिमिरमुद्यतमण्डलाग्रो
ध्वस्तिन्नयन्नभिमुखो रणशर्व्वरीषु ।
भूपः शुचिः पृथुरिवाप्तदिगन्तकीर्ति
गौंविन्दराज इति राजसु राजसिंहः ॥ २ ॥
तस्यात्मजो जगति विश्रुतदीर्घकीर्त्तिरार्त्तार्त्तिहारिहरिविक्रमधामधारी ।
भूपस्त्रिविष्टपनृपानुकृतिः कृतज्ञः श्रीकक्कराज इति गोत्रमणिर्वभूव ॥ ३ ॥
तस्य प्रभिन्नकरटच्च्युतदानदन्तिदंतप्रहारविषमोल्लिखितांसपीठः ।
क्ष्मापः क्षितौ क्षपितशत्रुरभूत्तनूजः सद्राष्ट्रकूटकनकाद्रिरिवेन्द्रराजः ॥ ४ ॥

तस्योपार्ज्जिततपसस्तनयश्चतुरुदधिवलयमालिन्याः ।
भोक्ता भुवः शतक्रतुसदृशः श्रीदन्तिदुर्ग्गराजोभूत् ॥ ५ ॥

आसेतोर्व्विपुलोपलावलिलसल्लोलोर्म्मिवेलाजला
दाप्रालेयकलंकितामलशिलाजालात्तुषाराचलात् ।
आपूर्व्वापरवारिराशिपुलिनप्रान्तप्रसिद्धावधे
र्येनेयं जगती स्वविक्रमबलेनैकातपत्रीकृता ॥ ६ ॥

अभ्रूविभङ्गमगृहीतनिशातशस्त्रमज्ञातमप्रतिहृताज्ञमपेतयत्नं ।
यो वल्लभं सपदि दण्डबलेन जित्वा राजाधिराजपरमेश्वरतामवाप ॥ ७ ॥

काञ्चीशकेरलनराधिपचोलपाण्ड्य
श्रीहर्षवज्रटविभेदविधानदक्षं ।
कर्णाटकं बलमचिन्त्यमजेयमन्यै
र्भृत्यैः कियद्भिरपि यः सहसा विजिग्ये ॥ ८ ॥

तस्मिन् दिवं प्रयाते वल्लभराजे ०कृतप्रजापालः ।
श्रीकक्कराजसूनुर्म्महीपतिः कृष्णराजोभूत् ॥ ९ ॥

तत्सूनुराहवरुचिः प्रथितो बभूव श्रीपारिजातविभवाहरणप्रतीतः ।
गोवर्द्धनोद्धरणलक्षितबाहुवीर्यो गोविन्दराजनृपतिर्हरिणा समानः ॥ १० ॥

तस्यानुजो निरुपमस्तमुदीर्ण्णमीक्ष
त्यक्तं नृपैरपि नयने विलुप्यमानं ।
राज्यं बभार गुरुभक्तिमतोन्यसंस्थं
मा भूत्किलान्वयपरिच्च्युतिरत्र लक्ष्म्याः ॥ ११ ॥

पितृव्यस्तस्य गुणवाञ्छ्रीनन्न इति विश्रुतः।
श्रीकृष्णराजभ्राता हि श्रीकक्कराज प्रियात्मजः॥ १२॥

तत्पुत्रः प्रकटपराक्रमाक्रान्तदिक्क्को पात्रानुरागः परच्छिद्रापवाद रहस्येष्वन्धमूकबधिरो विरुद्धकामसेवी विमलागाधसलिलः कान्तारभूमौ जलाशय इव प्रणयिनां तृट्छाता समरावलोकश्रीशङ्करगणराजः श्रीकलिवल्लभ नरेन्द्रदेवानुमत्या सर्व्वानेवागामिनृपतिग्रामकूटमहत्तराधिकार्यादीन्समनुबोधयत्यस्तु वः संविदितं यथास्माभिर्मातापित्रो रात्मनश्चानल्पपुण्ययशोभिवृद्धये। तेन्वीविनिगर्तब्रह्मचारि भारद्वाजगोत्राय वासुदे . . . नेय पाण्डि . . . भुत्त्या सामिराभिधानग्रामः साभ्यन्तरसिद्धि सर्व्वदेयप्रहीणश्चतुराघाटविशुद्धस्तत्पादपूजार्थं गुरुदक्षिणा दत्ता। यतोस्मद्वंश्यैरन्यैर्व्वा पालनीयो रक्षणीयश्च। यो वाज्ञानतिमिरावृतमतिः आच्छिन्द्यादाच्छिद्यमानं चानुमोदेत स पञ्चभिर्महापातकैश्चोपपातकैः संयुक्तः स्यादित्युक्तं च भगवता वेदव्यासेन व्यासेन।

षष्टिं वर्षसहस्त्राणि स्वर्गे मोदति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥ १३॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः।
कृष्णाहयो हि जायन्ते भूमिदायं हरन्ति ये॥ १४॥

लिखितं चैतच्छासनं शकनृपकालातीतसंवत्सरशतेषु ७१५ परमेश्वराज्ञया परमेश्वराज्ञया चन्दयिकेन॥ पुनरपि सीमाः पूर्वतः चिचग्रामः दक्षिणतः निबग्रामः पश्चिमतः दधिबाहल॥ उत्तरतः पडलावदपटन एवं चतुर . . .

सीमा पूर्वतः टंकं। खेतसीमा पुर्वदरिदरिगहो पुनः टोणस्य टोणस्य मस्तके शिलतलं। तोयनरज। निबुतटाकं। दक्षिणतः जंबुग्रहरकः। दक्षिणतः नीबग्रामसती ताविह रेलाद्रिसंबकः हस्तिनिकगोग्रहदरीदधिवा हलतटाकं सिलाद्वयं सिबकपलासचिचाबदरितटाकं॥ उत्तरतः खाटके हटोक . . . युनमणिः। पुर्वदरीरल . वससीमापर्यंत वली . . निबद्ध । वलभनरेन्द्रेण हिरमाल . गांड्डक उत्तरतः देसिलस्यद्र ॥ ग्रामे भूमी ॥ इयच्चोनाक्षरमधिकाक्षरं वा सर्व्वं प्रमाणमिति ॥ श्रीभटा र्कमतः ॥ ८००

Summary

[Verses 1-9 of this inscription are met with in the Pimpri plates of Dhruva (No.82 above) and many other grants of this dynasty. They trace the genealogy of the Rāshṭrakūṭa dynasty beginning with Gōvindarāja I upto Kṛishṇarāja.]

Verse 10 compares Gōvinda II, son of Kṛishṇarāja with Hari (Lord Kṛishṇa) with the help of *double entendres.* It seems to show that Gōvinda II defeated a king Pārijāta by name and upheld the cause of another prince called Gōvardhana.

Verse 11 informs that his younger brother Nirupama (Dhruva), on perceiving that he (*i.e.* Gōvinda II) had become self-conceited, lost support of the feudatory princes and even deprived of policy, (what has been told by Dhruvarāja), assumed the royal authority held by someone who had no respect for the elders (*i.e.* bygone Rāshṭrakūṭa kings) in order to retain the sovereignty within the family itself.

Verse 12 states that the paternal uncle of Nirupama was Śrī Nanna, brother of Śrī Kṛishṇarāja and son of Śrī Kakkarāja.

Then follows the prose passage introducing the grantor Samarāvalōka-Śrī-Śaṅkaragaṇa-rāja, son of Śrī Nanna, who is stated to have granted (a village whose name is lost)[1] to a religious student (*brahmachārī*) who had emigrated from (a place called) Tēnvī and who was a preceptor of the donar (*tat-pāda-pūjārthaṁ guru-dakshiṇā* - line 33). This charter is stated to have been issued by Śaṅkaragaṇa with the consent of Śrī-Kalivallabha Narēndradēva (Dhruva-Nirupama).

This is followed by a request to future rulers to respect the donation and a warning to those who might rescind it and two of the usual benedictory imprecatory verses sung by worshipful Vyāsa, who had compiled the Vēdas.

This charter was written by Chandayika by order of the supreme ruler when 715 years of the Śaka era had elapsed.

Notes

[1] The whole of line 31 after the word *Vra(bra)hmachārī* and a part of the line following have unquestionably been tampered with. They contained the names of the donee and the village granted, which have been cancelled and replaced by new ones by heating the plates and beating in the letters originally engraved. The boundaries of this new village are specified after about the middle of line 42, where the original inscription really ends, down to line 55 (*EI,* IX, p.193).

* * * *

No. 93

PAITHAN PLATES OF GOVINDA III

Location : Paithān, Aurangabad District,
Maharashtra
Date : Śaka 716=794 A.D.
Script : Nāgarī
King : Govinda III
Dynasty : Rāshṭrakūṭa
Reference : Kielhorn, F., *EI*, III, pp.103-107

Text

Metres: Vv.1, 22, 26, 27, 29-32 *Anushṭubh* ; 2, 3, 5, 6, 8, 9, 15, 23, 24 *Vasantatilakā* ; 4, 19 *Upajāti* ; 7, 11-14, 25, 28, *Āryā* ; 10, 17, 20, 21 *Śārdūlavikrīḍita* ; 16, 18 *Sragdharā*

ॐ ॥ स वोव्याद्वेधसा धाम यन्नाभिकमलं कृतम् ।

हरश्च यस्य कान्तेन्दु कलया कमलंकृतं ॥ १ ॥

आसीद्द्विषत्तिमिरमुद्यत मण्डलाग्रो

ध्वस्तिन्नयन्नभिमुखो रणशर्व्वरीषु ।

भूपः शुचिर्व्विधुरिवास्त दिगन्तकीर्त्ति

गोँविन्दराज इति राजसु राजसिंहः ॥ २ ॥

दृष्ट्वा चमूमभिमुखीं सुभटाट्टहासा

मुन्नामितं सपदि येन रणेषु नित्यं ।

दष्टाधरेण दधता भ्रुकुटिं ललाटे

खड्गं कुलं च हृदयञ्च निजं च सत्त्वम् ॥ ३ ॥

खड्गं कराग्रान्मुखतश्च शोभा

मानो मनस्तः सममेव यस्य ।

महाहवे नाम निशम्य सद्य

स्त्रयं रिपूणां विगलत्यकाण्डे ॥ ४ ॥

तस्यात्मजो जगति विश्रुतदीर्ग्घकीर्त्ति

रात्तार्त्तिहारिहरिविक्रमधामधारी ।

भूपस्त्रिविष्टपनृपानुकृतिः कृतज्ञः

श्रीऌर्क्कराज इति गोत्रमणिर्ब्बभूव । ॥ ५॥

तस्य प्रभिन्नकरटच्च्युतदानदन्ति

दन्तप्रहाररुचिरोल्लिखितांसपीठः ।

क्ष्मापः क्षितौ क्षपितशत्रुरभूत्तनूजः

सद्राष्ट्रकूटकनकाद्रिरिवेन्द्रराजः ॥ ६ ॥

तस्योपार्जितमहसस्तनयश्चतुरुदधिवलयमालिन्याः ।

भोक्ता भुवः शतक्रतुसदृशः श्रीदन्तिदुर्ग्गराजोभूत् । ॥ ७ ॥

काञ्चीशकेरलनराधिपचोलपाण्ड्य

श्रीहर्षवज्रटविभेदविधानदक्षं ।

कार्णाटकं बलमनन्तमजेयमन्यै

र्भृत्यैः कियद्भिरपि यः सहसा जिगाय ॥ ८ ॥

सभ्रूविभंगमगृहीतनिशातशस्त्र

म्मश्रान्तमप्रतिहताज्ञमपेतयत्नं ।

यो वल्लभं सपदि दण्डबलेन जित्वा

राजाधिराजपरमेश्वरतामवाप ॥ ९॥
आ सेतोर्व्विपुलोपलावलिलसल्लोलोर्म्मिमालाजला
दाप्रालेयकलंकितामलशिलाजालात्तुषाराचलात्।
आ पूर्व्वापरवारिराशिपुलिनप्रान्तप्रसिद्धावधे
र्य्येनेयं जगती स्वविक्रमबलेनैकातपत्रीकृता । ॥ १० ॥
तस्मिन्दिवं प्रयाते वल्लभराजे क्षतप्रजाबाधः ।
श्रीकर्क्कराजसूनुर्म्महीपतिः कृष्णसजोभूत् ॥ ११ ॥
यस्य स्वभुजपराक्रमनिः शेषोत्सादितारिदिक्कक्रं ।
कृष्णस्येवाकृष्णं चरितं श्रीकृष्णराजस्य ॥ १२ ॥
शुभतुंगतुंगतुरगप्रवृद्धरेणूर्ध्वरुद्धरविकिरणं ।
ग्रीष्मेपि नभो निखिलं प्रावृट्कालायते स्पष्टं ॥ १३ ॥
दीनानाथ प्रणयिषु यथेष्टचेष्टं समीहितमजस्रं ।
तत्क्षणमकालवर्षो वर्षति सर्व्वार्त्तिनिर्व्वपणं ॥१४ ॥
राहप्पमात्मभुजजातबलावलेप
माजौ विजित्य निशितासिलताप्रहारैः ।
·पालिध्वजावलिशुभामचिरेण यो हि
राजाधिराजपरमेश्वरतां ततान ॥ १५ ॥
क्रोधादुत्खातखड्गप्रसृतरुचिचयैर्भासमानं समन्ता
दाजावुद्धृत्तवैरिप्रकटगजघटाटोपसंक्षेपदक्षं ।
शौर्य्यत्यक्तारिवर्ग्गो भयचकितवपुः क्वापि दृष्ट्वैव सद्यो

दर्प्पाध्मातारिचक्रक्षयकरमगमद्यस्य दोर्दण्डरूपं ॥ १६ ॥

पातायश्चतुरम्बुराशिरशनालंकारभाजो भुव

स्त्रय्याश्चापि कृतद्विजामरगुरुप्राज्याज्यपूजादरः ।

दातामानभृदग्रणीर्गुणवतां योसौ श्रियो वल्लभो

भोक्तुं स्वर्ग्गफलानि भूरितपसा स्थानं जगामामरं ॥ १७ ॥

येन श्वेतातपत्रप्रहतरविकरव्राततापात्सलीलं

जग्मे नासीरधूलीधवलितशिरसा वल्लभाख्यः सदाजौ ।

स श्रीगोविन्दराजो जितजगदहितस्त्रैणवैधव्यहेतु

स्तस्यासीत्सूनुरेकक्षणरणदलितारातिमत्तेभकुम्भः ॥ १८ ॥

तस्यानुजः श्रीध्रुवराजनामा महानुभावोऽप्रहतप्रतापः ।

प्रसाधिताशेषनरेन्द्रचक्रः क्रमेण बालार्कवपुर्बभूव ॥ १९ ॥

श्रीकाङ्चीपतिगंगवेंगिकयुता ये मालवेशादयः

प्राज्यानानयाति स्म तान्क्षितिभृतो यः प्रातिराजानपि ।

माणिक्याभरणानि हेमनिचयं यस्य प्रपद्योपरि

स्वं येन प्रति तं तथापि न कृतं चेतोन्यथा भ्रातरं ॥ २० ॥

सामाद्यैरपि वल्लभो न हि यदा संधिं व्यधात्तं तदा

भ्रातुर्दत्त रणे विजित्य तरसा पश्चाततो भूयसः ।

प्राच्योदीच्यपरान्व्यपास्य च लसत्पालिध्वजैर्भूषितं

चिह्नैर्यः परमेश्वरत्वमखिलं लेभे महीन्द्रो विभुः ॥ २१ ॥

जिताशेषमहीपालः पुरन्दरजिगीषया ।

स श्रीनिरुपमो राजा हित्वा मर्त्यं दिवंगतः ॥ २२ ॥

तस्याप्यभूद्भुवनभार भृतौ समर्थः
पार्थोपमः पृथुसमानगुणो गुणज्ञः ।
दुर्वारवैरिवनितातुलतापहेतु
गौविन्दराज इति सूनुरिनप्रतापः ॥ २३ ॥

यश्च प्रभुश्चतुरचारुरुदारकीर्ते
रासेदिवान्निरुपमस्य पितुः सकाशात् ।
सत्स्वप्यनेकतनयेषु गुणातिरेकान्
मूर्द्धाभिषिक्तनृपसम्मतमाशु राज्यं ॥ २४ ॥

शशधरकरनिकरनिभं यस्य यशः सुरनगाग्रसानुस्थैः ।
परिगीयतेनुरक्तैर्विद्याधरसुन्दरीनिवहैः ॥ २५ ॥

रक्षता येन निःशेषं चतुरम्बुधिसंयुतं ।
राज्यं धर्म्मेण लोकानां कृता तुष्टिः परा हृदि ॥ २६ ॥

अयमारात्प्रियो लोकान्यान्द्राक्षीत् समाश्रितः ।
न ते याचितवन्तोन्यं भूभृतं धनतृष्णया ॥ २७ ॥

तेनेदमनिलविद्युच्चङ्चलमवलोक्य जीवतमसारं ।
क्षितिदानपरमपुण्यः प्रवर्त्तितो ब्रह्मदायोयं ॥ २८ ॥

स च परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमद्धारावर्षदेवपादानुध्यात परमभट्टारकमहाराजाधिराजपरमेश्वरपृथ्वीवल्लभप्रभूतवर्षश्रीवल्लभनरेन्द्रदेवः कुशली सर्व्वानेव यथासंबद्ध्यमानकान्राष्ट्रपतिविषयपतिग्रामकूटायुक्त

नियुक्तकाधिकारिकमहत्तरादीन्समनुदर्शयत्यस्तु वः संविदितं यथा
श्रीमत्प्रतिष्ठानवहिःसमावासितजयस्कन्धावारावस्थितेन मया मातापित्रो
रात्मनश्चैहिकामुष्मिकपुण्ययशोभिवृद्धये अविलवारेशवास्तव्य वत्सस
गोत्र वाजिसनेयब्रह्मचारि जयादित्यपुत्र पितामह . . . . . भद्रवास्तव्य
वत्ससगोत्र वाजिसनेयसब्रह्मचार्य्यरिषिपुत्रभृटिक्रम। तथा श्रीप्रतिष्ठानवा
स्तव्य तत्त्रैविद्यसामान्यपाराशरसगोत्रवह्वृचसब्रह्मचारिजेज्जटपुत्रराजट
तथा तकलिवास्तव्य तच्चार्विद्यसामान्य वशिष्ठसगोत्र बह्वृचसब्रह्मचारि
चायटपुत्र वा . . . . । तथा . . . . वास्तव्यसैतेहसगोत्रबह्वृचसब्रह्मचारि
उल्लपुत्र वामदेवः। तथा . . . . . वास्तव्यतत्त्रैविद्यसामान्यहारीतसगोत्र
तैत्तिरीयसब्रह्मचारि . . . . . पुत्र . . . . कुमार। तथा
कच्चौरजवास्तव्य काश्यपसगोत्रमाध्यन्दिनसब्रह्मचारि चतुर्भ्य एतेभ्यो
ब्राह्मणेभ्यः श्रीप्रतिष्ठानभुक्त्यन्तर्ग्गतसाराकच्छद्वादशग्रामाभ्यन्तरे लिम्बा
रामिकग्रामो यस्याघाटनानि पूर्व्वतः समतीर्थकग्रामः दक्षिणतः गोदावरी
नदी अपरतः ब्रह्मपुरी उत्तरतः धोनग्रामहलं। एवमेतच्चतुराघाटनोप
लक्षितो ग्रामः सोद्रंगः सोपरिकरः सदशापराधः सभूतपातप्रत्यायः
सोत्पद्यमान विष्टिकः सधान्यहिरण्यादेयोचाटभटप्रवेश्यः सर्व्वराजकीया
नामहस्तप्रक्षेपणीयाचन्द्रार्क्कार्ण्णवक्षितिसरित्पर्व्वतसमकालीनः पुत्रपौत्रा
न्वयक्रमोपभोग्यः पूर्व्वप्रत्तदेवब्रह्मदायरहितोभ्यन्तरसिद्ध्या भूमिच्छि
द्रन्यायेन शकनृपकालातीतसंवत्सरशतेषु सप्तसु षोडशोत्तरेषु वैशाख
बहुला मावास्यामादित्यग्रहणपर्व्वणि बलिचरुवैश्वदेवाग्निहोत्रातिथिपञ्च

महायज्ञादिक्रियोत्सर्प्पणार्थं गोदावर्यां स्नात्वाद्योदकातिसर्ग्गेण प्रतिपादितः यतोस्योचितया ब्रह्मदायस्थित्या भुंजतो भोजयतः कृषतः कर्षयतः प्रतिदिशतो वा न कैश्चिदल्पापि परिपंथना कार्या तथागामिभद्रनृपतिभिरस्मद्वंश्यैरन्यैर्व्वा सामान्यं भूमिदानफलमवेत्य विद्युल्लोलान्यनित्यैश्वर्याणि तृणाग्रलग्नजलबिन्दुचंचलं च जीवितमाकलय्य स्वदायनिर्व्विशेषो यमस्मद्दायोनुमन्तव्यः प्रतिपालयितव्यश्च । यश्चाज्ञानतिमिरपटलावृत मतिराच्छिन्द्यादाच्छिद्यमानकं वानुमोदतः स पंचभिर्म्महापातकैः सोपपातकैश्च संयुक्तः स्यादित्युक्तंच भगवता वेदव्यासेन व्यासेन ॥

शष्टिंवर्षसहस्राणि स्वर्ग्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येवनरकेवसेत् ॥ २९ ॥
विन्ध्याटवीष्वतोयासु श्ष्ककोटरवासिनः ।
कृष्णाहयो हि जायन्ते भूमिदानं हरंति ये ॥ ३० ॥
बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ ३१ ॥
स्वदत्तां परदत्तां वा यत्नाद्रक्ष नराधिप ।
महीं महीभृतां श्रेष्ठ दानाच्छ्रेयोनुपालनं ॥ ३२ ॥
इति कमलदलाम्वुविन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
अतिविमलमनोभिरात्मनीनैर्न्न हि पुरुषैः परकीर्त्तयो विलोप्याः ॥ ३३ ॥

परमेश्वरप्रहितशीतपृषिकरा दूतकं लिखितं च परमेश्वराज्ञया श्रीकृन्धेये

येति ॥ ....

Summary

[Verses 1-21, 25 and 28 of this inscription occur in the Bhor State Museum Plates of Dhruva (No.89 above) and verses 26 and 27 are also found in his Pimpari plates (No.82 above). After the usual benedictory verse seeking protection of Hari and Hara, this inscription gives the genealogy of the Rāshṭrakūṭa dynasty beginning with Gōvindarāja I upto Gōvindarāja III, son of Dhruvarāja Nirupama.]

Verse 22 Śrī-Nirupama (Dhruvarāja) who had conquered all the rulers went to heavens with the desire to conquer Lord Indra (*Purandara*).

Verse 23 His son was Gōvindarāja who was comparable to Arjuna and Pṛithu and whose valour was like that of the Sun.

Verse 24 He got the kingdom from his father Nirupama after being duly coronated, even though there were many other sons (of Nirupama).

That *Paramabhaṭṭāraka, Mahārājādhirāja. Paramēśvara, Pṛithivīvallabha, Prabhūtavarsha Śrī Vallabha-Narēndra-dēva* (i.e. Gōvinda III), who meditated on the feet of his father is well. He orders all the concerned officers, *viz.*, *Rāshṭrapati, Vishayapati, Grāmakūṭa, Āyukta, Niyuktaka, Ādhikārika, Mahattara* and others thus: May it be knwn to you all that being encamped near Pratishsṭhāna and having bathed in the river Gōdāvarī, on the occasion of a solar eclipse on the new moon *tithi* of the dark half of Vaiśākha in the Śaka year 716 (expired), for the increase in the religious merit and glory of (my) parents and of myself, I have granted the village Limbārāmika, situated in the Sārākachchha village group of twelve in the Pratishṭhāna-bhukti to Pitāmaha, son of Jayāditya, a resident of Avilavārēśa, who pertained to Vatsa-sagtra and who was a Vājisa-brahmachāri, Bhṛiṭikrama, son of Rishi, a resident of . . . bhadra, who belonged to Vatsa-sagōtra and a student of Vājasanēya, Rājaṭa, son of Jējjaṭa, a resident of Pratishṭhāna, who was a member of the community of Brāhmaṇas (of that place) well-versed in the three Vēdas, who belonged to the Parāśara-sagōtra and was a student of Bahvṛicha, Vā . . . . , son of Chayaṭa, a resident of Takali and a member of the Community of Brāhmaṇas of that place who were well-versed in the four Vēdas, who pertained to the Vaśishṭha-sagōtra and was a student of Bahvṛicha, and Vāmadeva, son of Rāulla, who belonged to the Saitēha-sagōtra[1] and was a student of Bahvṛicha (there were two more Brāhmaṇas one of whose name is lost and that of another not mentioned).

The boundaries of this (grant) village are, to the east the village Samatīrthaka, to the south the river Gōdāvarī, to the west a locality named Brahmapurī, and to the north the arable land (?) of the village Dhōna (?)

This grant is made for the purpose for conducting the five great sacrifices, *bali*, *charu*, etc. and the privileges like *udraṅga*, etc., are attached to it. This grant is meant to be enjoyed by the sons and grandsons of the donees in the order of succession and it excludes the lands already granted to the gods and Brāhmaṇas. No obstruction should be caused to the donees while they enjoy (utilize) this donation in whatever way they like. The future rulers of my family as also others should protect this grant. He who rescinds this grant or permits such an act will attract the (sin of) five great offences and the minor offences.

[Five imprecatory verses ascribed to Vyāsa are quoted here].

The executor (*dūtaka*) (of the grant) is Śītpṛishikarā and the writer Kṛindhēya.

Notes

1. Saitēha-sagōtra is not one of the gotras as per *Gōtramañjarī* of J.Brough.

No. 94

MANNE PLATES OF MARASIMHA - SAKA 719

Location : Maṇṇe, Nelamangala Taluk, Bangalore District, Karnataka.

Date : Śaka 719 =797 A.D.

Script : Early Kannaḍa

Language : Sanskrit

King : Mārasiṁha

Dynasty : Western Gaṅgas of Talakāḍu

Reference : Ramesh, K.V., *Western Gangas of Talakadu*, No.49, pp.190-206.

Text

Metres: Vv. 1, 4, 8, 11 *Sragdharā;* 2, 5,10; *Vasantatilakā;* 3, 9 *Śardūlavikrīḍita;* 7 *Śikhariṇī*, 6, 12-23 *Anushṭubh*

सिद्धं। स्वस्ति॥ जितं भगवतागतघनगगनाभेन पद्मनाभेन। श्रीमज्जाह्ववेयकुलामलव्योमावभासनभास्करः स्वखड्गैकप्रहारखण्डितमहाशिलास्तम्भलब्धबलपराक्रमो दारुणारिगणविदारणोपलब्धव्रणविभूषणविभूषितः काण्वायनसगोत्रः श्रीमत्कोङ्गणिवर्म्मधर्म्माधिराजः। तस्यपुत्रः पितुरन्वागतगुणयुक्तो विद्याविनयविहितवृत्तिः सम्यक्प्रजापालनमात्राधिगतराज्यप्रयोजनो विद्वत्कविकाञ्चननिकषोपलभूतो नीतिशास्त्रस्य वक्तृप्रयोक्तृकुशलो दत्तकसूत्रवृत्तेः प्रणेता श्रीमन्माधवमहाधिराजः। तत्पुत्रः पितृपैतामहगुणयुक्तोऽनेकचतुर्दन्तयुद्धावाप्तचतुरदधिसलिलास्वादितयशाः श्रीमद्धरिवर्म्ममहाधिराजः। तत्पुत्रो द्विजगुरुदेवतापूजनपरोनारायणचरणानुध्यातः श्रीमान्विष्णुगोपमहाधिराजः। तत्पुत्रस्त्रयम्बकचरणाम्भोरुहरजः पवित्रीकृतोत्तमांगः स्वभुजबलपराक्रमक्रय

क्रीतराज्यः कलियुगवलपंकावसन्नधर्मवृषोद्धरणनित्यसन्नद्धः श्रीम
न्माधवमहाधिराजः तत्पुत्रः श्रीमत्कदम्बकुलगगनगभस्तिमालिनः कृष्ण
वर्म्ममहाधिराजस्य प्रियभागिनेयो विद्याविनयातिशयपरिपूरितान्तरात्मा
निरवग्रहप्रधानशौर्य्यो विद्वत्सुप्रथमगण्यः श्रीमान्कोंगणिमहाधिराजः
अविनीतनामा तत्पुत्र विजृम्भमाणशक्तित्रयः अन्दरि आलत्तूर्पोरुळरे
पेळ्नगराद्यनेकसमरमुखमखहुतहत प्रहतशूरपुरुषपशूपहारविघसविह
स्तीकृतान्ताग्निमुखः किरतार्जुनीयपञ्चदशसर्ग्गटीकाकारो दुर्व्विनीतना
मधेयः तस्यपुत्रदुर्द्दान्तविमर्द्दमृदितविश्वम्भराधिपमौलिमालामकरन्दपुंज
पिंजरीक्रियमाण चरणयुगलनळिनो मुष्करनामधेयः तस्यपुत्रश्चतुर्दश
विद्यास्थानाधिगतविमलमतिर्व्विशेषतोनवशेषस्यनीतिशास्त्रस्य वक्तृप्रयो
क्तृकुशलो रिपुतिमिरनिकरनिराकरणोदयभास्करः श्रीविक्रमप्रथित
नामधेयः तस्य पुत्रः अनेकसमरसम्पातविजृम्भितद्विरदरदनकुलिशा
भिघातव्रणसम्रूढभास्वद्विजयलक्षणलक्षीकृतविशालवक्षस्थलः। समधि
गतसकलशास्त्रार्थतत्वस्समाराधितत्रिवर्ग्गो निरवद्यचरितः। प्रतिदिनम
भिवर्द्धमानप्रभावो भूविक्रमद्वितीयनामधेयः। अपि च।

नानाहेतिप्रहारप्रविघटितभटोरःकवाटोत्थितासृ
ग्धारास्वादप्रमत्तद्विपशतचरणाक्षोदसम्मर्द्दभीमे।
संग्रामे पल्लवेन्द्रन्नरपतिमजयद्यो वेळनदाभिधाने
राजा श्रीवल्लभाख्यः समरशतजयावाप्तलक्ष्मीविलासः॥ १॥
तस्यानुजो नतनरेन्द्रकिरीटकोटि

रत्नार्क्कदीधितिविराजितपादपद्मः ।
लक्ष्म्या स्वयंवृतपतिर्नवकामनामा
शिष्टप्रियोरिगणदारुणगीतकीर्त्तिः ॥ २ ॥

तस्य कोङ्गणिमहाराजस्य शिवमारापरनामधेयस्य पौत्रः समवनतसमस्तसामन्तमकुटतटघटित बहलरत्नविलसदमरधनुष्खण्डमण्डितचरणनखमण्डल नारायणचरणनिहितभक्तिः शूरपुरुषतुरगवरवारणघटासंघट्टदारुणसमरशिरसिनिहितात्मकोपो भीमकोपः प्रकटरतिसमयसमनुवर्त्तनचतुरयुवतिजनलोकधूर्त्तो लोकधूर्त्तः सुदुर्द्धरानेकयुद्धमूर्द्धलब्धविजयसंपदहितगजघटाकेसरी राजकेसरी । अपि च ।

यो गंगान्वयनिर्म्मलाम्बरतलव्योभासनप्रोलसन्
मार्त्तन्डोरिभयङ्करः शुभकरः सन्मार्ग्गरक्षाकरः ।
सौराज्यं समुपेत्य राजसमितौ राजन्गुणैरुत्तमैः
राजा श्रीपुरुषश्चिरं विजयते राजन्य चूळामणिः ॥ ३ ॥
कामोरामासुचापेदशरथतनयो विक्रमेजामदग्न्यः
प्राज्यैश्वर्य्यैर्बलारिर्ब्बहुमहसिरविः स्वप्रभुत्वे धनेशः ।
भूयोविख्यातशक्तिस्फुटतरमखिलप्राणभाजां विधाता
धात्रा सृष्टः प्रजानाम्पतिरितिकवयो यं प्रशंसन्ति नित्यम् ॥ ४ ॥

स तु प्रतिदिनप्रवृत्तमहादानजनितपुण्याहघोषमुखरितमन्दिरोदरः श्रीपुरुषप्रथमनामधेयः पृथिवीकोंगणिमहाराजः तत्पुत्रः प्रतापविनमितसकलमहीपालमौलिमालालालितचरणारविन्दयुगलो निजभुजविराजितनिशित

खड्गपट्टसमाकृष्टानिष्टधरापालवल्लभजय श्रीसमालिङ्गितस्समरमुखसम्मुखागत रिपुनृपतिगजघटाकुम्भनिर्भेदनोच्छळितरक्तच्छटापातपाटलित निजभुजस्तम्भः आकर्णसमाकृष्टचापचक्रविनिर्मुक्तनाराचपरंपरापातपातितारातिमण्डलो बहुसमरसमार्ज्जितजयपताकाशतशबलितनभस्थलः ।

यस्मिन्प्रयातवतिकोपवशम्महीशे
यान्तिक्षणादहितभूमिभुजो रणाग्रे ।
अन्त्रावलीवलयभूषणमन्तकस्य
वक्रान्तरक्षतजकर्द्दमदुर्न्निरीक्ष्यम् ॥ ५ ॥

स तु शिशिरकरनिकरनिर्म्मलनिजयशोराशिविशदीकृतदशाशाचक्रमसमस्तचक्रवर्त्तिलक्षणोपलक्षितो निरपेक्षापरोपकारसंपादनैकव्यसनः प्रवर्त्तितन्यायबलसमुन्मूलितकलिकालविलसितो निपुणनिजनीतिप्रयोगापहसितबृहस्पतिः कुनृपतिकदम्बककपटकोटिविघटितधर्म्मावलम्बनशिलास्तंभायमानचरितः सतत प्रवृत्तदानसन्तर्प्पितद्विजातिलोकः ।

प्रोन्मीलितविकारेण सर्व्वलोकोपकारिणा ।
यस्यदानेन दिङ्नागदानधाराप्यधः कृता ॥ ६ ॥

अपि च ॥

जटानां संघातैरिहभुविकृतानूनविपदां
कलानामाधारो बुधजनहितापादनपरः ।
गुणानां शुद्धानामपिनियतमुत्पत्तिभवनं
नृपाणां नेता यः कविरितिमतः काव्यकुशलैः ॥ ७ ॥

दुर्व्विगाहफणिसुतमतपारावारपारदृश्वाप्रमाणशास्त्रशाणनिशातीकृतवीरधिषणः समाजतन्त्रतत्त्वावबोधविमदीकृतबुधो हस्तिनीव वक्रोद्भवयतिप्रवरमतावबोधनमतिर्व्विद्वन्मति विततिविकल्पितयातायातविचारविचक्षणोऽङ्गीकृततुरङ्गमागमप्रयोगपरिणतो धनुर्विद्यांभोरुहवनगहनविकासितविदग्धमरीचिमालीनिजनिर्म्मितगजदन्तकल्पनगमाल्पचेता विराजितसेतुबन्धनिबन्धनानन्दित विपश्चिन्मण्डलस्सकलनाटकविषयसन्धिसंध्यगादियोजनाचतुरोनिरुपमनिजरूपनिर्ज्जितमकरध्वजो मकरध्वजगुरुचरणसरोजविनमनपवित्रीकृतोत्तमांगो मुदुकुन्दूर्न्नामग्रामोपविष्टराष्ट्रकूटचाल्युक्यहैहयप्रमुखप्रवीरसनाथवल्लभसैन्यविजयविख्यापितप्रभांवः। अपि च ॥

धोराश्वीयंसमन्तात्प्रबलमुपगतव्याप्तदिक्क्रवाळं
निर्जित्यानेकसंख्यैर्न्निशितनिजभुजोन्मुक्तनाराचजालैः।
देवोयः प्राज्य तेजास्तिमिरमिव महत्तीव्रभानुर्मयूखै
र्दुर्व्वारोदारपातैरुदयमभिलषन्स्वन्निवेशं विवेश ॥ ८ ॥

स तु हरिरिव सततसंभावितद्विजपतिः सहस्त्रकिरणैवप्रतिदिवसोचितोदयो भुजंगलोक इव विगतभयो रत्नाकर इवास्पृष्टकळंको दुर्य्योधनोप्यभिनन्दितार्ज्जुनगुणो वाहिनीपतिरप्यजडाशयः शीतकरोऽप्यनालिङ्गितमलिनभावो राष्ट्रकूटपल्लवान्वयतिलकाभ्यांमूर्द्धाभिषिक्त गोविन्दराजनन्दिवर्म्माभिधेयाभ्यां समनुष्ठितराज्याभिषेकाभ्यां निजकरघटितपट्टविभूषितललाटपट्टो विख्यातविमलगंगान्वयनभस्थलगभस्तिमाली कोंगणिमहाराजाधिराजपरमेश्वरश्रीशिवमारदेवः तत्पुत्रो निजभुजनिहितनिशाता

तहेतिपातपातितारातिवर्गौवर्गत्रयोपार्ज्जितार्ज्जितोर्ज्जितयशास्सन्तानसन्तर्प्पितसमस्तजनहृदयःप्रभवत्कलिकालबलविवर्द्धितकलंकविलयनकल्याणचरितः स्ववंशविशदवियदंशुमालीसमस्तनीतिशास्त्रप्रयोगप्रवीणाग्रगण्यस्तुरंगमारोहणनैपुण्यप्रीणितक्षोणीपतिसुतसहस्रलब्धसाधुध्वनिरनेक संगररंगसंगमांगीकृतजयश्रीसमालिङ्गितभुजंगभोगाभभीमभुजदण्डः।

यस्मिंशासतिसत्यधाम्नि विमले राजन्वती मेदिनी
यस्मात्स्थैर्य्यमुपेत्य वृंहितबलो धर्म्मोऽधिकं जृंभते।
यस्यैवाभयदायितातिदयितादोश्शालिनश्शाश्वती
लक्ष्म्या यत्र यशोनिधौ पतिमतिर्ज्जाता जगद्वल्लभे ॥ ९ ॥

स तु पितामह इवानेकराजहंससेवितः पद्मावासश्च मधुमथन इव त्रिलोकाधिकविक्रमाक्षिप्तबलिरिपुरहीनस्थितिरतिश्च धूर्ज्जटिरिवावनीश्वरेश्वरभावो वीरंभद्रश्च कार्तिकेय इव सकलजगदुदीरितस्वामि शब्दश्शक्ति सम्पन्नश्च महामेरुरिवस्वमहिमाधः कृतमहीभृन्मण्डलोमहासत्वश्च। अपि च।

मन्वादिषोडशमहीशगुणानुरागो
यं प्राप्य विस्मृतिपदंजगतो जगाम।
यस्य प्रतापदहनोऽहितबुद्धिवार्द्धौ
वौर्ध्वायतेनरपतेरतिदूरतोऽपि ॥ १० ॥

यश्च समरशिरसिरामायते परकळत्रेच निजचरणसरसिजोपजीविनिजनेमित्रायते रिपुतिमिरनिचये च अनेकप्रकाररणरणकाद्दितान्तःकरणानां शरणायते संपदां च अतिप्रभूतमतिनिकेतमस्तति तिरस्कृते प्रद्योतायते

निखिलजगदनुल्लंघिताज्ञासंपत्तौ च सकल कुवलयलोचनानन्दकरतायां द्विजेशायते हरिवाहनविनिहितचित्तत्वे च। अपि च।

यस्यैकस्यापिसर्व्वंजगदपि सरुषो नाग्रतस्थातुमीष्टे
दित्सा साद्भूत बुद्धेरपि नवनिधयो यस्य नालंनृपस्य।
जिह्रेऽतीवाभिमानात्कपटविजयिनां यः श्रुतेकर्न्नधाम्नां
जज्ञेऽविज्ञातकीर्त्तिः सकलजनतानन्दनो मारसिंहः॥ ११॥

यश्च सततसंपादितकमलानन्दोऽप्यप्रचण्डकरः पुण्यजनसत्वसमेतोऽप्यनृशंसमानसः मत्तमातङ्गस्कन्धलाळितोऽप्यतिशुचिस्वभावः प्रियधनुरप्यमार्ग्गणः समनुष्ठितदण्डनीतिरप्यमन्दक्रमगतिः। अपि च।

धूसरी कुरुते यस्य चरणांभोजजंरजः।
प्रणतानन्तसामन्तचूडामणिमधुव्रजान्॥ १२॥

तेन लोकत्रिणेत्रापरनामधेयेन समधिगतयौराज्यपदेन भगवत्सहस्रकिरणचरणनळिनषट्चरणायमानमानसेन तस्मिंश्चप्रसादिताशेषसामन्तचक्रे अखण्डगंगमण्डलमनुशासति श्रीमारसिंहाभिधाने आसीत्समस्तसामन्तसेनाधिपतिः परमार्हतः परमधार्म्मिकः मन्त्रप्रभूत्साहशक्तिसम्पन्नः श्रीविजयोनाम यश्च सहस्रदीधितिरिवतिरोहिताखिलपरतेजः परतेजः प्रसरोऽपि असन्तापितभूतलः सुनासीर इव खण्डित सकल जनाज्ञोपि अगोत्रभेदनकरः गुह इव शक्तिसमुत्सारितारातिवर्ग्गोऽपि अकृतबालभावः शिशिरगभस्तिरिव प्रह्लादनोद्योतनसमर्थोऽपि अपंकमलगृहीतः विजितानन्दन इव अतिदूरदर्शनोऽपि अपिशिताशनः

शतक्रतुरिव बुधगुरुमित्रपरिवृतोऽपि परदाररंतिशप्तः झषकेतन इवस्व वशीकृतसकलजनोऽपि अप्रहृतबालाबलातपस्सीयश्च अमृतमयो भृत्यानां सुखमयो मित्राणां सुधामयो रामाणां उत्सवमयः प्रजानां विनयमयो गुरुणां नयखळद्वृत्तीनां अग्रणी रसिकानां स्त्रष्टकाव्यरचनानां उपदेष्टा नयानांद्रष्टा स्वामिकार्य्याणां विद्वष्टाकृतदोषाणां यष्टा महाघनानां परिमार्ष्टा पापानां प्रष्टानिर्म्माणहेतूनां परिकृष्टाश्रितागसां । अपि च ।

उदन्वानिव गाम्भीर्य्ये विवस्वानिवतेजसि ।
शशलक्ष्म्येव लावण्ये नभस्वानिवयोबळे ॥ १३ ॥
मनोभूरिवसारुप्ये मघवानिवसंपदि ।
सुरमन्त्रीवशास्त्रार्थे उशनेवचयोनये ॥ १४ ॥
ग्रामे पुरेनदीतीरे गिरौ द्वीपे सरोऽन्तिके ।
प्रावर्त्तयत्स्वकीर्त्याभाम् योऽनेकां वसतिं प्रभुः ॥ १५ ॥
स मान्यनगरे श्रीमान् श्रीविजयोऽकारयच्छुभम् ।
जिनेन्द्रभवनं तुंगं निर्म्मळं स्वमहस्समम् ॥ १६ ॥

तस्य च प्रसाधिताशेषसामन्तचक्रस्य श्रीमारसिंहस्याज्ञया श्रीविजयो महानुभावः किरुवेक्कूरुग्राममादाय मान्यपुरविनिर्म्मिताय भगवदर्ह दायतनाय अदादिति तस्य च आयग्रामस्य पूर्व्वस्यान्दिशि पूलितटाकः यावत्सीमा आग्नेय्यान्दिशि अश्वत्थदक्षिणपाषाणा यावत् एवमागत्य दक्षिणान्दिशं कुरुगोवतटाकस्याधस्तात्शिलाश्वत्थन्यग्रोधौ च एवमुप वृत्यनववधूक्षेत्रस्य दक्षिणपार्श्वे अश्वत्थस्याधस्तात् पाषाणः एवमुपळो

क्यनैत्याँदिशि कच्छवतटाकं तथा च पश्चिमस्यान्दिशि सिन्दिपाषाण क्षेत्रस्य पश्चिमोबृहदुपळः तथैवमागत्य किरुगोनतिग्रामसीम्नः पश्चिमो महोपळः उत्तरस्यान्दिशि कुट्टतटाकपर्य्यन्ता मर्यादा इति। अपि च॥

आसीददतोरणाचार्य्यः कोण्डकोन्दान्वयोद्भवः।
सचैदद्विषये धीमान् शाल्मलीग्राममाश्रितः॥ १७॥
निराकृततमोऽरातिः स्थापयन्सत्पथेजनान्।
स्वतेजोद्योतितक्षोणिः चण्डार्चिरिव यो बभौ॥ १८॥
तस्याभूत्पुष्पनन्दीति शिष्योविद्वान्गणाग्रणीः।
तच्छिश्यश्च प्रभाचन्द्रः तस्येवं वसतिः कृता॥ १९॥

अस्य दानस्य साक्षिणः षण्णवति सहस्रविषयप्रकृतयः। योऽस्यापहर्त्ता लोभान्मोहात्प्रमादेन वा स पञ्चभिर्म्महद्भिः पातकैः संयुक्तो भवति यो रक्षति स पुण्यभाग्भवति। अपि चात्र मनुगीताः श्लोकाः।

स्वदत्ताम्परदत्तां वा यो हरेत वसुन्धराम्।
षष्ठिं वर्षसहस्राणि विष्ठायां जायतेक्रिमिः॥ २०॥
स्वन्दातुं सुमहच्छक्यं दुःखमन्यस्यपालनम्
दानं वा पालनं वेति दानाच्छ्रेयोऽनुपालनम्॥ २१॥
बहुभिर्व्वसुधाभुक्ताराजभिस्सगरादिभिः।
यस्य यस्य यदा भूमिः तस्य तस्य तदाफलम्॥ २२॥
ब्रह्मस्वन्तु विषं घोरं न विषं विषमुच्यते।
विषमेकाकिनं हन्ति देवस्वं पुत्रपौत्रिकम्॥२३॥

सर्वकलाधारभूतचित्रकलाभिज्ञेयविश्वकर्माचार्यैणेदं शासनं लिखितं चतुष्कण्डुकव्रीहिवीजवापक्षेत्रं द्विकंण्डुककंगु क्षेत्रं तदपिदेवभोगमिति रक्षणीयम्

Summary

Victorious is the divine Padmanābha who is brilliant like the sky free from clouds.

There was the illustrious Koṅgaṇivarmmadharmmādhirāja in the Jāhnavēya-kula who belongd to the Kāṇvāyana-sagōtra. His son Mādhavamahādhirāja was an excellent administrator, a scholarly personality and the author of (a work called) *Dattakasūtravṛitti.* His son was the heroic Harivarma-mahādhirāja. His son Vishṇugōpa-mahādhirāja was devoted to the feet of Lord Nārāyaṇa and worshipped the Brāhmaṇas, teachers and gods. His son, a devotee of Śiva, was Mādhava-mahādhirāja. His son, the foremost among the learned men, and a sister's son of Kṛishṇavarma-mahādhirāja, was Koṅgaṇimahādhirāja, *alias* Avinīta. His son Durvinīta had slain many a heros in the battles at Andari, Ālattūr, Poruḷare, Peḷnagara, etc., and had authored a commentory (*ṭīkā*) on the fifteen *sarggas* of the *Kirātārjunīya.* His son was Mushkara whose feet were touched (with their heads) by the vanquished rulers. His son Śrīvikrama was well-versed in the fourteen lores (*chaturdaśa-vidyāsthāna*), especially in the theory and practice of the entire (*anavaśēsha*) science of Politics. His son, whose second name was Bhūvikrama, knew the essence of all the sciences. Moreover, (this) king Śrīvallabha by name vanquished the lord of the Pallavas in the battle at Veḷanda. His younger brother was Navakāma who was a friend of the learned and who was selected as her lord by Lakshmī herself. The grandson of this Koṅgaṇi-mahārāja, whose other name was Śivamāra, was Śrīpurusha, *alias* Pṛithivīkoṅgaṇi-mahārāja who was a great hero, devoted to Nārāyaṇa, who was called *Bhīmakōpa* as he showed his anger at the head of battles, and who was also called *Rājakēsarin* (a lion amongst kings). His son was Koṅgaṇi mahārājādhīrja Paramēśvara Śrī-Śivamāradēva, whose prowess became well-known by his conquest of the combined Vallabha army led by the Rāshṭrakūṭa, Chāḷukya and Haihaya heros, and who was crowned by the Rāshṭrakūṭa Gōvindarāja and the Pallava Nandivarmma. His son was Mārasiṁha, a great hero and a great supporter of morality,

When this Mārasiṁha was governing the whole of the Gaṅga-maṇḍala, there was the Commander-in-chief and the chief of all the feudatories (*samasta-sāmanta-sēnādhi-pati*) a staunch devotee of Arhat and a highly righteous person called Śrīvijaya, who was like the ocean in profundity, like the sun in lustre, like the moon in loveliness, like the *Vāyu* (the wind) in strength, like the cupid in beauty, like Indra in wealth, like Bṛihaspati in learning and like Uśana (Śukrāchārya) in polity.

He had built many Jaina temples (*vasati*) in villages and towns, on river banks and mountains and on islands and near tanks. He also built a lofty and bright Jaina temple in Mānyanagara. This Śrīvijaya, the great, by the order of Mārasiṁha, gave the village Kiruvekkūru to the Jaina temple constructed at Mānyapura. The boundaries of this revenue village (*āya-grāma*) are, the Pūli tank on the east; stones lying to the south of the Aśvattha tree on the south-east; the Aśivattha and Nygrōdha trees (grown) on stones below the Kurugōva tank and on returning (*upavṛitya*) stone below the Aśvattha tree to the south of a new bride (*nava-vadhū*) on the south; Kahchhava tank on the south-west; the big stone to the west of the stony field and another big stone to the west of the boundary of the village Kirugōnati on the west; and the Kuṭṭu tank on the north.

In the Kondakonda lineage there was Atōraṇāchārya who was a resident of the village Śālmalī and who guided the people in the proper path (of life). His disciple Pushpanandi was a scholar and leader of the *gaṇa* (branch order). His disciple was Prabhāchandra for whom the said temple was constructed.

[The intervening Kannaḍa prose writing records the grant of 18 *kaṇḍukas* of rice-fields and some garden land irrigated by different tanks, to the said Jaina temple referred to above, on Monday, the fifth day of the bright half of Āshāḍha with the (asterism) Uttarābhādrapada when 719 years of the Śaka era and three months had elapsed.]

The witnesses for the said gift were the subjects of the 96,000 *vishayas.*

[Here four of the usual verses attributed to Manu are quoted.]

This charter was written by Viśvakārmāchāryya, an expert in the art of painting.

The field sowable with four *kaṇḍukas* of paddy-seed and the field for *kaṅgu* of two *kaṇḍuka*-capacity – these are to be protected (in the same way) as *dēvā-bhōga* (land in the enjoyment of divinities).

* * *

No. 95

ANJANAVAT I PLATES OF GOVINDA III

Location	: Añjanavati[1], Chandur Taluk, Amravati District, Maharashtra
Date	: Śaka 722=800 A.D.
Script	: Early Nāgarī
Language	: Sanskrit
King	: Govinda III
Dynasty	: Rāshṭrakūṭa
Reference	: Mirashi, V.V., *EI*, XXIII, pp.8-18

Text

Metres: Vv.1, 18,20 *Anushṭubh* ; 2-4, 6, 7, 11, 15, 16 *Vasantatilakā* . 5 *Gīti ;* 8-10, 17 *Āryā.*; 12, 13 *Sragdharā;.* 14 *Upajāti.*; 19 *Indravajrā* ; 21 *Pushpitāgrā.*

ॐ। स वोव्याद्वेधसाधाम यन्नाभिकमलं कृतम्।
हरश्च यस्य कान्तेंदुकलया कमलंकृतम्॥ १॥
आसीद्द्विषत्तिमिरमुद्यतमंडलाग्रो
ध्वस्तिनयन्नभिमुखो रणशर्वरीषु।
भूपः शुचिर्विधुरिवाप्तदिगन्तकीर्त्ति
र्गोविन्दराज इति राजसु राजसिंहः॥ २॥
तस्यात्मजो जगति विश्रुतदीर्घप्रकीर्त्ति
रार्त्तार्त्तिहारिहरिविक्रमधामधा[रो]।
[भू]पस्त्रिविष्टपनृपानुकृतिः कृतज्ञः
श्रीकर्कराज इति गोत्रमणिर्बभूव॥ ३॥
तस्य प्रभिन्नकरटच्च्युतदानदन्ति

दन्तप्रहाररुचिरोल्लिखितांस पीठः ।
क्ष्मापः क्षितौ क्षपितशत्रुरभूत्तनूजः
सद्राष्ट्रकूटकनकाद्रिरिवेंद्रराजः ॥ ४ ॥
तस्योपार्जितमहसः तनयश्चतुरुदधिवलयमालिन्याः ।
भोक्ता भुवः शतक्रतुसदृशः श्रीदन्तिदुर्ग्गराजोभूत् ॥ ५ ॥
काञ्चीशकेरलनराधिपचोलपाण्ड्य
श्रीहर्षवज्रटविभेदविधानदक्षं ।
कर्ण्णाटकं बलमनन्तमजेयमन्यै
र्भृत्यैः कियद्भिरपि यः सहसा जिगाय ॥ ६ ॥
अभ्रूविभंगमगृहीतनिशातशस्त्र
मश्रान्तमप्रणिहताज्ञमपेतयत्नं ।
यो वल्लभं सपदि दण्डबलेन जित्वा
राजाधिराजपरमेश्वरतामवाप ॥ ७ ॥
तस्मिन्दिवं प्रयाते वल्लभराजे क्षतप्रजाबाधः ।
श्रीकक्कराजसूनुर्म्महीपतिः कृष्णराजोभूत् ॥ ८ ॥
शुभतुंगतुंगतुरगप्रवृद्धरेणूर्द्ध्वरुद्धरविकिरणं ।
ग्रीष्मेपि नभो निखिलं प्रावृट्कालायते स्पष्टं ॥ ९ ॥
दीनानाथप्रणयिषु यथेष्टचेष्टं समीहितमजस्त्रं ।
तत्क्षणमकालवर्षो वर्षति सर्व्वार्त्तिनिर्व्वपणं ॥ १० ॥
राहप्पमात्मभुजजात(ब)लावलेप

माजौ विजित्य निशितासिलताप्रहारैः ।
पालिध्वजावलिशुभामचिरेण यो हि
राजाधिराजपरमेश्वरतां ततान ॥ ११ ॥
क्रोधादुत्खातखड्गप्रसृतरुचिचयैर्भासमानं समंता
दाजावुद्वृत्तवैरिप्रकटगजघटाटोपसंक्षोभदक्षं ।
शौर्यं त्यक्त्वारिवर्ग्गो भयचकितवपुः क्वापि दृष्ट्वैव सद्यो
दर्प्पाध्मातारिचक्रक्षयकरमगमद्यस्य दोर्दण्डरूपं ॥ १२ ॥
येन श्वेतातपत्त्रप्रहतरविकरव्राततापात्सलीलं
जग्मेनासीरधूलीधवलितशिरसा वल्लभाख्यः सदाजौ ।
स श्रीगोविंदराजो जितजगदहितस्त्रैणवैधव्यहेतु
स्तस्यासीत् सूनुरेकक्षणरणदलितारातिमत्तेभकुंभः ॥ १३ ॥
तस्यानुजः श्रीध्रुवराजनामा महानुभावो विततप्रतापः ।
प्रसाधिताशेषनरेन्द्रचक्रः क्रमेण बालार्क्कवपुर्ब्बभूव ॥ १४ ॥
पार्थोपमः पृथुसमानगुणो गुणज्ञः ।
दुर्व्वारवैरिवनितातुलतापहेतु
र्ग्गोविंदराज इति सूनुरिनप्रतापः ॥ १५ ॥
यश्च प्रभुश्चतुरचारुरुदारकीर्त्ते
रासेदिवान्निरूपमस्य पितुः सकाशात् ।
सत्स्वप्येनेकतनयेषु गुणातिरेका
न्मूर्द्धाभिषिक्तनृपसम्मतमाशु राज्यं ॥ १६ ॥

तेनेदमनिलविद्युच्चंचलमवलोक्य जीवितमसारं ।
क्षितिदानपरमपुण्यः प्रवर्त्तितो ब्रह्मदायोयं ॥ १७ ॥

स च परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमद्धारावर्षदेवपादानुद्ध्यात
परमभट्टारकमहाराजाधिराजपरमेश्वरपृथ्वीवल्लभप्रभूतवर्षश्रीवल्लभनरेंद्रदेवः
कुशली ॥ सर्व्वानेव यथासंबध्यमानकान्राष्ट्रपतिविषयपतिग्रामकूटायुक्तक
नियुक्तकाधिकारिकमहत्तरादीन् समाज्ञापयत्यस्तु वः संविदितं तथा
मया मातापित्रोरात्मनश्चैहिकामुष्मिकपुण्ययशोभिवृद्धये वेयधनवास्तव्य
वसिष्ठसगोत्रबह्वृचसब्रह्मचारिमंत्रकगोव्वैकभट्टपुत्ररुद्दप्पदीक्षित । यथा तले
वाटकवास्तव्यदुर्ग्गप्पक्रमदूत्तगोत्रदेवदत्त । नारायण । मंगप्प । बोप्पण ।
ऐयनि । गंतियम्म । लव्वैय्य । कसमण । छठिकुमर । नारौंक । वादि ।
एवमाद्यष्टादशसंख्याभागविभक्तः महाजनस्य बलिचरुवैश्वदेवाग्निहोत्रा
तिथिपञ्चमहायज्ञक्रियोत्सर्प्पणार्थं श्रीमद्चलपुरविषयान्तर्ग्गतजणवंत्य
भिधानो ग्रामः यस्याघाटनानि पूर्व्वतो रंगलछ्छिय ग्रामः नदी मरिच
दक्षिणतः गोहसोद्वाग्रामः पश्चिमतः सल्लैमालग्रामस्तिमिसगिरिश्च
उत्तरतः कुरेग्रामः वटपुरं च एवमयं चतुराघाटनोपलक्षितः सोद्रंगः
सोपरिकरः सधान्यहिरण्यादेयः समस्तराजकीयानामहस्तप्रक्षेपणीय
आचन्द्रार्काण्णर्वक्षितिसरित्पर्वतसमकालीनः पुत्रपौत्रान्वयक्रमोपभोग्यो
भ्यन्तरसिद्ध्या शकनृपकालातीत संवत्सरशतेषु सप्तसु द्वाविंशत्यधिकेषु
मयूरखण्डी समावासितविजय स्कन्धावारावस्थितेन सूर्यग्रहणे तुलापुरुष
प्रदानपर्वण्युदकातिसर्ग्गेण प्रतिपादितो महाजनस्य । यतोस्योचितया

ब्रह्मदायस्थित्या कृषतः कर्षयतः भुंजतो भोजयतः प्रतिदिशतो वा न केनचिद्यासेधे प्रवर्तितव्यं । तथागामिभद्रनृपतिभिरस्मद्वंशैरन्यैर्व्वा सामान्यं भूमिदानफलमवेत्य विद्युल्लोलान्यनित्यैश्वर्याणि तृणाग्रलग्नजल बिंदुचंचलं च जीवितमाकलय्य स्वदायनिर्विशेषोयमस्मद्दायोनुमंतव्यः पालयितव्यश्च । यश्चाज्ञानतिमिरपटलावृतमतिराच्छिंद्यादाच्छिद्यमानं वानुमोदेत स पंचभिर्म्महा पातकैस्सोपपातकैश्च संयुक्तः स्यादित्युक्तं च भगवता वेदव्यासेन व्यासेन ॥

षष्टिं वर्षसहस्राणि स्वर्ग्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमंता च तान्येव नरके वसेत् ॥ १८ ॥

अग्नेरपत्यं प्रथमं सुवर्ण्णं
भूर्व्वैष्णवी सूर्यसुताश्च गावः ।
लोकत्त्रयं तेन भवेद्धि दत्तं
यः काञ्चनं गां च महीं च दद्यात् ॥ १९ ॥

बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं ॥ २० ॥

इति कमलदलाम्बुबिंदुलोलां
श्रियमनुचिंत्य मनुष्यजीवितं च ।
सकलमिदमशाश्वतं च बुद्ध्वा
न हि पुरुषैः परकीर्त्तयो विलोप्याः ॥ २१ ॥

लिखितं चैतन्मया परमेश्वराज्ञया श्रीमहादेव्यानुमतेन श्रीचाक्किराज दूतकं

सामन्तश्रीगीतबलाधिकृतसूनुना महासान्धिविग्रहाधिकृत श्रीकुक्कैकेनेति। देवदत्तस्य हारिद्रगोत्त्रं। मोग्गलगोत्त्रं अइयनेः। गंतियम्मस्य भारद्वाजगोत्रं । नारयणस्य कुतिमाषगोत्रं। वोप्पणस्य हारिद्रं गोत्त्रं। कसमनस्य का[श्य]पगोत्रं। नारौकस्य सीगुलि। छठिकुमरस्य वाजसनेय गोत्त्रं। दीक्षितस्य भागाः पंच देवदत्तस्य द्वौ भागौ शेषा एकादश। एवमष्टादश भागाः।

Summary

[All the 17 verses of this inscription, furnishing the genealogical account of the Rāshṭrakūṭa dynasty, from Gōvinda I upto Gōvinda III, are met with in the Paiṭhaṇ plates of Gōvinda III (No. 93 above)].

The charter was issued by *Paramabhaṭṭāraka Mahārājādhirāja Paramēśvara Prithvīvallabha Pabhūtavarsha Śri-Vallabhanarēndradēva* Gōvinda III, meditating on the feet of *Paramabhaṭṭāraka Mahārājādhirāja Paramēśvara* Śrī-maddhārāvarshadēva from his victorious capital at Mayūrakhaṇḍī[1] on the occasion of a *tulā-purusha* gift at the time of a solar eclipse in the expired Śaka year 722. The royal order was addressed to *Rāshṭrapati* and other officers concerned.

It records the grant of the village Aṁjaṇavaṁti[2] within the Achalapura[3]-vishaya to the following thirteen Brāhmaṇas:- (1) Ruddappa Dīkshita,son of Gōvvaika-bhaṭṭa of Vasishṭha-gōtra, who was a religious student of the Ṛigveda and a resident of Vēyaghana[4]; (2) Durgappa of Kāramaïtta-gōtra who was a resident of Talēvāṭaka[4]; (3) Dēvadatta of Hāridra-gōtra; (4) Nārāyaṇa of Kutimāsha-gōtra; (5) Maṅgappa; (6) Voppaṇa of Hāridra-gōtra; (7) Aiyani of Mōggala-gōtra; (8) Gantiyamma of Bhāradvāja - gōtra; (9) Lavvaiya; (10) Kasamaṇa of

Kāśyapa-gōtra; (11) Chhaṭikumara of Vājasanēya-gōtra; (12) Nāranka of Sīguli-gōtra and (13) Vādi. The revenue of the village was divided into eighteen (equal) shares of which the Dīkshita Ruddappa was given five, Devadatta two and the remaining eleven one each. This grant was made for the increase in the religious merit and glory, in this as well as the other world, of the parents of and the king Gōvinda III himself.

The donated village was bounded on the east by the village Raṅgalachhyi[5] and the river Mari, on the south by the village Gōhasōdvā[6], on the west by the village Sallaimāla[7] and the hill Timisa[8], and on the north by the village Kure[9] and Vaṭapura.[10]

This land-grant carried with it the usual privileges of *udraṅga*, *uparikara*, etc., and was freed from the interference by the royal officers.

[The usual appeal to protect the grant, warning against rescinding the same and four of the imprecatory verses follow here.]

The charter was written by Kukkaika, the minister in charge of peace and war (*mahāsāndhivigrahādhikṛita*), and the son of the military officer (*balādhikṛta*) *Sāmanta* Śrī-Gauta, by the order of the emperor and with the consent of the Great Queen (*Mahādēvī*)[11.] The *dūtaka* was the illustrious Chākkirāja.

Notes

1. Mayūrakhaṇḍi which was the Vijaya-skandhāvara, the capital, was Morkhaṇḍ, a hillfort in the Sātmāla or Ajanta range close to Saptasṛiṅgī, north of Vaṇī in the Nāsik district. (Mirashi, V.V., *EI*, XXIII, p.12)

2. Aṁjaṇāvaṁtī is a village which still remains its name unchanged. (*ibid.*, p.13)

3. Achalapura probably is Ellichpūr in Berar (*ibid.*)

4. Vēyaghana and Talavāṭaka are represented by Waigaon, 3 miles south and Talegaon about 10 miles south by west of Anjanavati (*ibid.*)

5. Raṅgalachhyi cannot be identified (*ibid.*)

6. Gōhasōdvā is Gahvā to the south of Añjanavatī. (*ibid.*)

7. Sallaimāla is now represented by two villages, Salora 2 ½ miles to the west of Añjanavatī and Amlā, which lies about 5 miles to the south west (*ibid.*)

8. Timisa may be the ancient name of the hill west of Añjanavatī and Mari that of a nali flowing nearby which has no particular name, now (*ibid.*)

9. Kurē is undoubtedly modern Kurhā. (*ibid.)*

10. Vaṭapura is Vaḍur, about a mile east of Kurhā (*ibid.*)

11. That Mahādēvī's name has not been given.

Φ Φ Φ Φ

No. 96

UDAYENDIRAM PLATES OF NANDIVARMMAN

Location : Udayēndiram Gudiyattam Taluk, North Arcot District, Tamilnadu.
Date : 8th century A.D.
Script : Southern
Language : Sanskrit
King : Nandivarmman
Dynasty : Pallava
Reference : Kielhorn, F, *EI*, III, pp.143-147.

Text

Metre: Vv. 1 and 2 *Anushṭubh*

स्वस्ति ॥ जितं भगवता राज्ञा ॥ श्रीविजयकाञ्चीपुरात् परमब्रह्मण्यस्य स्वबाहुबलार्ज्जितोर्ज्जित विधिविहित सर्व्वमर्यादस्य राज्ञः श्रीस्कन्द वर्म्मणः प्रपौत्रोभ्यर्च्चितशक्तिसिद्धिसम्पन्नस्य प्रतापोपनतराजमण्डलस्य वसुधातलैकवीरस्य महाराजश्रीसिङ्घवर्म्मणः पौत्रो देवद्विजगुरुवृद्धोप

चायिनो वृद्धविनयस्य सौगोहिरण्यभूम्यादिप्रदानैः प्रवृद्धधर्म्मसञ्चयस्य
प्रजापालनदक्षस्य सत्यात्मनो महाराजश्रीस्कन्दवर्म्मणः पुत्रो भगव
द्भक्तिसम्पादितसर्व्वकल्याणः प्रजासंरञ्जनपरिपालनोन्ययेपगत सतत
सत्त्रव्रतदीक्षितो नैकसमरसाहसावमर्द्दलब्धविजययशःप्रकाशः कलियुग
दोषावसन्नधर्मोद्धरणनित्यसन्नद्धो भगवत्पादानुध्यातो बप्पभट्टार
गोपादभक्तः परमभगवतो भारद्वाजसगोत्रः पल्लवानां धर्म्ममहाराजः श्री
नन्दिवमर्डियारराष्ट्रे काञ्चिवाल्ग्राम आरण्यक्षेत्रचतुष्टयञ्च पूर्वोपभुक्त
मर्यादया काञ्चिवायिल्वास्तव्याय ब्राह्मणाय कौशिकसगोत्राय तैत्तिरीय
चरणाय प्रवचनसूत्राय कुळचशर्म्मणे ब्रह्मदेय मर्यादया सर्व्वपरिहारोपेतं
देवभोगहलवर्ज्जम् अस्मदायुर्बलविजयैश्वर्याभिवृद्धये दत्तवान्॥ तदव
गम्य सर्व्वपरिहारैः काञ्चिवायिल्ग्रामारण्यक्षेत्रचतुष्टयञ्च परिहारैः पहारत
योस्मच्छासनम् अतिक्रमेत् स पापः शारीरं दण्डमर्हति अपिचात्र
ब्रह्मगीताः श्लोका भवन्ति

भूमिदानम्परंदानम्न भूतम्न भविष्यति ।
तस्यैव हरणात्पापं न भूतं न भविष्यति ॥ १ ॥
स्वदत्ताम्परदत्तां वा यो हरेत वसुन्धराम् ।
गवां शतसहस्रस्य हन्तुः पिवति किल्बिषमिति ॥ २ ॥

प्रवर्द्धमानविजयराज्यप्रथमसंवत्सरे वैशाखमासे शुक्लपक्षे पञ्चम्यां दत्ता
पट्टिका ॥

Summary

The inscription opens with invoking victory to Bhagavat (Vishṇu). It refers to the devout worshipper of

Vishṇu (*parama-bhāgavata*), the law-abiding *Mahārāja* of the Pallavas, the illustrious Nandivarmman of the Bhāradvāja-gōtra, who was the son of the *Mahārāja* Skandavarmman, the grandson of the *Mahārāja* Siṁhavarmman, and the great-grandson of *Rājā* Skandavarmman.

It informs that, from the victorious Kāñchīpura Nandivarmman gave the village of Kāñchivāyil and four pieces of forest-land, situated in the district (*rāshṭra*) of Aḍiyāra, to a Brāhmaṇa inhabitant of Kāñchivāyil, Kuḷaśarman by name, who belonged to the Kauśika-gōtra, Taittirīya-charaṇa and Pravachana-sūtra. This grant was freed from all taxes (*sarvaparihārōpēta*) and it excluded the land already granted to gods (*dēvabhōgahala varjjaṁ*)

[Then follow the usual admonition and two imprecatory verses]

It is further stated that this document (*paṭṭikā*) was issued on the fifth (lunar day) of the bright half of Vaiśākha in the first year of the victorious reign (of Nandivarmman).

❖ ❖ ❖ ❖

No. 97

RAGHOLI PLATES OF JAYAVARDHANA II

Location : Raghōli, Baihar Tahsil, Balaghat District, Madhya Pradesh.
Date : C. 8th century A.D.
Script : Early Nāgarī
Language : Sanskrit
King : Jayavardhana II
Dynasty : Śaila-vaṁśa
Reference : Hiralal, *EI.,* IX, pp.41-47

Text

Metres: Vv.1-3 *Śārdūlavikrīḍita*, .4 *Indravajrā*; 5, *Vasantatilakā*; 6-8, 10 *Anushṭubh*; 9 *Pushpitāgrā*

Seal : श्रीजयवर्द्धनदेवस्य ॐ स्वस्ति श्रीवर्द्धनपुरात् ॥

कैलासाचलतुङ्गश्रृङ्गविपुलद्रोणीजवंशप्रभुः
प्रख्यातोभुवि शैलवंशतिलकः श्रीवर्द्धनो यो नृपः ।
तत्पुत्रः पृथुवर्द्धनो निजभुजव्याकृष्टखड्गः पुरा
देशं गौर्जरमाससाद सहसा विक्रान्तिभिर्यस्ततः ॥ १ ॥

तद्वंशप्रभवो व्यजीजनदलं सौवर्द्धनो भूपति
भूँचक्रक्रमलब्धविक्रमयशः पुत्रत्रयं त्वौरसं ।
तेषामूर्ज्जितवैरिदारणपटुं पौण्ड्राधिपं क्षामापतिं
हत्वैको विषयं तमेव सकलं जग्राह शौर्यान्वितः ॥ २ ॥

ताभ्यामन्यतमो विहत्य सहसा दर्पोद्धतं दारुणं
काशिं काशिनराधिपं सितगुणो जग्राह जेता द्विषां ।
तत्पुत्रो जयवर्द्धनेति वचसा ख्यातो वरो भूभृतां

विन्ध्ये विन्ध्यनरेशमेव सुचिरं हत्वा चकार स्थितिं ॥ ३ ॥

मातङ्गदानक्षतदीनचेष्टः संवर्द्धितानेकविशालवंशः ।
विन्ध्येश्वरो विन्ध्य इवाचलश्रीः श्रीवर्द्धनस्तस्य सुतो बभूव ॥ ४ ॥

तस्यात्मजः सकलवैरिविनाशदक्षो
जातो महागुणनिधिर्ज्जयवर्द्धनाख्यः ।
लक्ष्मीप्रगाढपरिरंभणपीडिताङ्गं
दृष्ट्वा दिवं यमगमत्प्ररुषेव कीर्त्तिः ॥ ५ ॥

परममाहेश्वरो मातापितृपादानुध्यातः सकलविन्ध्याधिपतिः महाराजाधिराजपरमेश्वरश्रीजयवर्द्धनदेवः कुशली कटेरकविषयीयखद्दिकायां ब्राह्मणान् संपूज्य प्रतिवासिनोन्यांश्च कुटुम्बिनः। समाहर्तृसन्निधातृप्रमुखान् यथाकालाध्यासिनः सर्वराजपुरुषान् विषयपतींश्च समाज्ञापयति ॥ विदितमस्तु भवतां यथास्माभिरयं ग्रामः सनिधिः सोपनिधिः सर्व्वकरादानसमेतः प्रतिषिद्धचाटभटप्रवेशः सदशापराधः सर्व्वपीडाविवर्ज्जितः चट्टुल्लिहप्रतिष्ठितश्रीमदादित्यभट्टारकाय अधिष्टानविज्ञप्तिकया कार्त्तिक्यामुदकपूर्व्वमाचन्द्रार्क्कग्रहसमकालोपभोगार्थं मातापित्रोरात्मनश्च पुण्याभिवृद्धये ताम्रशासनेन प्रतिपादित इत्यवगत्य समुचितभोगभागादिकं भुक्त्वा सुखं वस्तव्यं ॥ तथा चोक्तं धर्म्मशास्त्रे ॥

वहुभिर्व्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं ॥ ६ ॥
षष्टिं वर्षसहस्राणि स्वर्ग्गे मोदति भूमिदः ।

आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥ ७॥

स्वदत्तां परदत्तां वा यो हरेत वसुन्धरां।

स विष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते॥ ८॥

इति कमलदलाम्बुबिन्दुलोलां

श्रियमनुचिन्त्य मनुष्यजीवितं च।

सकलमिदमुदाहृतं च बुद्ध्वा

न हि पुरुषैः परकीर्त्तयो विलोप्याः॥ ९॥

श्रीश्रीवर्द्धनदेवस्य पादपद्मोपजीविना।

श्रीमहाचण्डपालेन लिखितं शासनं शुभम्॥ १०॥

प्रवर्द्धमानविजयराज्ये संवत् ३ कार्त्तिके दिन ३०॥

Translation

Ōṁ | [wellbeing] From Śrīvarddhanapura.

Verse 1 There was king Śrī-Varddhana[1] the lord of the family of her who had born in Kailāsāchala and he had become the ornament of the Śaila-vaṁśa.[2] His son was Pṛithuvarddhana[3] who conquered the Gaurjara country by various attacks.

Verse 2 In his family there was Sauvarddhana and he had three sons, one of whom had killed the Pauṇḍra[4] king who was skilled in the rending up his powerful enemies, and took the whole of the country.

Verse 3 The third of these sons[5] was one who had pure character and he had killed the self-conceited, cruel king of the Kāśi. His son known by the name, Jayavardhana[6] (the best of kings) had killed the lord of Vindhya and took up his residence in the Vindhya for a long time.

Verse 4 His son was named as Śrī-Vardhana,[7] who became the lord of Vindhya and he banished the poverty by gifts of elephants and he augmented the prosperity of various (other) big families.

Verse 5 His son who was called Jayavardhana II[9] was skilled in killing all his enemies and had a treasury of virtues. He had so closely embraced the goddess of wealth that his glory became jealous, and ascended to the heavens.

Prose This *Mahārājadhirāja Paramēśvara* Jayavardhana-dēva was a worshipper of Mahēśvara and meditated on the feet of his parents. He was the lord of the whole Vindhyas. Being in good health he had worshipped the brāhmaṇas and for them gave the village named Khaddikā in the *vishaya* of Kaṭēraka[10] and issued the command to the inhabitants, and other house-holders, the revenue collectors, receivers of public property and so forth as appointted from time to time, and all state officers and other provincial governors.

Let it be known to you that this village is given by us along with hidden treasures and deposits, together with the right of all dues, with the prohibition of all *chāṭas* and *bhaṭas* to enter the village, with *daś-āparādha* (the fines from those who commit ten crimes) and free from all troubles, to the temple of the holy Āditya-bhaṭṭāraka (the Sun god) set up at Chaṭṭulliha[11], at the request of the residence (viz. Śrī-Vardhanapura) on the Kārttikī (*tithī*) with libation of water, to be enjoyed as long as the moon, Sun and the planets endure and for the increase of the religious merit of (my) parents and of ours by this copper-plate charter. Knowing this let all live happily enjoying their due portion of rights etc.

[As enjoined by Dharma-śāstras - four of the usual imprecatory verses][12]. This auspicious charter was written by the illustrious Mahāchaṇḍapāla[14] who subsided on the lotus feet of the illustrious Śrivarddhanadēva.

The year 3 of the augmenting and victorious reign, the 30th day of Kārttika.

Seal – Śri Jayavarddhana-dēvasya

Notes

1. Śrī Varddhana is firstly given in the dynasty that is in the Orissa country (*ibid.,* pp.42, 46).

2. Śailavaṁśa is probably identical with Śailōdbhavas (*EI,* IX, p.47)

3. Though originally he was the king of Gaṅga country he penetrated into the Gurjjara country (*ibid.* p.42).

4. In this family (i.e.) Sauvarddhana, one of his sons had killed he king of Paunddra (Bengal and Bihār) (*ibid.*, and *EI.*, IX, p.44)

5. One of Sauvarddhana's sons had killed the king of Kāśī (Benares) (*ibid.* and *EI,* IX, p.44).

6. That Sauvarddhan's son Jaya-varddhana's son Jayavarddhana had killed the king of Vindhyas \ (*ibid.*)

7. This Jayavarddhana's son Śrī-Vardhana became the lord of Vindhayas (*ibid.*, p.42.)

8. Śrī-varddhana has been named as above (*ibid.*)

9. That Śrī-Varddhana's son was Jayavarddhanadēva II (*EI,* IX, p.46).

10. Kaṭēraka is probably the present Katera near Katangi, 60 miles west of Ragholi (*ibid.*, pp.43 and 45)

11. Chaṭṭulliha is at the temple of Sun god within the village in Kaddikā in the Katēraka-vishaya (*EI,* IX, pp.43, 45, 47).

12. The imprecatory verses 5 in numbers are quoTed from Dharmaśāstra (*ibid.*, pp.45, 47).

13. Khaddidka is possibly the village of Khādi three miles north-east of Ragholi. (*ibid.*, pp.43, 47.)

14. Śri Mahāchaṇḍapāla was the writer (*ibid.*, pp.46,47).

* * *

No. 98

BALAGHAT PLATES OF PRITHIVISHENA

Location : Bālāghāt, Balaghat District, Madhya Pradesh.
Date : C. 8th century A.D.
Script : Box-headed variety of the southern script.
Language : Sanskrit
King : Prithivishēṇa II
Dynasty : Vākāṭaka
Reference : Kielhorn, F, *EI,* IX, pp.267-271.

Text

दृष्टम् वेम्बारवासकादग्निष्टोमाप्तोर्य्यामोक्थ्यषोडश्यतिरात्रवाजपेयबृहस्पतिसवसाद्यस्क्रचतुरश्वमेधयाजिनः विष्णुवृद्धसगोत्रस्य सम्राजः वाकाटकानाम्महाराजश्रीप्रवरसेनस्य सूनोस्सूनोः अत्यन्तस्वामिमहाभैरवभक्तस्य अंसभारसन्निवेशितशिवलिङ्गोद्वहनशिवसुपरितुष्टसमुत्पादितराजवंशानाम् पराक्रमाधिगतभागीरथ्यामलजलमूर्द्धाभिषिक्तानान्दशाश्वमेधावभृथस्नातानाम् भारशिवानाम् महाराजश्रीभवनागदौहित्रस्य गौतमिपुत्रस्य पुत्रस्य वाकाटकानाम् महाराजश्रीरुद्रसेनस्य सूनोः अत्यन्तमाहेश्वरस्य सत्यार्ज्जवकारुण्यशौर्य्यविक्रमनयविनयमाहात्म्यधीमत्वपात्रगतभक्तत्वधर्म्माविजयित्वमनोनैर्म्मल्यादिगुणसमुदितस्य वर्ष्षशतमभिवर्द्धमानकोशदण्डसाधनसन्तानपुत्रपौत्रिणः युधिष्ठिरवृत्तेर्व्वाकाटकानाम्महाराजश्रीपृथिविषेणस्य सूनोः भगवतश्चक्रपाणेः प्रसादोपार्ज्जितश्रीसमुदयस्य वाकाटकानाम्महाराजश्रीरुद्रसेनस्य सूनोः पूर्व्वराजानुवृत्तमार्ग्गानुसारिणः सुनयबलपराक्रमोच्छिन्नसर्व्वद्विषः महाराजाधिराज

श्रीदेवगुप्तसुतायाम्प्रभावतिगुप्तायामुत्पन्नस्य वाकाटक वंशालङ्कारभूतस्य शम्भोः प्रसादाधृतकार्त्तयुगस्य वाकाटकानाम्महाराजश्रीप्रवरसेनस्य सूनोः पूर्व्वाधिगतगुणविश्वासादपहृतवंशश्रियः कोसलमेकलमालवाधिपत्यभ्यर्च्चितशासनस्य प्रतापप्रणतारिशासनस्य वाकाटकानाम्महाराजश्रीनरेन्द्रसेनस्य सूनोः कुन्तलाधिपतिसुतायाम्महादेव्व्यामज्झितभट्टारिकायामुत्पन्नस्य तेजःक्षमासन्निधानभूतस्य निमग्नवंशस्योद्धर्त्तुः वाकाटकानाम्परमभागवतमहाराजश्रीपृथिविशेणस्य वचनात् अस्मत्सन्तकास्सर्व्वाध्यक्ष

Translation

[Dṛishṭam] From Vēmbāra-vāsaka .

There was Mahārāja śrī-Pravarasēna who had done many sacrifices. His son's son was *Mahārāja* Śrī-Rudrasēna, who was a devotee of Bhairava and who was the daughter's son of *Mahārāja* Bhavanāga of the Bhāraśiva family. His son was *Mahārāja* Pṛithivīshēṇa among the Vākāṭakas, who was like Yudhishṭhira (the eldest of Pāṇḍavas who was very pious), and who was a devotee of Mahēśvara. His son was *Mahārāja* śrī-Rudrasēna, who was also a Vākāṭaka and who was a devotee of Chakrapāṇī. His son was the Vākāṭaka *Mahārāja* Pravarasēna who was the son of Prabhāvati-guptā, who was herself the daughter of *Mahārājādhirāja* Dēvagupta, who was a devotee of Śambhu. His son was *Mahārāja* Narēndrasēna whose commands were honoured by the lords of Kōsala, Mēkala and Mālava. This Narēndra-sēna's son was *Mahārāja* Pṛithivīshēṇa, born of Ajjhita-bhaṭṭārikā who was the daughter of the king of Kuntala. [This inscription abruptly ends here where the royal order commences.]

No. 99

SPURIOUS ISLAMPUR PLATES OF THE KING VIJAYADITYA

Location : Islāmpur, Valve Taluk, Satara District, Maharashtra
Date : C. 8th century A.D.
Script : Southern
Language : Sanskrit
King : Vijayāditya
Dynasty : Western Gaṅga
Reference : Pathak, K.B. and Sten Konow, *EI*, XII, pp.48-55

Text

Metres: Vv.1, 3, 5, 6 *Sragdharā*; 2 *Vasantatilaka*; 4 *Śardālavilaridita*; 7 *Ārya*; 8,9 *Anushṭubh*

ॐ स्वस्ति जितं भगवता गतघनगगनाभेन पद्मनाभेन ॥ श्रीमज्जाह्नवेयकुलामलव्योमावभासनभास्करः स्वखड्गैकप्रहारखण्डितमहाशिलास्तम्भलब्धबलपराक्रमो दारुणारिगणविदारणोपलब्धव्रणविभूषणविभूषितः काण्वायनसगोत्रः श्रीमत्कोङ्गणिवर्म्मधर्म्ममहाधिराजः। तस्य पुत्रः पितुरन्वागतगुणयुक्तो विद्याविनयविहितवृत्तिः सम्यक्प्रजापालनमात्राधिगतराज्यप्रयोजनो विद्वत्कविकाञ्चननिकषोपलभूतो नीतिशास्त्रस्य वक्तृकुशलो दत्तसूत्रवृत्तिप्रणेता श्रीमन्माधवमहाधिराजः। तस्य पुत्रः पितृपैतामहगुणयुक्तोनेक चतुर्दन्तयुद्धावाप्तचतुरदधिसलिलास्वादितयशाः श्रीमद्धरिवर्म्ममहाधिराजः। तस्य पुत्रो द्विजगुरुदेवतापूजनपरो नारायणचरणानुध्यातः श्रीमद्विष्णुगोपमहाधिराजः। तस्य पुत्रः त्र्यम्बकचरणाम्भोरुहरजःपवित्रीकृतोत्तमाङ्गः स्वभुजबलपराक्रमक्रयक्रीतराज्यो

मुखमोष्टपिशिताशनप्रीतिकरनिशितधारासिः कलियुगबलपंकावसन्नधर्मवृषोद्धरणनित्यसन्नद्धः श्रीमन्माधवमहाधिराजः। तस्य पुत्रः श्रीमत्कदम्बकुलगगनभस्तिमालिनः श्रीमत्कृष्णवर्म्ममहाधिराजस्य प्रियभागिनेयो विजृम्भमाणशक्तित्रयसम्पन्नः सम्भ्रमावनतसमस्तसामन्तमण्डलो विद्याविनयातिशयपरिपूरितान्तरात्मा निरवग्रहप्रधानसौर्यो विद्वत्सुप्रथमगण्यः श्रीमत्कोंगणिमहाधिराजः अविनीतनामा॥ तस्य पुत्रः विजृम्भमाणशक्तित्रयः अन्दरि आलत्तूर् पोरुळरेपेळ्नगराद्यनेकसमरमुखमखहुतहतशूरपुरुषपशूपहारविघसविहस्तीकृतकृतान्ताग्निमुखः कीरतार्जुनीयपञ्चदशसर्ग्गटीकाकारः दुर्व्विनीतनामधेयः श्रीमत्कोङ्गणिवृद्धराजः॥ तस्य पुत्रः दुर्द्दान्तविमर्द्दमृदितविश्वम्भराधिप मौलिमालामकरन्दपुंजपिंजरीक्रियमाणचरणयुगलनळिनः श्रीमत्कोंगणिवृद्धराजा मुष्करद्वितीयनामधेयः। तदात्मजः उदितोदितसकलदिगन्तरप्रथितसिन्धुराजदुहितृजननीकः श्रीविक्रमप्रथितनामधेयः श्रीमत्कोंगणिमहाधिराजः चतुर्दशविद्यास्थानाधिगमविमलमतिः विशेषतोनवशेषस्य नीतिशास्त्रस्य वक्तृप्रयोक्तृकुशलो रिपुतिमिरनिकरनिराकरणोदयभास्करः प्रवरविदग्धमुग्धललनाजनैकरतिपञ्चबाणः॥ तस्य पुत्रः अनेकसमरसम्पातविजृम्भितद्विरदरदनकुलिशाभिघातव्रणसम्रूढभास्वद्विजयलक्षणलक्षीकृतविशालवक्षस्थलः शक्तित्रयसमन्वितः समधिगतसकलशास्त्रार्थतत्वः समाराधितत्रिवर्ग्गः निरवद्यचरितः प्रतिदिनमभिवर्द्धमानप्रभावः श्रीमत्कोङ्गणिमहाधिराजः भूविक्रमद्वितीयनामधेयः॥ अपि च॥

नानाहेतिप्रहारप्रविघटितभटोरःकवाटोत्थितासृ
ग्धारास्वादप्रमत्तद्विपशतचरणाक्षोदसम्मर्द्दभीमे ।
संग्रामे पल्लवेन्द्रन्नरपतिमजयद्यो वेळन्दाभिधाने
राजा श्रीवल्लभाख्यः समरशतजयावाप्तलक्ष्मीविलासः ॥ १ ॥

तस्यानुजो नतनरेन्द्रकिरीटकोटि
रत्नार्क्कदीधितिविराजितपादपद्मः ।
लक्ष्म्या स्वयंवृतपतिर्नवकामनामा
शिष्टप्रियोरिगणदारणगीतकीर्त्तिः ॥ २ ॥

लक्ष्मीं वक्षस्थलस्थां हरति मुररिपोः कीर्त्तिमाक्रष्टुमीष्टे
शुद्धाम् रामस्य वृत्तिं बुधजनमहितां मानवीं स्वीकरोति ।
निर्व्वाच्यो लोकधूर्त्तः परयुवतिहरो देवराजोपि नित्यं
चित्रं किं वात्र चित्रं फलमपरमतः किन्नु शिष्टप्रयत्नैः ॥ ३ ॥

तस्य कोङ्गणिमहाराजस्य शिवमारापरनामधेयस्य पौत्रस्समधिगतसकलकलापतत्त्वस्समवनत समस्तसामन्तमकुटतटघटितबहलरत्नविलसदमरधनुःखण्डमण्डितचरणनखमण्डलः सुरासुरवृन्दारकवन्द्यमाननारायणनिहितभक्तिः शूरपुरुषतुरगवरवारणघटासंघट्टदारुणसमरशिरसि दर्शितात्मकोपो भीमकोपः प्रकटरतिसमयसमनुवर्त्तनचतुरयुवतिजनलोकधूर्त्तो लोकधूर्त्तः सुदुर्द्धरानेकयुद्धमूर्द्धलब्धविजयसंपदहितगजघटाकेसरी राजकेसरी ॥ अपि च ॥

यो गंगान्वयनिर्म्मलाम्बरतलव्याभासनप्रोल्लस

न्मार्त्तन्डोरिभयङ्करः शुभकरः सन्मार्ग्गरक्षाकरः।
सौराज्यं समुपेत्य राजसमितौ राजन्गुणैरुत्तमै
राजा श्रीपुरुषश्चिरं विजयते राजन्य चूडामणिः॥ ४॥

कामो रामासु चापे दशरथतनयो विक्रमे जामदग्न्यः
प्राज्यैश्वर्य्ये बलारिर्ब्बहुमहसि रविश्चप्रभुत्वे धनेशः।
भूयो विख्यातशक्तिः स्फुटतरमखिलप्राणभाजां विधाता
धात्रा सृष्टः प्रजानाम्पतिरिति कवयो यं प्रशंसन्ति नित्यं॥ ५॥

तेन प्रबलविजृंभमाणपवनबलचलितविपुलवीचिनिचयचञ्चलसकलजलधिमेखलाविराजमानविश्वविश्वम्भराभारभरणशेषायमाणदोर्द्दण्डेन प्रतिदिनप्रवृत्तमहादानजनितपुण्याहघोषमुखरितमन्दिरोदरेण श्रीपुरुषप्रथमनामधेयेन पृथिवीकोंगणिमहाराजेन महात्मना प्रियवल्लभायां चलिक्यवंशोद्भवा विजयमहादेवी नामासीत्॥

तत्पुत्रो नित्यशक्तित्रययुतमहिमा सर्व्वशास्त्रप्रवीणो
हस्त्यश्वारोहणे तद्गतनुतचरितो लोकविख्यातकीर्त्तिः।
भोगी शूरोभिमानी सुविदितविभवो राजलक्ष्मीनिकेतः
शत्रुक्षत्रप्रमाथी स जयति विजयादित्यभूपोभिरामः॥ ६॥
चतुरुदधिमेखलालंकृतविश्वविश्वम्भराभारभरणसमर्त्थः॥ अपि च॥
कमलाभिरामतेजाः सुदानयुक्तस्सगौरवो जगति।
दिनकर इव सुरगज इव गिरिपति इव भाति निरवद्यः॥ ७॥

आसन्दिपुरवरे वसतिः प्रवर्द्धमानविजैश्वर्य्य त्रिंशत्तु हारीतुगोत्राय

तैत्तिरीयच्चरणवेथ्वुलुवास्तव्याय धर्म्मशर्म्मणः पुत्रो नागशर्म्मा तस्य पुत्रः सर्व्वगुणसम्पन्नः स्वामिभक्तः नृपतन्त्रभारभरणसमर्त्थः सोमशर्म्मा युद्धकारणिगद्वितीयनामधेयः तस्मै सत्प्रसादांट्दुवतटाकस्योत्तरशृङ्गस्याधस्ताद्बृहच्छिलोत्तरपश्चिमे टुकव्रीहिक्षेत्रं तत्तटाकस्यैव दक्षिणशृंगाधस्तात् षट्कण्डुकावापं व्रीहिक्षेत्रं ॥ . . टृञ्च गृहञ्च उदकपूर्व्वं दत्तं ॥

स्वदत्तां परदत्तां वा यो हरेत वसुन्धरां ।
षष्टिवर्षसहस्राणि विष्टायां जायते कृमिः ॥ ८ ॥
बहुभिर्व्वसुधा भुक्ता राजभिस्सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं ॥ ९ ॥

ओं श्रीशंकरकृतं सर्व्वपरिहारं लभते ओं

Summary

[The text of this inscription upto the middle of line 44, ending with the fifth verse extolling Śrīpususha (*Kāmē rāmāsui . . . . . . praśasanti nityam)* is the same as the corresponding text portion of the Maṇṇe plates of Mārasiṁha, Śaka 719 (No.94 above) with slight variations here and there with regard to the epithets of different rulers.]

Mahārāja Pṛithivīkoṅgaṇi, whose first name was Śrīpurusha, begot a son with his dear wife Vijayamahādēvī of the Chalikya family. His (this) son Vijayāditya was ever endowed with the three constituents of power (*nitya-sakti-traya-yuta-mahimā*), an adept in all *śāstras* and well-known in the world.

And he dwelling in the excellent town of Āsandi, in the thirteenth year of the increasing victorious rule, granted the *ṭuka* rice-field to the north-west of the big slab below

the northern corner of the tank near Satprasāda, and a rice-field of six *kaṇḍuka* sowing capacity, below the southern corner of that tank and a house, with libations of water to Sōmaśarman *alias* Yuddhakāraṇiga, the son of Nāga-śarman and the grandson of Dharmaśarman. The donee belonged to the Hāritu (Hāritī) *gōtra* and the Taittirīya *charaṇa* who was endowed with all virtues, who was devoted (his) master and was qualified to shoulder the responsibility of the royal administration. [Here follow two of the customary imprecatory verses.]

Ōṁ. He takes all the exemption made by the illustrious Śaṁkara.

* * * *

No. 100

NEULPUR GRANT OF SUBHAKARA

Location	: Neulpur, Cuttack District, Orissa
Date	: C. 800 A.D.
Script	: Siddhamātṛikā (Early Nāgarī)
Language	: Sanskrit
King	: Śubhākara
Dynasty	: Bhauma-karas
Reference	: Banerji, R.D., *EI.*, XV, pp.1-8

Text

Metres: Vv. 1-4 *Anushṭubh*

ओं स्वस्ति। जयस्कन्धावारात् शुभदेवपाटकात्। अभूद्भूपतिर्भौमान्वया वाप्तजन्मा शरदमलशशधरकरनिकरयशोराशिधवलितादिगाननः प्रताप दहनदग्धारातीन्धनः स्वधर्म्मारोपितवर्ण्णाश्रमः परमोपासको नृग ताफनामा श्रीक्षेमङ्करदेवः। श्रीभरसहशब्दगीतमहिमा कारणानुरूपः

कायजन्मतोऽपि तथाविध एव तदात्मजः परमताथागतो नरपतिः श्रीशिवकरदेवनामा। ततोऽपि लब्धप्रसवः प्रशमितानुचिताधिपत्याभिलाशिदुर्वृत्तदायादजनाधीयमानजगदुपप्लवः गुणविनयनिधिः प्रजापालनतत्परः परमसौगतो मातापितृपादानुध्याता महाराजश्रीशुभाकरदेवः कुशली। उत्तरतोसल्यां। वर्त्तमानभविष्यन्महासामन्तमहाराजराजपुत्रान्तरङ्गकुमार्यौपरिकविषयपतितदायुक्तकदाण्डपाशिकस्थानान्तरिकानन्यानपि राजपादोपजीविनश्चाटभटवल्लभजातीयान्पाञ्चालवुभ्युदयविषययोः। महामहत्तरबृहद्द्रोगिकपुस्तपालाद्यधिकरणं यथार्हम्मानयति समाज्ञापयति बोधयति च विदितमस्तु भवतामेतद्विषयद्वयसम्बद्धपर्व्वतद्रोणीकोम्पराकग्रामदण्डाङ्कियोकग्रामौ सोपरिकरौ सोद्देशौ सर्व्वपीडावर्जितावैकीकृत्य सलोणपुराधिवास इति नामधेयङ्कृत्वा मातापित्रोरात्मनः सर्वसत्वानाञ्चाचान्द्रार्कक्षितिसमकालं पुण्याभिवृद्धये नानागोत्रश्चरणेभ्यश्चातुर्विंद्यब्राह्मणेभ्यो यथानुक्रमेण बह्वृचभट्टकेशवदेव। भट्टपुरुषोत्तम। वाङ्मनस्वामि। संपूर्ण्णस्वामि। गोष्ठदेवस्वामि। भट्टरविकरदेव। भट्टचतुर्थदसायकरदेव। भट्टचतुर्थदोद्द्योतकरदेव। भट्टप्रभाकर। भट्टभास्कर। भट्टहरिदेव। भट्टवासुदेव। भट्टशतदमन। पुरुषोत्तमस्वामि। प्रद्योतस्वामि। महाबलस्वामि। नरसिंहस्वामि। त्रिविक्रमचन्द्रस्वामि। पशुपालस्वामि। पद्मनाभस्वामि। गोवर्द्धनस्वामि। श्रीधरस्वामि। मधुदीक्षित। ऋषभस्वामि। अग्निहोत्रिचन्द्रदेव। अग्निहोत्रिश्रीधर। भट्टपरितोष। भवदेवस्वामि। वासुदेवस्वामि। उत्पलस्वामि। भट्टजीवा

त्मन। भट्टवरदेव। भट्टकामदेव। केशवस्वामि। महादेवस्वामि। गोष्ठभूतिस्वामि। प्रभाकरस्वामि। गोवर्द्धनस्वामि। शशिचन्द्रस्वामि। भट्टश्रीधरभूति। भट्टलोकभूति। छात्त्रविष्णुस्वामि। . . मीदेवस्वामि। साङ्गस्वामि। शम्भुस्वामि। त्रिविक्रमस्वामि। भट्टनरकदेव। दूर्वस्वामि। माधवस्वामि। वामनस्वामि। ऊर्ण्णास्वामि। एवं वाजसनेयि श्रीभट्टशर्वनाग। भट्टविष्णुवर्द्धन। शान्तिवर्द्धन। स्थिरवर्द्धन। वृषभवर्द्धन। शुबलक्षण। हरिघोष। भट्टशक्रदत्त। प्रमोदस्वामि। पुरन्दरस्वामि। दामोदरस्वामि। नरदत्तस्वामि। हर्षदत्तस्वामि। वत्सदत्तस्वामि। भट्टदिवाकर। भट्टदिनकर। भट्टदेवकुण्ड। हरिकुण्ड। देउक्कास्वामि। गोमि चन्द्रस्वामि। वसुभद्रस्वामि। ऋशिकेशस्वामि। जनार्द्दनस्वामि। वेदशर्म्मस्वामि। श्रीधरस्वामि। पुरुषोत्तमस्वामि। भट्टयज्ञस्वामि। दडिस्वामि। भट्टोदयकुण्ड। वट्टुदामोदर। शुभाकरस्वामि। भट्टपुरुषोत्तम। एड्डुस्वामि। पृथिवीस्वामि। स्थिरस्वामि। ध्रुवदेवस्वामि। छात्रनारायणस्वामि। कुमारभूतिस्वामि। भट्टगोविन्द। गोष्ठदेवस्वामि। दूर्वाकूटस्वामि। ऋषिनागस्वामि। भट्टमनोरथ। गाडस्वामि। स्थावरस्वामि। भट्टसुदर्शन। भट्टगाडदेव। स्थिरदेवस्वामि। ब्रह्मस्वामि। एवं छान्दसभट्टापरदेव। रुद्रदेवस्वामि। महादेवस्वामि। अग्निहोत्रिमाधवस्वामि। दद्दास्वामि। भण्डस्वामि। शितिकण्ठस्वामि। वनमालस्वामि। केशवस्वामि। सन्कस्वामि। क्षीरोदस्वामि। ऋषिस्वामि। मन्दरदेवस्वामि। मधुसूदनस्वामि। हरदेवस्वामि। श्रीधरस्वामि। भट्टमहादेव। भट्ट

त्रिभुवन। भट्टजनार्द्दन। भट्टभवदेव। णण्णाकोणास्वामि। भट्टकाह्लदेव। भट्टगोविन्ददेव। शोभनदेव। वोवास्वामि। द्वितीय वोवास्वामि। वेल्लु स्वामि। चच्चास्वामि। उत्पलदेवस्वामि। कूर्मस्वामि। वृषभस्वामि। ध्रुवदेवस्वामि। गुहदेवस्वामि। एड्डुस्वामि। माधवदेवस्वामि। गोविन्द देवस्वामि। काह्लस्वामि। बलभद्रस्वामि। ऋषभस्वामि। ऋषिकेश स्वामि। धूलावृतस्वामि। एड्डुधरस्वामि। भास्करस्वामि। गोरक्षित स्वामि। पद्दुमस्वामि। दामुस्वामि। ऋषिस्वामि। दूर्व्वस्वामि। शङ्कर भूतिस्वामि। छात्रवासुदेवस्वामि। अग्निहोत्रिभय्यास्वामि। एवं आथर्व्व भट्टपुरोहितभवदेव। भट्टदद्दो अग्गुंण्डास्वामि। भट्टदद्दास्वामि। दामोदर स्वामि। नारायणस्वामि। वल्लभस्वामि। बलभद्रस्वामि। पद्मनाभ स्वामि। वुद्धुस्वामि। धाजिस्वामि। इन्द्रशर्मस्वामि। हन्सदेवस्वामि। भावस्वामि। पुष्यस्वामि। भूमिदेवस्वामि। मेरुदेवस्वामि। भवदेव स्वामि। अपरबलभद्रस्वामि। अपरभवदेवस्वामि। घडिस्वामि। गोविन्दस्वामि। सोमस्वामि। वर्प्पटस्वामि। गयाधरस्वामि। हलधरस्वामि। मालाधरस्वामि। केशवबिम्बस्वामि। महीधरस्वामि। ओवास्वामि। भवस्वामि। शीतलस्वामि। चन्द्रस्वामि। दामोदर स्वामि। मेरुस्वामि। भाडस्वामि। सागरस्वामि। आढकदद्दास्वामि। ध्रुवस्वामि। कक्कास्वामि। मधुसूदन स्वामि। अवदितदद्दास्वामि। अपरशीतलस्वामि। भट्टपुत्रमधुसूदन। भट्टपुत्रशिवदेव। हण्डिकापति पुष्यस्वामि। आपस्वामि। पृथिवीस्वामि। जीवानन्दस्वामि। वरुण

स्वामि। ऋषिस्वामिभ्यः एकत्र ब्राह्मणशतद्वयाय ताम्रपट्टेनाकरत्वेना स्माभिः प्रतिपादितो। तदशेषप्रदत्तिधर्म्मगौरवात् भवद्भिः परिपालनी येति। संवत् ८ मार्ग्ग वदि २० ३। उक्तञ्च धर्म्मशास्त्रे

बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं॥ १॥
मा भूदफलशङ्का वः परदत्तेति पार्थिवाः।
स्वदानात्फलमानन्त्यं परदत्तानुपालने॥ २॥
षष्टिंम्वर्षसहस्राणि स्वर्गे मोदति भूमिदः।
आक्षेप्ता चानुमन्ता च तान्येवनरके वसेत्॥ ३॥
बहुनात्र किमुक्तेन संक्षेपादिदमुच्यते।
स्वल्पमायुश्चला भोगा धर्म्मो लोकद्वयेक्षयः॥ ४॥

दूतकोत्र महाक्षपटलाधिकरणाधिकृतसमुद्रदत्तः। लिखितं महाक्षपटलि कभोगिकब्रह्मदत्तेन। तापितं पेट्टपालनारायणेन। उत्कीर्ण्णं तट्ठकार एडदत्तेन॥

Translation

A symbol

Oṁ | well-being [||*] From the victorious camp of Śubhadēva-pāṭaka, Śrī-Kshēmankaradēva, who had the name Nṛigatāpha who was a *paramōpāsaka*, who had established the *varṇṇ-āśrama-dharmma*, who had the fire of valour to burn the feet in the form of enemies, who whitened cardinal points with his fame, which was like pure autumn moon-rays, and who had a birth in the race of Naraka (Bhauma). His son was the king, with the name of Śivakara-dēva, who was a devout worshipper of

Buddha, whose greatness was celebrated by the title, Śrī-bhara-saha (meaning "capable of bearing the weight of Śrī-(Lakshmī)" and who was verily such on account of his birth with a bọdy suitable as a cause thereof. From him was born the Mahārāja, the illustrious Śubhākara-dēva, again a devout worshipper of Buddha, who also meditated on the feet of his parents, who had the protection of the subjects as his highest aim and was the mine of good conduct (and good qualities) who had pacified the affliction of the world caused by the doings of his kinsmen, who were desirous of undue influence or power. He, being in good health and honours, informs and orders the present and future *Mahāsāmantas*, *Mahārājas* etc. in northern Tōsali and the *Mahāmahattara*, *Bṛihadbhōgikas*, *Pustapālas* and officers in the *vishayas* of Pañchāla, Vubhyudaya – "Let it be known to you that the villages of *parvvata-drōṇī*-Kōmparāka and Daṇḍāṅkiyōka, situated in these two *vishayas* with *uparikara*, *uddēśa*, minus all oppressions, having been combined and named Salōṇa-purādhivāsa have been granted by us by this copper-plate free from taxes (*akaratvēna*) for the increase of the merits of our own self as well as that of our parents and all created beings as long as the Sun, moon and earth will last, to Brāhmaṇas of various *gōtras* and *charaṇas*, well-versed in the four Vēdas in the following order :- of the Ṛigvēda-bhaṭṭa-Kēśavadēva . . . ; and of the Yajur-vēda (*Vāja-sanēya*) . . ; and of the Sāmavēda (*Chhāndasa*) . . . ; and of the Atharvavēda . . . in all two hundred Brāhmaṇas

The year 8, the 23rd day of the dark half of Mārgga (Agrahāyana).

This donation is, out of respect for religion, to be preserved by you. It is in the Dharmaśāstras (four of the usual verses).

The *dūtaka* in this was *Mahākshapaṭalādhikaraṇādhikṛita* Samudradatta. It was written by the *Mahākshapaṭa-*

lika-bhōgika - Brahmadatta; heated by the *Pēṭṭapāla* Nārāyaṇa; incised by the *Taṭṭhakāra* Ēḍadtta.

Seal : On the upper part bears the figure of couchant bull and on the lower part there is a legend which is illegible but could be read as "*Śri-Śubhakaradēvasya*".

Alphabetical list of donors

A

Āḍhakadaddā-svāmin
Āpa-svāmin
Aparadēva-bhaṭṭa
Arggunḍā-svāmin

B

Bhāḍa-svāmin
Bhanḍa-svāmin
Bhāskakrā-Bhaṭṭa
Bhāskarā-svāmin
Bhava-svāmin
Bhāva-svāmin
Bhavadēva-Bhaṭṭa
Bhavadēva-Purōhita, Bhaṭṭa
Bhavadēva-svāmin (2)
Bhayyā-svāmin, Agnihōtri
Bhūmidēva-svāmin

C

Chachchā-svāmin
Chandra-svāmin
Chandradēva, Agnihōtri

D

Daddā-svāmin
Daddā-svāmin, Avadita
Daddā-svāmin, Bhaṭṭa
Daddō-Bhaṭṭa
Daḍi-svāmin

Dāmōdara-svāmin (3)
Dāmōdara, vaṭu
Dāmu-svāmin
Dēükkā-svāmin
Dēvakuṇḍa-Bhaṭṭa
Dhā̃ni-svāmin
Dhruva-svāmin
Dhruva-dēva-svāmin
Dhūlāvṛita-svāmin
Dinakara, Bhaṭṭa
Dūrvva-svāmin (2)
Dūrvvākūṭa-svāmin

E

Ēḍu-svāmin
Eḍudhara-svāmin

G

Gāḍa-svāmin
Gaḍadēva, Bhaṭṭa
Gayādhara-svāmin
Ghaḍi-svāmin
Gōmichandra-svāmin
Gōrakshita-svāmin
Gōshṭhabhūti-svāmin
Goshṭhadēva-svāmin (2)
Gōvarddhana-svāmin
Gōvinda, Bhaṭṭa
Gōvinda-svāmin
Gōvindadēva, Bhaṭṭa
Govindadēva-svāmin
Guhadēva-svāmin

H

Haladhara-svāmin
Hansadēva-svāmin
Haradēva-svāmin

Haridēva, Bhaṭṭa
Harighōsha
Harikuṇḍa
Harshadatta-svāmin

I

Indraśarma-svāmin

J

Janārddana-Bhaṭṭa
Janārddana-svāmin
Jīvamanda-svāmin
Jīvātmana, Bhaṭṭa

K

Kāhṇa-svāmin
Kāhṇadēva, Bhaṭṭa
Kakkā-svāmin
Kāmadēva, Bhaṭṭa
Kēśava-svāmin (2)
Kēśavadēva, Bhaṭṭa
Kēśavavimva-svāmin
Kshīrōda-svāmin
Kumārabhūti-svāmin
Kūrmma-svāmin

L

Lōkabhūti, Bhaṭṭa

M

Mādhava-svāmin
Mādhava-svāmin, Agnihōtri
Mādhavadēva-svāmin
Madhu-dīkshita
Madhusūdana-svāmin (2)
Madhusūdana, Bhaṭṭa-puṭṭra
Mahādēva, Bhaṭṭa
Mahādēva-svāmin (2)

Mahāya(ba)ḷa-svāmin
Mahīdhara-svāmin
Mālādhara-svāmin
Mandaradēva-svāmin
Manōratha, Bhaṭṭa
Mēru-svāmin
Mērudēva-svāmin

N

Naṇṇākōṇā-svāmin
Naradatta-svāmin
Narakadēva, Bhaṭṭa
Narsiṁha-svāmin
Nārāyaṇa-svāmin
Nārāyaṇa-svāmin, Chhātra

P

Padmanābha-svāmin (2)
Paduma-svāmin
Paritōsha, Bhaṭṭa
Paśupāla-svāmin
Prabhākara, Bhaṭṭa
Prabhākara-svāmin
Pradyōta-svāmin
Pramōda-svāmin
Pṛithivī-svāmin (2)
Purandara-svāmin
Purushōttama, Bhaṭṭa (2)
Purushōttama-svāmin (2)
Pūrvvadēva-svāmin
Pushya-svāmin
Pushya-svāmin, Haṇḍikāpati

R

Rvikaradēva, Bhaṭṭa
Ṛishabha-svāmin (2)
Ṛishi-svāmin (3)

Ṛishikēśa-svāmin (2)
Ṛishiṇāga-svāmin
Rudradēva, svāmin

S

Sāgara-svāmin
Śakradatta, Bhaṭṭa
Śambhu-svāmin
Sampūrṇṇa-svāmin
Sāṅga-svāmin
Saṅka-svāmin
Śaṅkara-svāmin
Śaṅkarabhūti-svāmin
Śāntivarddhana
Śaśichandra-svāmin
Śarvaṇāga, Śrībhaṭṭa
Śatadamana, Bhaṭṭa
Sāyakeradēva, Bhaṭṭa
Śītala-svāmin (2)
Śitikaṇṭha-svāmin
Śivadēva, Bhaṭṭa-putra
Śōbhanadēva
Sōma-svāmin
Śrīdhara, Agnihōtri
Śrīdhara-svāmin (3)
Śrīdharabhūti, Bhaṭṭta
Sthāvara-svāmin
Sthira-svāmin
Sthiradēva-svāmin
Sthiravarddhana
Śubhākara-svāmin
Śubhalakshaṇa
Sudarśana, Bhaṭṭa

T

Tribhuvana, Bhaṭṭa
Trivikrama-svāmin

Trivikramachandra-svāmin

U

Udayakuṇḍa-Bhaṭṭa
Udyōtakara-dēva
Ūrṇṇā-svāmin
Utpala-svāmin
Utpaladēva-svāmin

V

Va(ba)labhadra-svāmin
Vallabha-svāmin
Vāmana-svāmin
Vanamāla-svāmin
Vaṅmāna-svāmin
Varadēva-Bhaṭṭa
Varppaṭa-svāmin
Varuṇa-svāmin
Vasubhadra-svāmin
Vāsudēva, Bhaṭṭa
Vāsudēva-svāmin
Vasudēva-svāmin, Chhāttra
Vatsadatta-svāmin
Vēdaśarma-svāmin
Vēllu-svāmin
Vishṇu-svāmin, Chhāttra
Vishṇuvarddhana, Bhaṭṭa
Vōvā-svāmin (3)
Vra(Bra)hma-svāmin
Vṛishabhavarddhana
Vuddhu-svāmin

Y

Yajña-svāmin, Bhaṭṭta

No. 101

VISHAMAGIRI PLATES OF INDRAVARMADEVA

Location	: Vishamagiri, Aska taluk, Ganjam District, Orissa
Date	: C. 8th or 9th century
Script	: Proto Nāgarī
Language	: Sanskrit
King	: Indravarmadēva
Dynasty	: Eastern Gaṅga
Reference	: Rath, Tarini Charan, *EI*, XIX, pp.134-137

Text

Metres : Vv. 1-3 *Anushṭubh*; 4 *Pushpitāgrā*

षओं स्वस्ति। श्वेतकाधिष्ठानात्। भगवतश्चराचरगुरोः शकलशशाङ्कशेखरधरस्य स्थित्युत्पत्तिप्रलयकारणहेतोम्र्म्महेन्द्राचलशिखरनिवासिश्रीमतो गोकर्ण्णेश्वरभट्टारकस्य चरणकमलाराधनावाप्तपुण्यनिचयः शक्तित्रयप्रकर्षानुरञ्जिताशेषसामन्तचक्रः स्वभुजबलपराक्रान्तसकलकलिङ्गाधिराज्यो परममाहेश्वरो मातापितृपादानुध्यातो महाराजश्रीन्द्रवम्र्मदेवः कुशली॥ जलम्वोरविषये। यथाकालाद्ध्यासिमहासामन्तश्रीसामन्तराजानकराजपुत्रकुमारामात्योपरिकदण्डनायकविषयपतिग्रामपतिब्राह्मपुरोगमानन्यांश्च चाटभटदण्डपाशिकवल्लभजातीयान्। यथार्हं मानयति बोधयति च समादिशति। विदितमस्तु भवतां। एतद्विषयसम्बद्ध। अमेरशिङ्ग्रामे भूमिः। पूर्वीदिशि। पुष्करिण्याः पश्चिमपालिपरिच्छेदः। नदीम् यावत्पश्चिमप्रदेशे वृद्धभोगिकस्य भोगपाटकपरिच्छेदः। उत्तरप्रदेशेभीष्ठपरिच्छेदः। दक्षिणदिशायां नदी परिच्छेदः नदीलोंपाण्यर्धभोगः।

वाजसनेयच्चरणाय काण्वशाखाय जातुकर्ण्णगोत्राय। वसिष्ठाट्टवत्जातुकर्ण्णौंति प्रवराय जातुकर्ण्णवत् जीवद्विजेष्ठवदनुप्रवराय बहृट्टपुत्रजक्शस्वामिशर्म्मणे। मातापित्रोरात्मनश्च पुण्याभिवृद्धये सलिलधारापुरस्सरेणा चन्द्रार्क्कक्षितिसमकालमकरीकृत्य प्रतिपादितोस्माभिः यतः। शासनदर्शनाद्धर्म्मगौरवादस्मद्गौरवाच्च न केनचित्परिपन्थिना भवितव्यं। तथा च पठ्यते धर्म्मशास्त्रे।

बहुभिर्वसुधा दत्ता राजभिस्सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं॥ १॥
स्वदत्तां परदत्तां वा यो हरेत वसुन्धरां।
श्वविष्ठायां कृमिर्भूत्वा पितृभिस्सह पच्यते॥ २॥
माभूदफलशङ्का वः परदत्तेति पार्थिवाः।
स्वदानात्फलमानन्त्यं परदत्तानुपालने॥ ३॥
इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितञ्च।
सकलमिदमुदाहृतञ्च बुध्वा नहि पुरुषैः परकीर्तयो विलोप्याः॥ ४॥

दूतकोत्र महासामन्तश्रीनागखेद्दि। महाप्रतिहारादित्यवर्म्मणा लिखितं। लाञ्छितञ्च महासान्धिविग्रहिकचन्दपाकेन। उत्कीर्ण्णं कंसारक देवपिलेनेति।

Summary

Ōm[1] [Svasti or well being] From Śvētak-ādhishṭhāna

Mahārāja Indravarman who adores the feet of Gōkarṇṇēśvara-bhaṭṭāraka who lives on the Mahēndra mountain, who also adores the feet of the parents, who has

the three *śaktis,* who with his power could crush all the enemies and who possesses the Kaliṅga country won by the strength of his own arms advises and commands the *Mahāsāmanta* *Śrī-sāmanta, Rājānaka, Rājaputra, Kumārā-mātya, Daṇḍanāyaka, Uparika, Vishayapati, Grāmapati* and others in the Jalamvōra-vishaya, thus:-

In the village Amarēśiṅga pertaining to this province (*vishaya*), certain land bounded on the east by the western face of the tank as far as the river, on the west by the Bhōga-pāṭaka land of Vṛiddhabhōgika, on the north by such limit as you like and on the south by the river as far as the middle of its bed, is granted to Bhaṭṭaputra Jakshasvāmi-śarman of the Vājasanēya-charaṇa, Kāṇva-śākhā, Jātukarṇa-gōtra, Vasishṭhavat Jātukarṇa-*pravara* and Jātukarṇavat-Jīvadvijeshṭhavat-*anuprvara,* for the increase of the merit of my parents and self, accompanied with the handful of water, to be enjoyed by him as long as moon, Sun and earth last. Nobody, whoever he may be should interfere with this, out of regard for virtue and myself.

[Four of the usual verses from Dharmaśāstra]

The *dūtaka* here is *Mahāsāmanta* śrī-Nāgakhēddi. It was written by *Mahāpratihāra* Ādityavrman; the king's seal was affixed to it by *Mahāsāndhivigrahika* Chandapāka; it was engraved by *Kaṁsāraka* (brazier) Dēvapila.

Note

1. A symbol

⌘ ⌘ ⌘ ⌘

No. 102

HALDIPUR PLATES OF CHIEF GOPALADEVA

Location	: Haldipur, Honavar Taluk, North Kanara District, Karnataka
Date	: C. 8th Century A.D.
Script	: Telugu-Kannaḍa
Language	: Sanskrit
King	: Gōpāladēva
Dynasty	: Noḻamba-Pallava (?)
Reference	: Rao, N. Lakshminarayan, *EI*, XXI, pp.173-179

Text

स्वस्ति । विक्रमादित्यसत्याश्रयश्रीपृथ्वीवल्लभपल्लवराजगोपालदेवस्य कैकेयवंशोद्भवोद्धतप्रधानपुरुषस्य अनेकगुणगणालंकृतप्रसेव्यलक्ष्मीनिवासवक्षस्थलस्य अनेकरणविपुलशत्रुजनप्रभञ्जनकरिकराकारबाहुद्वयस्य चण्डमहासेनपुत्रस्य पय्वेगुन्दुपुरेश्वरस्य पल्लवराजस्य दत्तिः ॥

Translation

[1]Ōm [|*] Well-being [|*] Pallava-rāja, Gōpālādēva, son of Chaṇḍa-mahāsēna who was. Payvegundu-purēśvara[2] who had two arms resembling an elephant's trunk, who could demolish his many enemies, whose breast was the abode of the (goddess) Lakshmī, who was adorned by many qualities, who was born in the Kaikēya-vaṁśa, who had the title *Vikramāditya-satyāśraya-śrī-Pṛithvīvallabha* has given this[3].

Notes

1. A symbol

2. Payvegundu can be identified with Haigunda, a village which is 12 miles east of Honavar, on the bank of the river Śarāvatī.

3. The Kannaḍa text commencing at this point records the grant of half of the village Kāsampaḻḻi to Siṁgitale-:Paṇyāra of the Hārīta-gōtra by Gōpāladēva.

No.103

NIVINA COPPER PLATE GRANT OF DHARMARAJADEVA

Location : Nimmina, Kudala Taluk, Ganjam District, Orissa
Date : C. 8th century A.D.
Script : Siddhamātṛikā (Early Nāgarī)
Languae : Sanskrit
King : Dharmarāja *alias* Mānabhīta
Dynasty :
Reference : Chakravarti, N.P. *EI.*, XXI, pp.34-41.

Text

Metre : Vv. 1, 4, 12 *Śardūlāvikrīḍita* ; 2, 10, 11, 14 *Sragdharā* ; 3, 6, 7, 9, 13 *Vasantatilakā* ; 5, 15-17 *Anushṭubh* ; 8 *Indravajrā*

ओं स्वस्ति ॥

इन्दोर्द्धौत मृणालतन्तुभिरिव श्लिष्टाः करैः कोमलै
र्बद्धाहेररुणैः स्फुरत्फणिमणेर्द्दिग्द्धप्रभासोंशुभिः ।
पार्वत्याः सकचग्रहव्यतिकरव्यावृत्तबन्धश्लथा
गङ्गाम्भःप्लुतिभिन्नभस्मकणिकाः शम्भोर्ज्जटाःपान्तु वः ॥ १ ॥

श्रीमानुच्चैर्न्नभस्तो गुरुरचलपतेः क्षोभजिद्यः क्षमाया
गम्भीरस्तोयराशेरथदिवसकरात् भास्वदालोककारी ।
ह्लादी सर्व्वस्य चेन्दोस्त्रिभुवनभवनप्रेरकश्चापिवायो
राजा स स्थाणुमूर्त्तिर्ज्जयति कलिमलक्षालनो माधवेन्द्रः ॥ २ ॥

प्रांशुर्महेभकरपीवरचारुबाहुः
कृष्णाश्मसञ्चयविभेदविशाल वक्षाः ।

राजीवकोमलदलायतलोचनान्तः
ख्यातः कलिङ्गजनतासु पुलिन्दसेनः ॥ ३ ॥
तेनेत्थं गुणिनापि सत्वमहता नेष्टं भुवो मण्डलं
शक्तो यं परिपालनाय जगतः को नाम स स्यादिति ।
प्रत्यादिष्टविभूत्सवेन भगवांनाराधितः शाश्वत
स्तच्चित्तानुगुणं विधित्सुरदिशद्वाञ्छां स्वयंभूरपि ॥ ४ ॥
स शिलाशकलोद्भेदी तेनाप्यालोक्य धीमता ।
परिकल्पितसद्वंशः प्रभुः शैलोद्भवः कृतः ॥ ५ ॥
शैलोद्भवस्य कुलजोरणभीत आसी
द्येनासकृत्कृतभियां द्विषदंगनानां ।
ज्योत्सप्रबोधसमये स्वधियैव सार्धं
आकंपितो नयनपक्ष्मजलेषु चन्द्रः ॥ ६ ॥
तस्याभवद्विबुधपालसमस्य सूनुः
श्रीसैन्यभीत इति भूमिपतिर्ग्गरीयान् ।
यं प्राप्य नैकशतनागघटाविघट्ट
लब्धप्रसादविजयं मुमुदे धरित्री ॥ ७ ॥
तस्यापि वंशेषु यथार्थनामा
जातो यशोभीत इति क्षितीशः ।
येनप्ररूढोपि शुभैश्चरित्रै
मृष्टः कलंकः कलिदर्पणस्य ॥ ८ ॥

जातोथ तस्य तनयः सुकृती समस्त

सीमन्तिनीनयनषट्पदपुण्डरीकः।

श्रीसैन्यभीत इति भूमिपतिर्महेभ

कुंभस्थलीदलनदुर्ल्ललितासिधारः ॥ ९॥

कालेयैर्भूतधात्रीपतिभिरुपचितानेकपापावतारै

र्न्नीतायेषां कथापि प्रलयमभिमता कीर्तिपालैरजस्त्रां।

यज्ञैस्तैरश्वमेधप्रभृतिभिरमरा लम्भितास्तृप्तिमुर्व्वी

मुदस्तारातिपक्षक्षयकृतिपटुना श्रीनिवासेन येन ॥ १० ॥

तस्योत्खाताखिलारेर्म्मरुदिवजननोद्भास्वदुष्णांशुतेजाः

शूरो मानी दयालुर्नरपतिरयशोभीतदेवस्तनूजः।

मातंगान्योतितुङ्गान्बहलमदमुचश्चारुवक्रान् प्रचण्डान्

बद्ध्वाकर्षत्यखिन्नः पुनरपि नवते यत्कृतः सम्प्रगल्भः ॥ ११ ॥

केचिद्वन्यमृगेण सार्द्धं रमन्ते तथा स्थितिलीलया

केचिच्चोद्ध्र्वमुखा सहस्त्रकिरणज्वालावलिप्रेक्षणाः।

केचित् शैलगुहोदरेषु निरता धूमावलीपायिनः

अन्ये वायुफलांबुभक्षनिरताः केचिन्निराहारकाः ॥ १२ ॥

इत्थं योगजुषो विहाय वसतिं ध्यायंति दिव्यं पदं

चित्रम्मध्यमराजदेव गुणधृद् राज्येपि तत्प्राप्तवान्।

तस्याभवत्सकलशास्त्रविशेषवेदी

श्रीधर्म्मराज इति सूनुरधीतशास्त्रः।

तस्यातिनिर्म्मलयशः परिवर्द्धमानं
पादौ हरेरिव न मायति मर्त्त्यलोकः ॥ १३ ॥
राज्यं लब्ध्वा प्रदर्पादविगणिततयो माधवो ज्येष्ठभावान्
देशादस्मादपास्तुं कृतविषममतिर्विग्रहे फासिकायां ।
युद्धक्षोभेण भग्नो नृपतिपरमसौ संश्रितस्त्रीवराख्यं
पश्चात्तेनापि सार्द्धं पुनरपि विजितो विन्ध्यपादेषु जीर्ण्णः ॥ १४ ॥
शौर्यं श्रीयौवनं राज्यमेकैकं मदकारकं ।
सर्वं श्रीमानभीतस्य निर्विकारमुपस्थितं ॥ १५ ॥

अलतालङ्घपुरकोटात्। परममाहेश्वरो मातापितृपादानुध्यातः परम भट्टारको महाराजाधिराजपरमेश्वरः श्रीमद्धर्म्मराजदेवः कुशली ॥ अस्मिन् कोङ्गोदमण्डले श्रीसामन्तमहासामन्तमहाराजानकराजपुत्रान्त रङ्गदण्डनायकदाण्डपाशिकोपरिकस्तदायुक्तकविनियुक्तकसकरणव्यवहारिणोन्यांश्च ब्राह्मणपुरोगादिवैषयिकजनपदान् यथार्हं मानयति बोधयति ज्ञापयति विदितमस्तु भवतां खिडिङ्गहारविषयसंबद्धनिविना ग्रामः सवरिदेवदीक्षितभट्टाय वत्सगोत्राय पञ्चर्षिप्रवरानुप्रवराय कौथुमशाखाय छन्दोग्यचरणाय मातापित्रोरात्मनश्च पुण्याभिवृद्धये सलिलधारापुरस्सरेण चन्द्रार्क्कक्षितिसमकालमकरीकृत्य ताम्रशासनेन प्रतिपादितोस्माभिर्न केनचित् विघातितव्यमिति ॥ ग्रामस्य सीमा कृता पश्चिमदिशि तृकुट जोडपापादि वणराइ वाल्मिकवङ्कसिलवणराइ। उत्तरदिशि तृकुट। पाणिसाखत्रैमणिवाढैवणि उत्तरदिशि दिघसिल। पूर्वस्यां जोडवणराइ

वड पूर्वौतरकोणेहि स्त्रोमणि तृकुट। पूवदखिणेहि से . . म तृकुट। पूवदिसहि खोल्लाड। पूवदखिणकोणहि वाघगुहा तृकुट। दखिणदिश पवदिसिल गाडि सवतिः॥ परद्वौ टिम्पिरः। सम्वत् ९ वैशाखसुदिप्रथम पक्षद्वितीया। उक्तञ्च धर्म्मशास्त्रे।

बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्यतस्य तदा फलं॥ १६॥
स्वदत्तां परदत्तां वा यो हरेत वसुन्धरां।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते॥ १७॥

दूतकोत्र महाक्षपटल . . . देवः प्रधानतमहः। लाञ्छितं जयसिंघेन उत्कीर्ण्णं च्चाहिभयेन इति॥

Translation

Verse 1 May the matted hair locks of Śambhu protect us.

Verse 2 There was Mādhavēndra who was like Moon and strong like Vāyu. He could destroy the vice of Kali.

Verse 3 Then there was Pulindasēna, who had the lotus-like eyes and who was well-known to the people of Kaliṅga.

Verse 4 and 5 He worshipped Svayambhū in order that the god might create a fit ruler of the land. Brahman created Śailōdbhava who became the founder of a distinguished family.

Verse 6 Then Ranabhīta was born in this family.

Verse 7 Then his son was Sāinyabhīta.

Verse 8 Then in his dynasty there was Yaśōbhīta[1].

Verse 9 and 10 Then his son was śrī-Śainyabhīta *alias* Śrīnivāsa.

Verse 11 and 12 His son was Ayśōbhīta *alias* Madhyamarājadēva.

Verse 13 His son was Dharmmarāja, who knew all the śāstras.

Verse 14 and 15 Valour and virtues of Dharmmarāja *alias* Mānabhīta extolled.

Prose From Alatālaṅghapura-kōṭa Parmamāhēśvara, who has meditated on the feet of his parents, Paramabhaṭṭāraka, Maharājādhirāja Paramēśvara śrīmad-Dharmmarājadēva *alias* Mānabhīta is well – and says in our Koṅgōda-maṇḍala[2] *śri-sāmanta, mahāsāmanta, mahārāja, rājānaka, rājaputra, aṅtaraṅga, daṇḍanāyaka, dāṇḍapāśika, uparika, tadāyuktaka, viniyuktaka, vyavahāriṇa brāhmaṇa, purōga* and people living in the *vishaya* - these have been honoured illuminated, and made to remember.

Let it be known Nivina village of Khiḍiṅgahāra[3]-vishaya has been granted to Savaridēv-Dīkshita-bhaṭṭa, who is having the Vatsa-gōtra and *pañcha-rishi-pravar-anupravara*, Kauthuma-śākha, Chhandōga-charaṇa for the increase of the merit of my parents and ours with the libation of water.

This grant will last so long as Moon, Sun, earth are there.

This has been given as tax-free gift and it should not be destroyed or rescinded by any one. The boundaries - on the west - Tṛikūṭa Jōḍapā-pādi Vaṇarāi Vālmīkavaṅka stone-vaṇarāi. On the north Tṛikuṭa pāni-sākha-Traimaṇvāḍhaivāṇi, on the north dighaśila, on the east joḍavaṇarāi-vaḍa. On the north east corner sōmani-tṛikuṭa; south east sīma Tṛikuṭa, on the east Khollāḍa. On the south east corner vāgha-guhā Tṛikuṭa. On the south śila gāḍi savatiḥ paradvau ṭimpirah. Samvat Vaiśakha śudi first-paksha second (Then two of the usual verses from Dharmaśāstra).

Dūtaka here is *mahākkshapatala*. . . . dēva pradhānatama. Sealed by Jayasiṁgha and written by Chchāhibhayana[4]

Notes

1. Line - 16 Yaśōbhīta could have been Ayaśōbhīta (jātō-yaśōbhita can be jatō-Ayaśōbhīta.)

2. Kongōda-maṇḍala might have been found around Cuttack, Khurda and Gañjām (*EI*, XXI, p.38).

3. Khidingāhāra-vishaya might have been around Khiḍingi in Kudala Taluk, Gaṅjām district.

4. None of the designations after Line No.40 can be found to be correct.

☼☼☼☼☼

No. 104

KHAMKHED PLATES OF THE TIME OF PRATAPASILA

Location	: Khāmkhēḍ, Buldana District, Maharashtra
Date	: C. 8th century A.D
Script	: Siddhamātṛikā (early Nāgarī)
Language	: Sanskrit
King	: Pratāpaśīla
Dynasty	: . .
Reference	: Mirāshi, V.V., *EI*, XXII, pp. 93-96

Text

Metre : Vv.1-3 *Anushṭubh*

प . . धर्मकस्य

ओं स्वस्ति श्रीः ॥ समधिगतपंचमहाशब्दश्चतुरश्रीप्रकटकरजदात

समस्तनृपतिलक्षणोपेतः सकलगुणगणालङ्कृतशरीरः . . शान्तिधैर्यशौर्य

विनयसत्यशौचसंपन्नः अनेकचातुर्दन्तगजघटा . . . प्राप्तविजयः महा

राजः प्रतापशीलः तस्मिन् शासति वसुन्धरान्तस्यैव भ्रातुः उतर गणराजस्य सूनुः दवनद्रुहटः। स च तत्पादपद्मोपजीवी तद्भक्तस्तत्परः स्वमिव पितरं मन्यमानः किञ्चिच्छ्रेयोभ्युदयमुद्दिश्य नास्ति भूमेः परं दानमिति कृत्वा श्रीपर्ण्णिखेटस्य दक्षिणपूर्वस्यां दिशि गव्यूतमात्रे नन्दपुरं नाम ग्रामं सूर्यग्रहणे शर्म्मसोमस्वामिषष्ठिकुमारनागशर्म्म आदित्यशर्म्म प्रमुखानां ब्राह्मणानां प्रतिपादितवान्। पुरोहित ईश्वरभट्ट नागम्मभट्टगोविन्दभोगिकगोलम्मश्रेष्ठिदुर्ग्गहरिसेनापतिप्रभृतीनां श्रीकरण प्रत्यक्षं विदितमस्तुसर्वनृपतीनामचाटभटप्रवेशं सर्वैश्चैतद्धर्म्मशासनं परिपालनीयं॥ उक्तं च बृहस्पतिना।

बहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं॥ १॥

उक्तं च भगवता वेदव्यासेन व्यासेन।

षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥ २॥

पुनरपि चोक्तं व्यासेन।

स्वदत्तां परदत्तां वा यत्नाद्रक्ष युधिष्ठिर।
महीम्महिमतां श्रेष्ठ दानाच्छ्रेयोनुपालनं॥ ३॥

एवं ज्ञात्वा यत्नतः परिपालनीयमिति॥ शिवमस्तु धर्म्मवृद्धिश्च॥ चतुरो द्घाटसमेतग्रामस्य पूर्व्वस्यां दिशि व्याघ्रविरकं नाम ग्रामः। दक्षिणेनभ्रम शकं नाम ग्रामः। अपरतः श्रीपर्ण्णिकग्रामो भवति। तस्य ग्रामस्य मर्या

दावहो भवति। उत्तरतः छोबविरकग्रामः॥ श्रीगोविन्दविष्णुचरणपंकज निर्ग्गतेन भृङ्गेन दुर्ग्गहरिसेनापतिना लिखितमिदं ताम्रशासनमिति॥

Translation

Seal : pa . . . Dharmakasya

[1]Ōm [|*] Well being [|*] There is *Mahārāja* Pratāpaśīla, who has attained *pañchamahāśabda* who is endowed with all the distinctive marks of royalty, whose person is decked with the multitude of all good qualities, who is possessed of tranquility, courage, bravery, modesty, truth and purity,who has attained victories with numerous four-tusked elephants . . . . While he is ruling over the earth Davana-Druhaṭa (Drubhaṭa?), the son of his own eledest brother king Utaragaṇa, who is dependent on his lotus-like feet, is devoted to him and is wholly engaged in (serving) him, who regards him as his own father and thinks that there is no higher gift than that of land for (the attainment of) any religious merit and good fortune, donates on (the occasion of) a solar eclipse the village Nandapura[2] (situated) at a distance of only one *gavyūta* (4 miles) in the south-eastern direction of Śrī-parṇikhēṭa[3] to brahmins, the foremost of whom are – Śarman, Sōmavāmin, Shashṭhikumāra, Nāgaśarman and Ādidtyaśarman. Let it be known to the *Purōhita* Īśvara-bhaṭṭa, Nāgamma-bhaṭṭa, the *Bhōgika* Gōvinda, the *Śrēshṭhin* Gōlamma and the *Sēnāpati* Durggahari at our *Śrīkaraṇa* (record office) as also to all kings that this religious order, which prohibits the entry of *chāṭas* and *bhaṭas* (in the donated village) must be obeyed by all. [Contains three of the customary verses, which had been composed by the worshipful Vyāsa, the collator of Vēdas]

Knowing this, this order should be obeyed. May there be well-being and increase of religious merit. This village which has the (following) well-defined boundaries has the village Vyāghra-viraka[4], on the east, the village Bhramaśaka on the south, Śrī-Parṇikagrāma[5] which forms the boundary of the (donated) village on the west and Chhōbaviraka-village on the north. This copper-edict was written by *Sēnāpati* Durggahari, who is a bee that has issued out of the lotus-like feet of Śrī-Gōvinda-Vishṇu.

Notes

1. Symbol

2. Nandapura, the donated village is probably the present Khāmkhēḍ, where the plates were found.

3. Parṇṇikhēṭa is probably Pāṅgārkhēḍ about 1 1/ 2 miles to the north-west of Khāmkhēḍ.

4. Vyāghraviraka is Vāghor about a mile to the north-east of Khāmkhēḍ.

5. Parṇikagrāma is probably the modern Pangarkhēḍ

○ ○ ○ ○

No. 105

SAUGOR STONE INSCRIPTION OF SANKARAGANA

Location : Saugor. Saugor District, Madhya Pradesh
Date : C. 8th Century A.D.
Script : Proto Nāgarī
Language : Sanskrit
King : Śaṅkaragaṇa I
Dynasty : . .
Reference : Hiralal, Inscriptions in CP and Berar (Second Ed.), p.49; Mirashi, V.V., *CII*, IV, pp.174-176.

Text

सिद्धिः। ओं नमः शिवाय। स्वस्ति परमभट्टारकमहाराजाधिराज परमेश्वरश्रीवामराजदेवपादानुध्यात परमभट्टारकमहाराजाधिराजपरमेश्वर श्रीशङ्करगणदेवप्रवर्द्धमानविजयराज्ये कशपुरपरमेश्वरकलाइरेयवंशोद्भव ज्योतिस्सन्ततिरावार्यराजपुत्रश्रीदेउकः। तस्यैव भार्या लोणियवंशे प्रसूता राज्ञी श्रीकृष्णादेवी या चैतन्मातापितृपुण्यार्थं क्षितितले कीर्तिं प्रख्यापयति। तवालोकामला इति॥

Translation

Success ! Oṁ ! Adoration to Śiva ! Hail ! During the increasingly victorious reign of the *Paramabaṭṭāraka*, *Mahārājādhirāja*, and *Paramēśvara*, the illustrious Śaṅkaragaṇadēva, who meditates on the feet of the *Paramabhaṭṭāraka*, *Mahārājādhirāja*, and *Paramēśvara*, the illustrious Vāmarājadēva –

(There is) the illustrious Dēuka the son of Rāvāryarāja, the mass of light sprung from the family of Kalāirēya, (who is) the *Paramēśvara* (Emperor) of Kaśapura.

The wife of the same is the queen, the illustrious Kṛishṇādēvī, born in the family of Lōṇiya, who announces this meritorious work (*kīrtti*)[1] on the surface of the earth, for the religious merit of these, (her) mother and father. May you attain the stainless worlds.|

Notes

1. This probably refers to the temple of Śiva where the inscribed panel was apparently put up.

Φ Φ Φ Φ

No. 106

PLATES OF ANANTAVARMAN, SON OF DEVENDRAVARMAN

Location	: Sudava, Gaṅjam District, Orissa
Date	: Ganga year 204=C. First quarter of 8th Century A.D.
Script	: Telugu-Kannaḍa
Language	: Sanskrit
King	: Anantavarman, son of Dēvēndravarman
Dynasty	: Eastern Gaṅga.
Reference	: Ghosal, R.L., *EI*, XXVI, pp.65-68

Text

Metres : V.1 *Anushtubh*

ओं स्वस्ति॥ विजयवतः कलिङ्गनगरान्महेन्द्राचलशिखरप्रतिष्ठितस्य भगवतो गोकर्ण्णस्वामिनः प्रणामाद्विगलितकलिकलङ्कः श्रीमद्गाङ्गकुलतिलको निजनिस्त्रिंशोपार्ज्जितकलिङ्गाधिराज्यः प्रविततचतुरुदधितरङ्गमालामेखलावनितलामलयशाः अनेकाहवसंक्षोभजनितजयशब्दः प्रतापावनतसमस्तसामन्तचक्रचूडामणिप्रभामञ्जरीरञ्जितचरणो मातापितृपादानु

ध्यातः परममाहेश्वरश्रीमहाराजाधिराजदेवेन्द्रवर्म्मसूनुर्म्महाराजश्रीमाननन्तवर्म्मा क्रोष्टुकवर्त्तन्यां तालत्थेरे सर्व्वसमवेतान्कुटुम्बिनः समाज्ञापयति। विदितमस्तु भवतां यथायं ग्रामोस्मद्भ्रात्रा श्रीजयवर्म्मणा मातापित्रोरात्मनश्च पुण्याभिवृद्धयेभ्यर्थितेन मया वेदवेदाङ्गपारगेभ्यः कामरूपविषयश्रिङ्गाटिकाग्रहारवस्तव्येभ्यः पाराशरसगोत्रेभ्यो विष्णुसोमाचार्यपादेभ्यो विवाहसमये कन्यादानमुदकपूर्व्वं कृत्वाचन्दार्क्कप्रतिष्ठं सर्व्वकरभरान्मुक्त्वा दत्तस्तदेवं बुद्ध्वा यथोचितभागभोगमुपनयन्तः सुखं वसतेति।

अधुना सीमालिङ्गानि क्रमेण स्थितानि ऐशान्यां देवपर्व्वतशिखरः तत्पूर्व्वेण गिरिवटवनराजिपुरुषच्छाययाप्पचेरुमद्ध्येन तालत्थेरहेमशृङ्गतादप्परः त्रिकूटे सुरुलिवाल्मीकः पार्व्वत्य गिरिवटः धातुकरञ्जः वसन्तपुरत्रिकूटे चिञ्चावनराजिपञ्चाङ्गुलविभीतः कोङ्गपर्व्वते पूर्व्वावतारे गिरिवटः सल्लपत्थरे कोशाम्रः चिञ्चावापीपूर्व्वालिः पर्व्वतशिखरे दुमूल्लित्रिकूटः पूर्व्वदिक् दक्षिणेन चिञ्चापङ्क्तिः सोमवाटकत्रिकूटे राधनचिञ्चापङ्क्तिः धारवाटकत्रिकूटे चिञ्चावनराजिराजमार्ग्गः चिञ्चावाल्मीकः कवाटसन्धि वाल्मीकः पुनः कवाटसन्धितोरवाल्मीकः निखातोपलः निम्बवाल्मीकः दक्षिणादिक् पश्चिमेन कपाटसन्धिः कुडुङ्गपङ्क्तिः वकुलवनराजितटाकालिः सोमविभीत सोमकपित्थगर्त्ता चिञ्चाद्रुमः . . चिञ्चावनराजि शाल्मलीपिपूपर्व्वतशिखरः अप्पचेरुः सप्तपर्ण्णः त्रिकूटे चिञ्चापश्चिमदिक् उत्तरेण वेणुवनराजी मोदके राधनः कोर्क्कण्टशिखरे तादप्परः त्रिकूटः सोमद्रुम स्ततः पर्व्वतशिखरेण सलवदेवपर्व्वतशिखर इति। अत्र च व्यासगीताः।

स्वदत्तां परदत्तां वा यत्नाद्रक्ष युधिष्ठिर ।
महीं महीमतां श्रेष्ठ दानाच्छ्रेयोनुपालनम् ॥ १ ॥

इत्येवमादि प्रवर्द्धमानविजयराज्यसंवत्सरशतद्वये चतुरुत्तरे २०४ मार्ग्गशीर्षशुक्लपक्षत्त्रयोदश्यां दत्तमिदं शासनमुत्कीर्णं नादिमचिसूनुकुयालिलिखिना ॥

Translation

[1]Ōm [||*] Well being [||*] From Kalinga-nagara with glory [||*] For the player of Gōkarnna-svāmin who had established on the Mahēndra-mountain. There was Mahārāja-śrīman Anantavarman son of the Mahārāja Dēvēndravarman,who was the chief of Kalingādhirājyaḥ, who had blessed the feet of his parents, who had the glorious succession of battles, who had in his hold the whole earth encircled by the four oceans ordered the householders of Tālattara in Krōshṭuka-varttanī[1] to know that my brother śrī Jayavarmma, for the increase of the merit of my parents and ourselves for the worshipful Vishṇu-Sōmāchārya of Parāśara-sagōtra of Kāmarūpa and its Śriṅgātik āgrahāra at the ṭime of the wedding and Kanyādāna, along with due water and for the establishment of moon and Sun for a long time till they endure, so long as all the taxes having been excluded and for the *bhōga* and *bhāga* are being gifted to be enjoyed. The boundaries are: to the north west, Dēva-parvvata-sikhara; on the east giri-vaṭa-vana-rāji; in the length of a man's shadow and āppacheru in the middle; in the Tālathēra-Hemaśringa. (One of verses of Vyāsa)

In the victorious year 204 – Mārgaśīrsha bright fortnight of 133. Written by Kuyāli son of Nādimachi

Notes

1. Kōshṭukavarttanī is a *vishaya* and it is identified with modern Chicacole.

No. 107

DOMMARA NANDYALA PLATES OF PUNYA-KUMARA

Location : Dommara-Nandyāla, Jammalamadugu Taluk, Cuddapah District, Andhra Pradesh
Date Year 10 (8th century A.D.)
Script : Telugu
Language : Sanskrit
King : Puṇyakumāra
Dynasty : Telugu-Chōḷa
Reference : Narasimhasvami, H.K., *EI*, XXVII, p.268-76.

Text

Metres : V.1; *Āryā* ; 2; *Anushṭubh*

ओं। स्वस्ति श्रीमत्॥

जयति धृतचन्द्ररेखं विपुलामलतारकाशुभं लोके।
गगनमिवसुप्रसन्नं वपुरप्रतिमं लकुटपाणेः॥ १॥

दिनकरकुलमन्दराचलमन्दारपादपस्य कवेरतनयावेलोल्लङ्घनप्रशमनप्रमुखाद्यनेकातिशयकारिणः त्रैराज्यस्थितिमात्मवत्कृतवतः करिकालस्यान्वये नन्दिवर्म्मनामा नृपतिरभवत्तस्य त्रयसूनवः सिंहविष्णुस्सुन्दरनन्दो धनञ्जयवर्म्मा चेति॥ तेषामानुपूर्व्वानुभूतराज्यश्रियां कनीयसो धनञ्जयवर्म्मणः पुत्रः परिप्राप्तचोळमहाराजशब्दः शब्दशास्त्रविद्यानेकपारगः पाण्ड्यचोळकेरळानामधिपतिस्तस्य श्रीमुदितशिलाक्षरनवरामाद्यनेकनामधेयस्य महेन्द्रवर्म्मणः पुत्रः गुणमुदितो नाम नृपतिरभवत्तस्य प्रियभ्राता पोर्मुखरामपुण्यकुमारमार्दवचित्तमदनविलासाद्यनेकनामधेयः

श्रीमान् पुण्यकुमारो नाम हिरण्यराष्ट्राधिपतिः स्वराष्ट्रनिवासिन आज्ञापयति विदितमस्तु वोस्माभिः दशमे वर्षे पुदोरूरधिवसद्भिः फाल्गुण्याम् पौर्णमास्यां नन्दिगामग्रामे उत्तरदिशि राजमानेन क्षेत्रं दत्तं।

कौण्डिन्यगोत्रस्य इरुगशर्मपुत्रदेवशर्मणः राजमानेन पञ्चदशं क्षेत्रं दत्तं।

भारद्वाजगोत्रमादिशर्मपुत्र कविलशर्मणः राजमानेन पञ्चदशं क्षेत्रं दत्तं।

आत्रेयगोत्रकोण्डिशर्मपुत्रदोणशर्मणः राजमानेन पञ्चदशं क्षेत्रं दत्तं।

कौण्डिन्यगोत्रमारिशर्मपुत्रदुर्ग्गशर्मणः राजमानेन पञ्चदशं क्षेत्रं दत्तं।

पसिंडिकुरुनामग्रामे दक्षिणदिशि राजमानेन पञ्चदशं क्षेत्रं दत्तं।

भारद्वाजगोत्र देवशर्मपुत्र वेदिशर्मणः राजमानेन पञ्चदशं क्षेत्रं दत्तं।

स्वदत्तां परदत्तां वा यो हरेत वसुन्धरां।
षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः॥ २॥

कोट्टिकुण्टराजलिखितं॥

Translation

[1]Ōm [||*] Well being [||*]

Verse May the bright and matchless form of Lakutapāṇi (Śiva), adorned with the crescent moon and auspicious on account of the wide, spotless pupils (of its eyes), comparable to the sky (which is similarly) crescent adorned, expansive, spotless, starry, bright and matchless, be victorious in this world.

Prose In the lineage of Karikāla (who was like) Mandāra tree on (the hill) Mandarāchala, which was the solar race, who was famed for astounding deeds, one of which was stopping the overflow of the river Kāvērī, who made the *trai-rājya sthiti* as his own, there was the king named

